CC-0. In Public Domain. Digitization by eGangotri

Other Manuscript

Manu - 14

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

के.ह. १११

अथ सटीका सप्तशती प्रारभ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः श्रीमहाकाल्यैनमः श्रीमहालक्ष्म्यैनमः श्रीमहासरस्वत्यैनमः मार्कंडेयेनक्रोष्टुकिंभागुरिंप्रतिउक्तंस्तोत्रंजैमिनिप्रतिपक्ष
रूपैर्मुनिपुत्रैरुक्तंमार्कंडेयपुराणेतद्व्यामतिव्याचक्ष्महे तत्रादौव्याख्यास्यमानस्तोत्रेस्तूयमानदेवतास्वरूपंप्राधानिकरहस्याख्येग्रंथविशे
षेउक्तंविविच्यदर्श्यते तत्रादौराज्ञःप्रश्नः भगवन्नवतारामेचंडिकायास्त्वयोदिताः एतेषांप्रकृतिंब्रह्मन्प्रधानंवक्तुमर्हसीति अत्रैतेषामितिनिर्धार
णेषष्ठी प्रकृतिंमूलकारणंतत्रोत्तरंतत्रलक्ष्यस्वरूपमाह मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती नागंलिंगंचयोनिंचबिभ्रतीनृपमूर्द्धनि त
प्तकांचनवर्णाभातप्तकांचनभूषणाइति अलक्ष्यस्वरूपमाह शून्यंतदखिलंस्वेनपूरयामासतेजसेति लिंगंयोनिंचबिभ्रतीत्यनेनास्याःपुं
रूपत्वंस्त्रीरूपत्वंचध्वनितम् एतदेवरूपंशैवाःसदाशिवइत्याहुःवैष्णवाःवासुदेवइति शाक्ताःमहालक्ष्मीरिति इयंमहालक्ष्मीःकूटस्थाप्रथ
ममध्यमोत्तरचरित्रत्रयदेवतासमष्टिरूपासकलदेवीमाहात्म्येदेवतेतिबोध्यम् एषाशैवीवैष्णवीच सदाशिवांकमारूढाशक्तिरिच्छाकृया
शिवा महालक्ष्मीरितिख्यातादेवीसर्वगुणान्वितेतिशिवपुराणात् लक्ष्मीतंत्रेविष्णुशक्तिरूपयालक्ष्म्याशक्रंप्रतिकाल्यादीनांस्वावतार
भेदत्वोक्तेश्च एतच्चसर्वात्म्येपर्यवस्यति मायाविशिष्टंशुद्धंब्रह्मेदंप्रधानतत्वस्थम् ततोगुणत्रयविभागेनाह शून्यंतदखिलंलोकंविलोक्य
परमेश्वरी बभाररूपमपरंतमसाकेवलेनहि अत्रतमसःप्राधान्यमाश्रित्यकेवलानेत्युक्तिः तद्रूपमाह साभिन्नांजनसंकाशादंष्ट्रांकितव
रानना विशाललोचनानारीबभूवतनुमध्यमा खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा कबंधहारसुरसाबिभ्राणाहिशिरःस्रजम् अस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स.स. रूपेणातामसत्वमुक्त्वातदेवमोहजनकत्वोपपत्तयेज्ञानकल्पाल्पत्वप्रदर्शनेनैवद्रढयति साप्रोवाचमहालक्ष्मींतामसीप्रमदोत्तमा नामकर्मच अ.
२ मेमातर्देहितुभ्यंनमोनमइति अतएवमहालक्ष्मीरपररूपंबभारेत्यनेनाविरोधः अनेनाहिमूलशक्तेरस्याश्चभेदोध्वन्यते ततोमहालक्ष्मी- १
राह महामायामहाकालीमहामारीक्षुधातृषा निद्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया इमानितवनामानिप्रतिपाद्यानिकर्मभिरिति इ
मांरुद्रेत्यन्येव्यवहरंति ततःतामित्युक्त्वामहालक्ष्मीःस्वरूपमपरंनृप सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंदधौ अक्षमालांकुशधरावीणापु
स्तकधारिणी साबभूववरानारीनामान्यस्यैवसाददौ अस्याःसत्वप्रधानत्वंदर्शयितुंज्ञानकलातिरोभावाभावोनामादिप्रभाभावेनदर्शितः
महामायामहावाणीभारतीवाक्सरस्वती आर्याब्राह्मीकामधेनुर्वेदगर्भाचधीश्वरीति इमांविष्णुरित्यन्येश्वेतरूपधरत्वेनापिविष्णोःस्मर
णात् अत्रतमःसत्वयोःप्रविभागोन्त्यामहालक्ष्मीरेवस्वयंरजःप्राधान्येनास्थितेत्युक्तंभवति इमांब्रह्मेत्यन्येअलक्ष्यरूपंचसर्वमूलंचतुर्थं
वेदितव्यम् आसांचमूलशक्त्याअभेदउक्तएव परस्परमपितदभिन्नाभिन्नस्यतदभिन्नत्वमितिन्यायेनबोध्यम् स्वस्वरूपांशेनावृतज्ञा
नत्वादासांतदभेदज्ञानमपि एतास्तिस्रोपिकन्याएव तत्समानकक्षपुरुषांतरानुक्तेः सर्वासांपुंस्त्रीउभयरूपताच अथोवाचमहालक्ष्मी
र्महाकालींसरस्वतीम् युवांजनयतांदेव्योमिथुनेस्वानुरूपतः इमा आज्ञादानंसंमतिरूपंबोद्धव्यम् इत्युक्त्वातेमहालक्ष्मीःससर्जमिथु २
नंस्वयम् हिरण्यगर्भौरुचिरौस्त्रीपुंसौकमलासनौ ब्रह्मन्विधेविरिंचेतिधातरित्याहतंनरम् श्रीःपद्मेकमलेलक्ष्मीत्याहमाताचतां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियम् अथमात्वंततः प्रादुर्भावमात्रेण महाकालीभारतीचमिथुनेसृजतःसह नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरम् जनयामासनामा
नितयोरपिवदामिते विष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्दनः उमागौरीसतीचंडीसुंदरीसुभगाशुभा एवंयुवतयःसद्यःपुरुषत्वंप्रपेदिरे
पुरुषत्वमपीत्यर्थः एताश्चनसर्ववेद्याः ताश्रियाचनसर्ववेद्येत्याह चक्षुष्मंतोहिपश्यंतिपश्यंतिज्ञानचक्षुषइति तत्र ब्रह्मणेप्रददौपत्नीमहा
लक्ष्मीर्नृपत्रयीम् रुद्रायगौरीवरदांवासुदेवायचश्रियम् तत्रस्वस्वपत्न्यासहितास्तेक्रमेणब्रह्मासृष्ट्यधिकारं विष्णुःपालनाधिकारं रुद्रः
संहाराधिकारंकृतवानित्यग्रेउक्तम् इयंत्रयीमहाकालीजन्यत्वात् कर्मतःतमोमयी सितांस्त्रियमित्युक्तेरूपतःसत्वमयी एवंचतमःसत्वयो
स्तस्यांसाम्यम् ब्रह्माचमहालक्ष्मीजन्यत्वात् हिरण्यगर्भाभित्युक्तेस्वरूपतःकर्मतश्चरजोमयइति तत्ररजोद्वैगुण्यं विष्णुःसरस्वतीजन्य-
त्वात् सात्विकःकर्मतः कृष्णंचपुरुषमित्युक्तेः रूपतःतमोमयइति तत्रसत्वतमसोःसमता लक्ष्मीस्तुब्रह्मवत्द्विगुणरजोगुणा रुद्रोमहा-
कालीजन्यत्वात् कर्मतस्तमोमयः श्वेतांगमित्युक्तेरूपतःसत्वमयइति तत्रसत्वतमसोःसाम्यम् गौरीतुसरस्वतीजन्यत्वात् गौरीमित्युक्तेश्चकर्म-
तोरूपतश्चसत्वमयीति सत्वद्वैगुण्यम् अतएवतत्तद्गुणानुरूपस्रष्टृत्वादिकर्मतेषां एवंचब्रह्मविष्ण्वोःस्त्रीपुंमिथुनंमिलित्वागुणत्रयमपि शिव
मिथुनेतुसत्वंत्रिगुणम् एकगुणंतमः रजसःसर्वथाभावइतितत्वम् एतेप्रथमाब्रह्मादयः तदग्रेवब्रह्मणोविष्णुरितिधारा रुद्राद्रुद्रस्तस्मात्पुनः
रुद्रइतिरुद्रधारा काल्याःसरस्वतीसरस्वत्याश्चकालीतिकालीधारा सरस्वत्याःकालीकालीतःसरस्वतीतिसरस्वतीधारा लक्ष्म्याःलक्ष्मीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोलक्ष्मीरितिलक्ष्मीधारा सर्वत्रापिगौरीकेशवौलक्ष्मीब्रह्माणौ सरस्वतीशंकरौचेतिसहजौ सर्वत्रब्रह्मणः सरस्वती विष्णोर्लक्ष्मीः शिवस्यगौ-
रीपत्नीत्यौत्सर्गिकीरीतिः सर्वेषांरूपकर्माणिमूलवदेव कदाचित्कल्पभेदेनस्थानभेदेनवालक्ष्मीतः कालीसरस्वत्यौ सरस्वत्याः सकाशादित
रे काल्याःसकाशादितरे विष्णोर्ब्रह्मरुद्रौ ब्रह्मणोरुद्रविष्णू रुद्रात्ब्रह्मविष्णूइत्यपिस्वेच्छादिवशात् इतिनानाप्रकारस्पुराणादिस्थस्सृष्टिक्र
मेकश्चिन्नविरोधइति एतेसर्वेपिसर्वज्ञत्वादिसकलशक्तिमंतः तत्तदधिकारनैयत्यात्तुकिंचिज्ज्ञत्वादिव्यवहारोपिस्वस्वोर्ध्वब्रह्मादिनियम-
तात्च एवंयेजीवाःउपासनादिकर्मणातत्तल्लोकेसारूप्यंप्राप्तास्ते तत्तल्लोकीयब्रह्मवासुदेवादिभिःसमानाकारत्वात् ब्रह्मादिसंज्ञाभाजोजी
वाएव एषामपिकर्मानुरूपंतत्तदधिकारभाक्त्वम् एषांसर्वेषांमूलाभेदेनतदभेदस्यसत्वेस्वात्मांशे आवरणहीनतयातैर्ज्ञानंनचसर्वात्म्ये
नस्तुतिर्नविरुद्धा एवंवा अंडादिकादिब्रह्मादीनांस्वप्रादुर्भूतब्रह्माभेदज्ञापनायैवप्राधानिकरहस्येमुख्यलक्ष्म्यादिजन्यब्रह्मादीनामेव अंड
स्रष्टृत्वतदुदकत्वतत्पालकत्वतत्संहारकत्वादीनि अग्रेउक्तानीतिबोध्यम् स्वरयासहसंभूयविरिंचोंडमजीजनत् बिभेदभगवान्रुद्रस्त-
द्गौर्यासहवीर्यवानित्यादिना एवंचपृथिवीतत्वाधिष्ठातृभूतहरेर्योगनिद्रासंपादिकायास्तादृश्या अपिमहाकाल्यामूलशक्त्यभेदादेव त
याविसृज्यतेसर्वंसाविद्यापरमामुक्तेरित्यादिनाक्रियमाणासर्वात्म्येनस्तुतिर्नविरुद्धा एवंजडात्मिकायाः प्रकृतेश्चेतनरूपायाश्चिच्छक्ते-
श्चाधिष्ठात्र्यधिष्ठेययोरभेदंमत्वा योगनिद्राजगत्पतेः सैषाप्रसन्नावरदाइत्यादिनातत्रजडचेतनयोः सामानाधिकरण्यं अत्रमूलप्रकृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जडशक्तेर्महामायाकुंडिनीत्यादिशब्दैर्व्यवह्रियमाणाया अधिष्ठात्री चिच्छक्तिरपि तदभेदात् महामायादिसंज्ञाभाक् एवं तमोमयी कालीसंज्ञा शक्ति
रपि निद्रामोहादिभिः पुरुषज्ञानावरकत्वान्महामायाइत्युच्यते मूलशक्त्यभेदाच्च सा चेयं शक्तिः मनोधिष्ठिता एव उपास्या तत्र शक्तस्य शक्तिप्र
त्याश्रयत्वेपि कार्येसित्तो शक्तेरेव प्राधान्यमतः शक्तिरूपास्येति व्यवहारस्य नानुपपत्तिः एवं मुक्तिदातृत्वं सर्वाश्रयत्वादि व्यवहारोपि समंज
सः उपास्यत्वं च महाकाल्यादिद्वारा मूलशक्तेरेवेति सर्वं समंजसम् अन्यच्च तत्र तत्र वक्ष्यामः अस्याः शापोद्धारोत्कीलने कात्यायनीतंत्रो-
क्ते त्रयोदशाध्यायं पठित्वा प्रथमं पठेत् ततो द्वादश द्वितीयो तत एकादश तृतीया विति क्रमेण पठेत् सप्तमं द्विरिति शापोद्धारः प्रथमं मध्यम
चरित्रं पठित्वा ततः प्रथम तृतीयो पठेदित्युत्कीलनं इति केरलाः अथ प्रसंगात् स्तोत्रविधिः तत्र वाराहीतंत्रे आधारे स्थापयित्वा तु पुस्तकं वाचयेत्त
तः हस्तसंस्थापनाद्देवि भवेदर्द्धफलं यतः यावन्न पूर्यते ध्यायस्तावन्न विरमेत्पठेत् यदि प्रमादादध्याये विरामो भवति प्रिये पुनरध्यायमा
रभ्य पठेत्सर्वं मुहुर्मुहुः अनुक्रमात्पठेद्देवि शिरः कंपादिकं त्यजेत् तथान्यत्र प्रणवं पूर्वमुच्चार्य स्तोत्रं वा संहितां पठेत् अंते च प्रणवं दद्यादि
त्युवाचादि पूरुषः नमोंतं च पठेत्स्तोत्रं वाचकं तु प्रशस्यते यत्तु कीलके शनैस्तु जाप्यमानेस्मिन् स्तोत्रे संपत्तिरुच्चकैरिति तदत्युच्चैः पाठनि
षेधकं त्वरानिषेधकं च पुस्तके वाचनं शस्तं सहस्रादधिकं यदि ततो न्यूनस्य तु भवेत् वाचनं पुस्तकं विना विनापीत्यर्थः ऋषिं छंदों गं विन्यस्य
पठेत्स्तोत्रं समाहितः स्तोत्रेन दृश्यते यत्र प्रणवं न्यासमाचरेत् भीष्मपर्वणि या गीता सा प्रशस्ता कलौ युगे विष्णोः सहस्रनामाख्यं स्तोत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापप्रणाशनम् गजेंद्रमोक्षणंचैवतथाकारुण्यकस्तवः नारसिंहंतथास्तोत्रंस्तोत्रंश्रीरामसंज्ञकम् देव्याःसप्तशतीस्तोत्रंतथानामसहस्रक
म् श्लोकाष्टकनैलकंठंशैवंनामसहस्रकम् त्रिपुरायाःप्रसादाख्यंसूर्यस्यस्तवराजकम् पैंचोरुचिस्तवोयश्चइंद्राक्षीस्तोत्रमेवच वैष्णा
वंचमहालक्ष्म्यास्तोत्रमिंद्रेणभाषितम् भार्गवाख्येनरामेणशप्तान्यन्यानिकारणात् शुद्धेनाचलचित्तेनपठितव्यंप्रयत्नतः नस्वयंलिखि
तंस्तोत्रंनाब्राह्मणलिपिंपठेत् नचस्वयंकृतंस्तोत्रंतथान्येनचयत्कृतम् यतःकलौप्रशंसंतिऋषिभिर्भाषितंतुयत् क्वचित्तु अष्टम्यावा
चतुर्दश्यांकृष्णायांतुसमाहितः ददातिप्रतिगृह्णातिनान्यथैषाप्रसीदति इतिकीलकग्रंथे सप्तशतीग्रंथेशिवशापतदुद्धारावुक्तौ त-
थावैकृतिकरहस्ये ततःकृतांजलिर्भूत्वास्तवीतचरितैरिमैः एकेनवामध्यमेननैकेनेतरयोरिह चरितार्धंतुनजपेज्जपन्छिद्रमवाप्नुया
त्इति अर्गलांकीलकंचादौजपित्वाकवचंपठेत् जपेत्सप्तशतींपश्चात्क्रमएषक्वचोदितः इतिकेरलसंप्रदायः इतिस्तोत्रपठनविधिः
ॐनमश्चंडिकायैनमः मार्कंडेयउवाच सावर्णिरितिसवर्णायाश्छायाया अपत्यंसावर्णिः बाह्वादित्वादिञ् विस्तराद्गदतोममेति अपा
दानशेषत्वविवक्षायांषष्ठी निशामयजानीहि चुरादेरूपं तस्यनान्येमितोहेतावितिमित्वनिषेधः सूर्यस्यतनयइतिदक्षसावर्ण्यादिनिरा
सार्थः यद्वा यः यकारादष्टमोमनुर्हकारस्तस्यविशेषणंसूर्यतनयइति सचाग्निस्तेजस्वित्वेनतन्नोदिष्टत्वात्तेनतद्बीजंरेफोलभ्यते तद्व्
चहकारस्यलक्षणयोच्यते तस्यैवविशेषणांतरात्सावर्णिरिति सवर्णालोहितशुक्लकृष्णावर्णसहिताप्रकृतिः तस्याअपत्यत्वसंबंधीन ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वनकईकारकः तद्रूपंलक्षणयाओं तिस्रोबिंदुस्तुश्लोकेस्वरूपत एवनिवेशितइति ईंह्रींइतिबीजलब्धंतदुत्पत्तिंतन्मंत्रप्रतिपाद्यदेवतायाउत्पत्तिंनि
शामयेतिसंबंधः यद्यपिएतदुपक्रमेप्रश्ने अस्मिन्कल्पेससयेन्येभविष्यंतिमहामुने मनवस्तान्समाचक्ष्वतेषुदेवादयश्चये इत्येवोक्तम् तथापि-
सावर्णिकाख्यानकथनोत्तरंमार्कंडेयपुराणेसावर्णिकमिदंसम्यक्प्रोक्तंमन्वंतरंतव तथैवदेवीमाहात्म्यंपृष्टमेतत्तवोदितमित्युपसंहारेणतद्वि
षयकोत्सुकिप्रश्नस्यानयनात् उपक्रमप्रश्ननिबंधरूपलक्षणमितिबोध्यम् १ महामायेति विश्वसदप्रतीतिसाधनमाया तस्यामहत्वंचसर्व-

मार्कंडेयउवाच सावर्णिःसूर्यतनयोयोमनुःकथ्यतेष्टमः निशामयतदुत्पत्तिंविस्तराद्गदतोमम १ महामायानुभावेनयथा
मन्वंतराधिपः सबभूवमहाभागःसावर्णिस्तनयोरवेः २ स्वारोचिषेंतरेपूर्वंचैत्रवंशसमुद्भवः सुरथोनामराजाभूत्समस्तेक्षि
तिमंडले ३

विषयत्वमिति महामायाईश्वरशक्तिः तस्या अनुभावःइदमस्यभवत्वितीच्छा मन्वंतरंकिंचिदाधिकैकसप्ततियुगात्मककालः
तथेत्यनेनतथातंप्रकारंनिशामयेत्यनुषंगोदर्शितः भागंभगसमूहः ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभग
इतीरणेतिविष्णुपुराणात् बभूवेति भूतवदुपचारः तद्भवनस्यावश्यकत्वद्योतनाय सावर्णिस्तनयोरवेरितिसंप्रमेपुनरुक्तिः २ स्वारोचिषे
इति स्वारोचिषाधिकारोपलक्षितेद्वितीयमन्वंतरे पूर्वमितिकथाकालापेक्षयाचैत्रस्तस्यैवमनोःसुतः नामेतिप्रसिद्धौ ३ ६९ ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स·स· तस्येति सम्यक्नीतिशास्त्रानुसारेणकोलास्तरयस्यैवराजधान्यंतरम् तथाअतिशयेनकोलाविध्वंसिनइत्यर्थः ४ तस्यतैरिति अतिप्रबल अ·
५ दंडकर्त्तुः छांदसत्वात्कर्मधारयादिभिः इदंपराजयनिमित्तंन्यूनैरल्पसाधनैः ५ ततइति ततःभंगानंतरम् तैःप्रबलैःअरिभिः शत्रुभिराक्रांतो १
आक्रमितः महाभागःस्वपुरंआयातः निजदेशाधिपएवाभवत् नसार्वभौमइत्यर्थः भाव्येतज्जन्मभवजन्मांतरीणमहाराज्यमितिबुद्ध्योस्त्री
कृत्यमहाभागइत्युक्तम् ६ अमात्यैरिति ततःतस्यसार्वविभक्तिकस्तसिः तत्रस्वपुरेऽ तिकोशोऽर्थसंचयः बलंसैन्यंचापहृतं आत्मसा-

तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान् बभूवुःशत्रवोभूपाःकोलाविध्वंसिनस्तथा ४ तस्यतैरभवद्युद्धमतिप्रबलदंडि
नः न्यूनैरपिसतैर्युद्धेकोलाविध्वंसिभिर्जितः ५ ततःस्वपुरमायातोनिजदेशाधिपोभवत् आक्रांतःसमहाभागस्तैस्तदाप्रबला
रिभिः ६ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः कोशोबलंचापहृतंतत्रापिस्वपुरेततः ७ ततोमृगयाव्याजेनहृतस्वाम्यः
सभूपतिः एकाकीहयमारुह्यजगामगहनंवनं ८

त्कृतम् दुष्टत्वंराजविषयद्वेषवत्त्वंदुरात्मत्वंराज्यलोभाक्रांतत्वंदुर्बलत्वंक्षीणब
लवत्त्वम् रिपुकृताभिभवात् ७ ततइति हृतस्वाम्यः हृताधिपत्यः एकाकी असहायः ८ सतत्रेति मेधाइतिऋषिनाम वस्तुतोवसि ५
ष्ठस्यनामांतरमिदम् अस्याः सावतारायामहालक्ष्म्याअमानुषजन्मानिचरितैः सार्द्धैः स्तोत्रैर्वार्वेदवादिना कथितानिपुराशक्रवसिष्ठेन

CC-0. In Public Domain. Digitization by eGangotri

महात्मनास्वारोचिषेंतरेराज्ञेसुरथायमहात्मने समाधयेन्चवैश्यायप्रणतायचसीदतइतिलक्ष्मीतंत्रोक्तेः श्रीशास्तुरूपमास्थायपुराविप्रस्यमेधसः
स्वमायांज्ञापयामाससुरथायसमाधयेइत्यन्यत्रप्रशांतत्वंपरहिंसाविरहत्वंमुनिभिस्तच्छिष्यैश्चशोभितमित्यर्थः ९ तस्थाविति किंचित्कालं-
मितिकालाध्वनोरितिद्वितीयाइतश्चेतः अनियतदिग्देशम् मुनिवरेतिभागुरिसंबोधनम् आश्रमविशेषणंवा १० सोऽचिंतयदिति ममेतिष-

सतत्राश्रममद्राक्षीद्द्विजवर्यस्यमेधसः प्रशांतश्वापदाकीर्णंमुनिशिष्योपशोभितम् ९ तस्थौकिंचित्सकालंचमुनिना
तेनसत्कृतः इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्रमे १० सोऽचिंतयत्तदातत्रममत्वाकृष्टचेतनः मत्पूर्वैः पालितंपूर्वंमयाही
नंपुरंहितत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतःपाल्यतेनवा नजानेसप्रधानोमेशूरहस्तीसदामदः १२ ममवैरिवशंयातःकान्
भोगानुपलप्स्यते येममानुगतानित्यंप्रसादधनभोजनैः १३

ष्ठ्यंतप्रतिरूपकमव्ययम् तस्यभावोममत्वंममेदमित्यभिमानः तेना-
कृष्टानिवृत्तिमार्गादपकृष्टाचेतनाबुद्धिर्यस्यसः मत्पूर्वैः पूर्वजैरित्यर्थः हिपादपूरणेउत्तरश्लोकेनान्वयः मानसइतिपाठेपि आकृष्टंमानसंयस्य ११
मद्भृत्यैरिति तथापालनेहेतुरसद्वृत्तैरिति प्रधानैर्महामात्रैः सहितःसप्रधानः शूरहस्तीतिकर्मधारयः किमवस्थइतिनजानेइत्यन्वयः १२ ममेति
वशंपारतंत्र्यम् कान्कियंतः कीदृशान्वानजानेइत्यस्यानुषंगः अनुगताः सेवकाः सेवकत्वेहेतुः प्रसादेत्यादि प्रसादस्तुष्टिदानम् धनंमासिकादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰ स॰ ६

अ॰ १

वेतनम् भोजनंप्रतिदिनंदीयमानंतैः १३ अनु वृत्तावपिएतेएवहेतवः ध्रुवमितिवितर्के हामांधिगित्यध्याहारः असम्यगितिश्रियोर्थे तुरीयांशाधिको व्ययःसम्यग्व्ययंसततमितिसमस्तम् १४ दुःखेनेतिनिर्विसर्गपठंतिविसर्गलः कोशोमूलधनं अन्यदनुक्तमपि १५ तत्रेति विप्रेतिभागुरिसंबोधनं मेधार्थकतयाऽश्रमविशेषणंवा अभ्याशोनिकटेसवैश्यः भोइत्यामंत्रणे अत्र आश्रमे १६ सशोकइति इष्टवियोगानुचिंतनंशोकःदुःखानिबंधन

अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृताम् असम्यग्व्ययशीलैस्तैःकुर्वद्भिःसततंव्ययम् १४ संचितःसोतिदुःखेनक्षयंकोशोगमिष्यति एतच्चान्यच्चसततंचिंतयामासपार्थिवः १५ तत्रविप्राश्रमाभ्याशेवैश्यमेकंददर्शसः सपृष्टस्तेनकस्त्वंभोहेतुश्चागमनेत्रकः १६ सशोकइवकस्मात्त्वंदुर्मनाइवलक्ष्यसे इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितम् १७ प्रत्युवाचसतंवैश्यःप्रश्रयावनतोनृपम् वैश्यउवाच समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले १८

चिंतावसादोदुर्मनादौर्मनस्यंसशोकइवउपहतशरीरत्वात् दुर्मनाइवाकिंचास्वास्थ्यैर्यात् इत्याकर्ण्येति श्लोकःस्पष्टार्थः प्रणयोविश्रंभः १७ प्रश्रयोविनयः मार्कंडेयेनक्रूरथंप्रति ऋष्युक्तावनुदितायांभागुरेःकिंवैश्यउवाचेतिजिज्ञासामालक्ष्यमार्कंडेयआह वैश्यउवाच समाधिरिति १८

६

असाधुभिः पुत्रदारैर्धनलोभान्निरस्तः अधिक्षिप्तो भर्त्सित इति यावत् चादन्यैरपीत्यर्थः विहीनश्चेति दारैः पुत्रैर्मेधनमादाय गृहीत्वा धनैर्विहीन-श्च अंशस्यास्वदानात्तद्रहितः कृतोहम् १९ धनहीनत्वादेवाप्तैः सुहृद्भिः बंधुभिश्च निरस्तस्त्यक्तोहं वनमभि आगत इत्यन्वयः सोहमिति २० प्रवृत्ति वार्त्ता ताएवविवृणोति किंन्विति किंन्विति द्वयं विकल्पे तेषां पुत्रदारस्वजनानां गृहे दारापत्यादौ कथं ते किं विधास्ते वृत्तं व्यवहारः कृता इत्युपलक्षणं

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनम् १९ वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् २० प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम् २१ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः राजोवाच यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः तेषु किं भवतः स्नेहमनुबध्नाति मानसम् २२ वैश्य उवाच एवमेतद्यथा प्राह भवानस्मद्गतं वचः किं करोमि न बध्नाति मम निष्ठुरतां मनः २३ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः २४

२१ राजोवाच यैरिति धनैरिति भर्त्सनरूपे निरासे हेतुः किमिति प्रश्ने २२ वैश्य उवाच एवमिति अस्मद्गतमस्मदीयविषयकम् २३ यैरिति यैः पुत्रदारस्वजनैः पतिहार्दं स्वजनहार्दं च हार्दं स्नेहः तेष्वपि तथाविधेष्वपि मे मनः हार्द्येवेत्यन्वयः २४ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri

किमेतदिति तेषांदोषं जानन्नपियत् विगुणेष्वपिबंधुषुप्रेमप्रवणंचित्तंकरोमि तत्किमिति कस्माद्धेतोरेतन्नजानामिइत्यन्वयः २५ तेषामिति तन्नि-
मित्तंयन्मेनिश्वासादैकंजायते अप्रीतिषुप्रीतिरहितेषुअपितेषुयन्मेमनोनिष्ठुरंनतत्किंकरोमीत्यन्वयः २६ मार्कंडेयउवाच ततइति सहि-
तौमिथस्त्वेनसंगतौसमुपस्थितौसमुपसन्नौ २७ कृत्वेति यथान्यायंयथाशास्त्रंयथार्हंयथायोग्यंसंविदंसंभाषांउपविष्टौ अंतर्भावितण्यर्थ

किमेतन्नाभिजानामिजानन्नपिमहामते यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबंधुषु २५ तेषांकृतेमेनिश्वासाद्दौर्मनस्यंचजायते करोमि
किंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरम् २६ मार्कंडेयउवाच ततस्तौसहितौविप्रंतंमुनिंसमुपस्थितौ समाधिर्नामवैश्योसौसच
पार्थिवसत्तमः २७ कृत्वातुतौयथान्यायंयथार्हंतेनसंविदम् उपविष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थिवौ २८ राजोवाच भ-
गवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्वतत् दुःखाययन्मेमनसःस्वचित्तायत्ततांविना २९

स्तेनोपवेशितावित्यर्थः तेनेतिकर्तरितृतीयाका
श्चित्स्वपरविषयाः २८ राजोवाच भगवन्निति वदस्वेतियत्नार्थेआत्मनेपदम् यत्नेनवदेत्यर्थः एकंरहस्यंवदस्व तदाहमेमनसःसंकल्पात्मकस्यां
तःकरणस्यस्वचित्तेनिश्चयात्मके स्वस्वरूपेआयत्ततांनिरोधंविनादुःखाययदित्यन्वयः संकल्पविकल्पात्मकमेवमंतःकरणंननिश्चयात्मक- ७
मतोनमेतन्निर्णयेऽधिकारइतिभावः २९ दुःखहेतुत्वमाह ममत्वमिति राज्यस्येतिसम्बन्धसामान्यर्थस्यशेषत्वविवक्षायांषष्ठी राज्येइत्यर्थः तेष्वमदी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्त्वंजानतोपि ममयथा अज्ञस्य अज्ञस्येवराज्यादिषुममत्वम् एतत्किम् किंनिबंधनमित्यर्थः स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिच राज्यांगानिप्रकृ
तयः पौराणांश्रेणयोपिच एषुस्वाम्यंप्रधानम् ३० नाहमेवतथाअयमपीत्याह अयंचनिकृतइति निकृतःतिरस्कृतःउज्झितःत्यक्तः नीत्युपसर्गपूर्वा
त्कृञ्क्तः तथेतिसमुच्चये ३१ एवमितिविषयेराज्यपुत्रादौममत्वेनाकृष्टंविषयाधीनंकृतंमानससमंतःकरणंययोस्तौ ३२ तत्केनेति ज्ञानिनोर्विषयेदोष

ममत्वंगतराज्यस्यराज्यांगेष्वखिलेष्वपि जानतोपियथाज्ञस्यकिमेतन्मुनिसत्तम ३० अयंचनिकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः
स्वजनेनचसंत्यक्तस्तेषुहार्दीतथाप्यति ३१ एवमेषस्तथाहंचद्वावप्यत्यंतदुःखितौ दृष्टदोषेपिविषयेममत्वाकृष्टमानसौ ३२ त
त्केनैतन्महाभागयन्मोहोज्ञानिनोरपि ममास्यचभवत्येषाविवेकांधस्यमूढता ३३ ऋषिरुवाच ज्ञानमस्तिसमस्तस्यजं
तोर्विषयगोचरे विषयश्चमहाभागयातिचैवंपृथक्पृथक् ३४

वत्त्वज्ञानवतोरपिममास्यचेतिसर्वान्वयि उभयनिष्ठमोहस्यायुक्तत्वमा
ह यत्यतः एषाएतज्जातीयामूढता अविवेकांधस्य अविवेकवतः भवति नतुदोषज्ञानरूपविवेकवतइति आवयोःसायुक्तेतिभावः ३३ अत्रोत्तरमा
ह ऋषिरुवाच ज्ञानमिति ननुज्ञानमात्रस्यमोहवैयाधिकरण्यंतवाभिमतं ज्ञानविशेषस्यवानाद्यःसर्वस्यैवनिर्मोहत्वप्रसंगादित्याह ज्ञानमि
तिअंत्यस्तुतथापीत्यनेनखंडयिष्यते विषयिणोतिबध्नातीति विषयोबंधकः तद्रूपेगोचरेविषयेज्ञानंसर्वस्यजंतोरस्ति नचमोहाभावइत्याह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विषयश्चेति एवंवक्ष्यमाणप्रकारेण पृथक्पृथक्भिन्नप्रकारेणज्ञानविषयत्वंयातीत्यर्थः ३४ तदेवाह दिवांधाइति केषांचिदुलूकादीनांदिवाज्ञानाभावःके षांचित्काकादीनांरात्रौकेषांचित्किंतुलुकादीनांसर्वदातथातथातुल्यदृष्टयः अंधाअनंधाइत्यर्थः एवंचज्ञानमात्रस्यमोहवैयधिकरण्येदिनादौउलूकादी नांमोहोनस्यादितिभावः किंच राक्षसादीनांदिवारात्रौचविषयज्ञानवतांनकदाचिदपिमोहःस्यात् किंत्लुलुकादीनांसर्वदैवमोहप्रसंगइति तेषामपि किंचिद्विषयेमोहदर्शनात् एवंचनज्ञानमात्रस्यमोहवैयधिकरण्यम् नापिज्ञानाभावस्यमोहसमानाधिकरण्यमित्युक्तंभवति अत्रतथेतिरात्रिसमुच्च

दिवांधाःप्राणिनःकेचिद्रात्रावंधास्तथापरे केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ३५ ज्ञानिनोमनुजाःसत्यंकिंतुते नहिकेवलम् यतोहिज्ञानिनःसर्वेपशुपक्षिमृगादयः ३६ ज्ञानंचतन्मनुष्याणांयत्तेषांमृगपक्षिणाम् मनुष्याणांचयत्तेषांतु ल्यमन्यत्तथोभयोः ३७

ये ३५ ननुमनुष्याएवज्ञानित्वेनाभिमताइतिचेत्तत्राह ज्ञानिनइति मनुजाज्ञानिनइतितेमतंसत्यंपृच्छति तेकेवलं ज्ञानिनःज्ञानिनएवकिंतुस्वयमेववितर्क्योत्तरयाति नहिकिंत्वज्ञानसंवलितज्ञानिनइत्यर्थः एवंज्ञानेनज्ञानित्वाभिमानस्त्वयुक्तःयतःसर्वेपश्वादयोपिए वंसतिज्ञानिनएवस्युः हिंशुरिवार्थे भिन्नक्रमश्चपशुत्वेनैवसिद्धेमृगग्रहणंताद्विशेषप्रतिपत्त्यर्थमित्यर्थः३६ तमेवार्थंमनुष्याणांपश्वादिभिस्तुल्यत्वप्रतिपा ८ दनेनदृढयति ज्ञानंचेतियत् यादृशंतत्तादृशंमनुष्याणांचयत्तेषांमृगादीनामित्यर्थः अन्यदाहारभयमैथुननिद्रारूपमितिउभयोस्तुल्यंसाधारण मित्यर्थः ३७

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थक्रियासाम्यमपितयोरस्तीत्याह ज्ञानेपीति तद्भोजनेननास्माकंतृप्तिरितिज्ञानेसत्यपिपतगानितिनिरनुस्वारम् ३८ स्वशरीरापेक्षयाबहिरंगेष्वपि-
अतिप्रीतिरितितेषुमोहज्ञानयोःसामानाधिकरण्यमुपपाद्यमनुष्येष्वप्याह मानुषाइतिव्याघ्रशब्दःश्रेष्ठवाची मानुषाःलोभात् प्रत्युपकारलोभा-
त्सुतान्प्रतिसाभिलाषाः एतेसुताश्चतुनिश्चयेनप्रत्युपकारायनभवंति इदंकिंनपश्यसीत्यर्थः एवंपूर्वपूर्वव्यवहारंपश्यंतोपिअग्रेअग्रेपुनःसु-
ताभिलाषाइतिमोहज्ञानयोःसामानाधिकरण्यम् तेष्वपीतिभावः ३९ नन्वेवंविधव्यवहारदर्शिनांसंसाराद्विरक्तिःकुतोनेत्यतआह तथापीति

ज्ञानेपिसतिपश्यैतान्पतगान्शावचंचुषु कणमोक्षादृतान्मोहात्पीड्यमानानपिक्षुधा ३८ मानुषामनुजव्याघ्रसाभिलाषाःसु-
तान्प्रति लोभात्प्रत्युपकारायनन्वेतेकिंनपश्यसि ३९ तथापिममतावर्त्तेमोहगर्त्तेनिपातिताः महामायाप्रभावेनसंसारस्थिति-
कारिणः ४० तन्नात्रविस्मयःकार्योयोगनिद्राजगत्पतेः महामायाहरेश्चैतत्तयासंमोह्यतेजगत् ४१ एवंविधलोकव्यवहारसाक्षा-
त्कारोयद्यप्यस्तितथापीत्यर्थः महामायाप्रभावेनकथमिममतामभेदमितिबुद्धेरेव भ्रामकत्वादावर्त्तइवावर्त्तःसंसारेपुनःपुनरावर्त्तकः यद्वातादृशेमो-
हगर्त्तेनिपातिताःमानुषाःसंसारस्थितिं तामेवकुर्वंतिनतुततोविरज्यंतइत्यर्थःआवर्तोंभसांभ्रमः ४० ननुमायायाआश्चर्यंयंशक्तिरतआह त-
द्विति योगनिद्रातमःप्रधानाशक्तिः एतज्जगत्तयासंमोह्यतइत्यन्वयः जगत्पतित्वेनतस्यमोह्यकोटिबहिर्भावःसूचितः ४१ ☙ ☙ ☙

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवादृशानां संसारिणां का वार्त्ता अपक्वकषायाणां योगिनामपि सा मोहिकेत्याह ज्ञानिनामपीति आकृष्येत्यस्य विवेकादित्यादि मोहाय प्रयच्छति मोहवंतिकरोतीत्यर्थः एवंच स्वकर्त्तव्यसृष्टिवृद्धये एवंप्रभावा सेत्यर्थः ४२ विश्वं समस्तं नन्वेवं मुक्तिर्दुर्लभमेव स्यात्तत्राह सैषेति मोहकारणमपि सा उपासनादिभिः स्वार्पितनित्यकर्मादिभिश्च प्रसन्ना मोक्षाय वरदा भवति ४३ नन्वेकस्यैव वस्तुनः बंधमोक्षोभयहेतुतानुपपन्नेत्यत आह साविद्येति सर्वेश्वरस्येश्वरी ईश्वरत्वसंपादिका अतो न काचिदसंभावना तस्यामित्यर्थः किंच विद्याविद्योभयरूपत्वादपि नैतदसंगतिरित्याह परमा उत्तमपुरु-

ज्ञानिनामपि चेतांसि देवी भगवती हि सा बलादाकृष्य मोहाय महामाया प्रयच्छति ४२ तया विसृज्यते विश्वं त्रैलोक्यं सचराचरम्
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ४३ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ४४
राजोवाच भगवन्का हि सा देवी महामायेति यां भवान् ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ४५ यत्स्वभावा च
सा देवी यत्स्वरूपा यदुद्भवा तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ४६ षार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा सैव सनातनी अना-

द्यनंता च संसारबंधहेतुरविद्या च सैवेत्यर्थः एवं च चिज्जडप्रकृत्युभयात्मकत्वादुभयहेतुता उपपन्नेति भावः ४४ विशेषजिज्ञासया पुनः पृच्छति
राजोवाच भगवन्निति का किंजातीया कथं केन प्रकारेण अस्याः कर्म च किम् ४५ यत्स्वभावेत्यादिना स्वभावस्वरूपोत्पत्तिकारणप्रश्नत्रयं ब्रह्मवि- ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दांवरइत्यनेनऋषिप्रोक्तसर्वप्रकरणस्यश्रुतिशिरोनुजायित्वंस्फुटितम् ४६ उत्तरयति ऋषिरुवाच नित्यैवेति जगन्मूर्त्तिरित्यनेनजगदतिरिक्तमुख्य शरीराभावोध्वनितः जगदाश्रयभूताशक्तिरित्यर्थः केनजातिप्रश्नोत्तरंस्वरूपप्रश्नोत्तरंच तयासर्वमिदंततमित्यनेनस्वभावोत्तरम् सृष्टिस्वभावासेत्यर्थः ततंविस्तारितमित्यर्थः व्याप्तमितिच इत्यर्थकस्याचित्स्वभावाचेत्यर्थः सृष्टीत्युपलक्षणम् नित्येत्यनेनमुख्योत्पत्तेरभावात्कारणस्यस्फुतराम-भावेनगौण्योकारणोस्तीतिदर्शितम् तेउत्पत्तितत्करणप्रश्नोत्तरंतत्समुत्पत्तिःगौरीसा ममेत्यपादानस्यशेषत्वविवक्षायांषष्ठीमत्तइत्यर्थः ४७ दे

ऋषिरुवाच नित्यैवसाजगन्मूर्त्तिस्तयासर्वमिदंततम् तथापितत्समुत्पत्तिर्बहुधाश्रूयतांमम ४७ देवानांकार्यसिद्ध्यर्थ माविर्भवतिसायदा उत्पन्नेतितदालोकेसानित्याप्यभिधीयते ४८ योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते आस्तीर्यशे षमभजत्कल्पांतेभगवान्प्रभुः ४९

वानांकार्यसिद्ध्यर्थमिति सर्वकर्मप्रश्नोत्तरम् अनेनैवदेवदेवप्रार्थनया आविर्भावस्यध्वननात् कथमुत्प न्नेत्युत्तरमपि ४८ कथंदेवप्रार्थनया तत्कार्यसिद्ध्यर्थमवतारइतिजिज्ञासायांतांनिवर्त्तयितुंमोहकारणस्यैवचराज्ञः पृष्टत्वेनादौमोहिकायास्तमोगुणप्रधाना या अवतारंवक्तुमितिहासमाह योगनिद्रामिति कल्पांतेब्रह्मादि नांतेयोगनिद्रांतामसींशक्तिंभगवान् उत्पत्तिंप्रलयंचैव भूतानामागतिंगतिम् वेत्तिवि द्यामविद्यांचसवाच्योभगवानितिउक्तलक्षणः तेनभूतानांप्रलयकालंज्ञात्वासेयंपालनव्यवहारतिरोधानमंतरातदसंभवंमत्वास्वपालनव्यवहारतिरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धाधिकांतामसीशक्तिमभजत् पटेनैवतयात्मानमावृतवानित्यर्थः प्रभुरित्यनेनस्वेच्छयातदंगीकारः ननुतयाबलादस्यावरणमितिध्वनितम् अत
एवयोगनिद्रेत्युक्तम् इतरजननिद्रावत्मोहपारवश्यापादनीभवति लीलयासखीवल्लोचनपिधानमात्रंकरोति तदुक्तंहरिवंशे सखीसर्वसहस्ये
षामायाविष्णोःशरीरजा सैषानारायणसुखेस्थिताकमललोचनेति तेन अतः स्वस्वरूपज्ञानावरकत्वंप्रदर्शितम् ४९ तदेति मलोद्भूतावित्यनेना
नयोरितितामसत्वंसूचितमितरत्स्पष्टम् ५० तत्रब्रह्माक्वेत्यतआह सनाभिकमलेति प्रजापतिर्नियंतेतिब्रह्मणोविशेषणम् प्रसुप्तंत्यक्तपाल

तदाद्वावसुरौघोरौविख्यातौमधुकैटभौ विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ ५० सनाभिकमलेविष्णोःस्थितोब्रह्माप्र
जापतिः दृष्ट्वातावसुरौचोग्रौप्रसुप्तंचजनार्दनम् ५१ तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः विबोधनार्थायहरेर्हरिने
त्रकृतालयाम् ५२ विश्वेश्वरींजगद्धात्रींस्थितिसंहारकारिणीम् निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः ५३

नव्यवहारम् ५१

तुष्टावेति सएकाग्रमनवच्छिन्नंहृदयंयस्यसतादृशःस्थितः सन्नित्यर्थः हृदयास्थितइत्यतः शर्परेखरिवाविसर्गलोपः विबोधनार्थायपालनव्यवहा
रप्रवृत्त्यर्थंनेत्रेत्युपलक्षणम् सर्वांगस्थितत्वात्तस्याःलोकेनेत्रयोरेव भूयोनिद्राभिव्यक्तिमत्वात्नेत्रेत्युक्तिः ५२ योगनिद्रायाःमूलशक्त्यभेदंम १०
त्वाविशेषयति विश्वेश्वरीमिति तत्वमेवविविच्याह जगद्धात्रीमित्यादि धात्रींजननीम् अनेनजगदुत्पत्तिस्थितिलयकर्तृत्वब्रह्मलिंगंदर्शि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् अतुलामित्यंतानि विष्णुनिद्राविशेषणानितेजसः प्रभुरितिब्रह्मविशेषणम् तस्तुत्यत्वेनात्युत्कर्षोस्याध्वनितः विष्णुमोहकतयाइतरमोहकत्वम-
नाश्चर्यमित्यपिध्वनितम् आया तोर्थः वस्तुतोविष्णोरितिराहोः शिरइतिवत् षष्ठीविष्णुरूपांनिद्रामित्यर्थः ब्रह्मापिसर्वेश्वरः सर्वशक्तिमान्लो
कानुग्रहायस्वयंमोहितइवदुःखनिवृत्तयेइवभगवतींस्तौति ऋषेः सर्वज्ञादिचैषांसर्वात्मत्वंसर्वशक्तीनामुपक्रमेदर्शितमेवेति नकश्चिद्विरोधः
५३ कथंतुष्टावेत्यत आह ब्रह्मोवाच त्वमिति स्वाहादेवदानमंत्रोग्निपत्नीच स्वधापित्र्यदानमंत्रःपितृपत्नीच वषट्क्रियतेयत्रसवषट्कारोयज्ञः

ब्रह्मोवाच त्वंस्वाहात्वंस्व धात्वंहिवषट्कारःस्वरात्मिका स्वधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता ५४ अर्धमात्रा
स्थितानित्यायानुच्चार्याविशेषतः त्वमेवसात्वंसावित्रीत्वंदेवीजननीपरा ५५ त्वयैतद्धार्यतेसर्वंत्वयैतत्सृज्यतेजगत् त्वये
तत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा ५६

यज्ञदेवाह्वानमंत्रश्च स्वराःषोडशआदयस्तदात्मिकाचस्वधा
देवान्नं अक्षरेउपचयापचयपरिणामहीने आभ्यांसत्तामात्ररूपत्वम् त्रिधामात्रात्मिका ह्रस्वदीर्घप्लुतरूपा अर्द्धमात्राव्यंजनरूपा अविशेषक-
त्वाध्वनालिंगितया अनुच्चार्यत्वंतदालिंगितानुत्तयेतिबोध्यम् त्रिधेत्यतोविशेषत इत्यंतेनप्रणवरूपताचोक्ता मात्रात्रयमकारोकारमकारात्म
कम् तदूर्ध्वमर्द्धमात्रा तत्रमात्रात्रयम् जाग्रत्स्वप्नसुषुप्त्यभिमानिविश्वतैजसप्राज्ञाभिधेयम् अर्द्धमात्रातुवेदांतवाक्यार्थभूतनित्यमुक्ततुरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याभिधेया तदुक्तम् व्यक्तातुप्रथमामात्राद्वितीयाव्यक्तसंज्ञितामात्रातृतीयाचिच्छक्तिरर्द्धमात्रापरंपदमिति त्वमेवेति सात्वमेवेतिपूर्वान्वयित्वम् सावित्री तत्सवितुरितिऋक् तदधिष्ठात्री तद्वाच्यान्वेत्यर्थः हेदेवित्वंपराउत्कृष्टाजननी सर्वजनकत्वात् सर्ववाग्जननीपरान्त ५४ ५५ सर्वंजगत् त्वयैवधार्यते सर्वधारणशक्तिमतीत्वमेव अग्रेएतत्पदानि सर्वपरामर्शकानि अस्मिआत्मसात्करोषि तेश्चब्रह्मलिंगंदर्शितम् ५६ त्वयैतत्पाल्यते सृष्ट्यादिक्रियारूपापित्वमेवेत्याह विसृष्टाविति ससम्यंतानितत्कालत्वलाक्षणिकानि तथेति जगद्रूपेइत्यर्थके जगन्मयेइत्यत्र छांदस

विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने तथासंहृतिरूपांतेजगतोस्यजगन्मये ५७ महाविद्यामहामायामहामेधामहास्मृतिः महामोहाचभवतीमहादेवीमहासुरी ५८ प्रकृतिस्त्वंहिसर्वस्यगुणत्रयविभाविनी कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ५९

त्वातृडीबभावः ५७ महाविद्यामहावाक्यलक्षणा महामायासच्चिदानंदे आत्मनिसंसारत्वरूपानर्थावभासहेतुमूलविद्यामहामेधा भगवतः सर्वत्वशक्तिः महास्मृतिः विधेःसृष्ट्यनुकूलातीतुकल्पगतसकलवस्तुस्मृतिरूपादेवरूपाच महामोहेति संसारसमूलकारणरागरूपमोहस्वरूपा महादेवी सकलदेवशक्तिरूपा महासुरी हिरण्याक्षादिशक्तिरूपा ५८ सत्वरजस्तमोगुणत्रयेविभाव्यते या सर्वस्यजडवर्गस्यप्रकृतिःमूलंप्रधानतत्वाख्यंत्वमेव एतेनपरमाणुवादीनांमूलकारणत्वनिरासः कालरात्रिरिति ब्रह्मलयोपलक्षितामहारात्रिःप्र-

लयरात्रिः मोहरात्रिः ममतावर्त्तमोहगर्त्तपातिनीमहामायाख्यासंसृतिकर्त्री उक्तंच दंष्ट्राकरालकालाग्निरुद्रकल्पातिदारुणा मोहरात्रिर्मोहतनुर्जगत्स्व-
तेजगत्करीतिदारुणत्वंचास्याः ब्रह्मज्ञानातिरिक्तानिवर्त्यत्वेनमोहरात्रिर्निशाच अस्यास्तनुस्तमोद्वारानिशादिवसनाशिनीतिहरिवंशोक्तेः ५९ श्रीः सं
पत्लक्ष्मीः बीजंच ईश्वरी ऐश्वर्यशक्तिः कामराजबीजंच ह्रीः भुवनेशीबीजंच उभयत्राप्यनुनासिकलोपः छांदस्तः बोधोनिर्णयात्मकज्ञानल-
क्षणंस्वरूपंयस्यास्तादृशीबुद्धिरंतःकरणम् त्वमेवेत्यर्थः लज्जेति अंतःकरणवृत्तिविशेषः पुष्टिः रूपचयः तुष्टिरधिगतार्थादन्यत्रतुच्छत्वबुद्धिः

त्वंश्रीस्त्वमीश्वरी त्वंह्रीस्त्वंबुद्धिर्बोधलक्षणा लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिः क्षांतिरेवच ६० खड्गिनीशूलिनीघोरागदिनी
चक्रिणीतथा शंखिनीचापिनीबाणभुशुंडीपरिघायुधा ६१

शांतिः विषयेभ्यइंद्रियोपरमः क्षांतिः सत्यांशक्तौपरापराधसहिष्णुता
एवकारस्त्वमित्यनंतरेयोज्यः ६० घोराएकहस्तस्थशिरसाभयंकरी शंखिनीति बाणभुशुंडीपरिघश्चायुधानियस्याःसा अनेनास्याःकाल्याःदशभु
जात्वंसूचितम् तदुक्तंवैकृतिकरहस्ये योगनिद्राहरेरुक्तामहाकालीतमोगुणा मधुकैटभनाशार्थयांतुष्टावांबुजासनः दशवक्त्रादशभुजादश
पादांजनप्रभा विशालयाराजमानात्रिंशल्लोचनमालया स्फुरद्दशनदंष्ट्रासाभीमरूपापिभूमिप रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रियाम्
खड्गबाणगदाशूलशंखचक्रभुशुंडिभृत् परिघंकार्मुकंशीर्षंनिश्च्योतद्रुधिरंदधौ एषासावैष्णवीमायामहाकालीदुरत्यया आराधितावशी

स·स· कुर्यात्पूजाकर्त्तुरीश्वराचरमिति उड्डीयोड्डीयच प्रध्यनदंती दशकर्त्तिका क्रमते वानतांगीवासाभुसुंडी निगद्यते परिघोलोहबन्धोलगुडः ६१ सौम्या अक्रूरा अ·
१२ भक्तेषु असौम्यतरा देत्येषु अशेषसौम्येभ्यः सकलसुंदरेभ्यस्तु अतिसुंदरीत्यर्थः परेति इदमुपलक्षणं पश्यंतीमध्यमावैखरीणांपराबीज रूपाच १
पराणांउत्कृष्टानांपरमाप्रधानात्वमेवयतस्त्वंपरमेश्वरी ६२ सत्ब्रह्मवर्गः असत्जडवर्गः तस्यसर्वस्ययाशक्तिःसायदात्वंतदात्वंकथंस्तव्येत्यर्थःप
दपदार्थस्तोवस्तुत्यतच्छक्तिस्तुतीनांत्वत्तोन्यत्वाभाववद्भेदनिबंधनात्स्तुतिः कथंस्यादितिभावः ६३ स्तुत्यत्वाभावमेवाह पुनःयया ब्रह्मविष्णुरु

सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी परापराणांपरमात्वमेवपरमेश्वरी ६२ यच्चकिंचित्क्वचिद्वस्तुसदसद्वाखिलात्मि
के तस्यसर्वस्ययाशक्तिः सात्वंकिंस्तूयसेतदा ६३ ययात्वयाजगत्स्रष्टाजगत्पातात्तियोजगत् सोपिनिद्रावशंनीतः कस्त्वां
स्तोतुमिहेश्वरः ६४ विष्णुःशरीरग्रहणमहमीशानएवच कारितास्तेयतोतस्त्वांकस्तोतुंशक्तिमान्भवेत् ६५ सात्वमित्थंप्रभा
वैःस्वैरुदारैर्देविसंस्तुता मोहयैतौदुराधर्षावसुरौमधुकैटभौ ६६

द्रात्मनाजगत्सृष्टिस्थितिलयकर्त्तापिनिद्रावशंनीतः प्रापितइत्यर्थः पा
तिपालकः अत्तिस्वस्मिन्लयंप्रापयति तमोगुणप्रधानमायासंबंधादेवभगवतः सर्वोपसंहारेणस्वस्वरूपेवस्थानमितिभावः ६४ अहंब्रह्माशरीरग्रहणंका १२
रिताः केवलमाधिकत्वाच्छारीराणामितिभावः ६५ सानंतरोक्तस्वभावात्वमित्थमेवंविधैरुदारैरसाधारणैःस्वैःप्रभावैर्माहात्म्यैःसंस्तुता एतौमोह

CC-0. In Public Domain. Digitization by eGangotri

यइत्यर्थः मोहंश्च भगवंतं प्रतिवरदातृरूपः ६६ प्रबोधंजागरणंपालनोद्यमरूपम् हंतुंबोधःप्रवृत्तिः प्रवृत्तिस्वभावत्वात्तवेतिभावः ब्रह्मणःस्रष्टृत्वेनविषद्रक्षो–
पीतिन्यायेननहननेप्रवृत्तिः विष्णूपरियद्यपिपालनप्रधानंतथापिसतांपालनस्यदुष्टहननंविनाऽसंभवात् पालनानुगुणेनैवकदाचिद्धंतृत्वमपितस्यनानुपपन्न
म् एवंचभगवत्कृतेपिमधुकैटभवधेमाणवककर्तृकाध्ययने आचार्येणकार्यमाणेकरीषाग्नेरिवतत्सामर्थ्याचरणेनभगवतस्तद्वधविषयकप्रवृत्तिसंपादकत्वेन

प्रबोधंचजगत्स्वामीनीयतामच्युतोलघु बोधश्चक्रियतामस्यहंतुमेतौमहासुरौ ६७ ऋषिरुवाच एवंस्तुतातदादेवीतामसीत
त्रवेधसा विष्णोःप्रबोधनार्थायनिहंतुंमधुकैटभौ ६८ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्म
नः ६९ उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्दनः एकार्णवेहिशयनात्ततःसददृशेचतौ ७० मधुकैटभौदुरात्मानावतिवीर्यपराक्रमौ क्रो
धरक्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ ७१ प्रेरकतयातद्धंतृत्वंदेव्या अपीतिबोध्यम् ६७ ऋषिरुवाच एवंस्तुतेति तामसी आवरकत्वेनतमःप्रधा
नाइयंशक्तिःमधुकैटभौएतौनिहंतुंचेत्यर्थः ६८ नेत्रास्येति विष्णोरित्यादि उरोवक्षः शप्यंगत्वेपिनैकवच्छांदसत्वात् अव्यक्तादीश्वरात्जन्मप्रादुर्भावोय-
स्यतस्यब्रह्मणःदर्शनेचक्षुर्विषयेतस्थावित्यन्वयः ६९ उत्तस्थौचेति तयामुक्तस्त्यक्तइत्यर्थः अहिशयनात्शेषशयनात् सःतौददृशे अर्थात्तावपितंददृशातें-
इतिकर्मव्यतिहारे आत्मनेपदम् ७० तौविशेषयति मधुकैटभाविति आद्यपादेनवाक्षरत्वंछांदसत्वात् वीर्यमुत्साहः पराक्रमः शक्त्यतिशयः अत्तुंग्रसितुं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनेनप्रवृद्धस्यतमसोभिभावकत्वंसूचितम् ७१ ७२ तावपीति वरइष्टोर्थःव्रियतांगृह्यताम् ७३ श्रीभगवानुवाच भवेतामिति यत्रयदितदेवपूरणीयंयदि
तुष्टौतदातर्हिमेवध्यौभवेतामित्यन्वयः वृतमिति नपुंसकेभावेक्तः ममेतिकर्तुःशेषत्वविवक्षायांषष्ठी ७४ ऋषिरुवाच वंचिताभ्यामिति तदातस्मिन्समयेइतिएवं
वरप्रार्थनयावंचिताभ्यांभगवतीकृतमोहवशात् सर्वंजगत् आपोमयंविलोक्यताभ्यांभगवान्गदितइत्यर्थः आपोमयइत्यत्रापशब्दसमानादात् प्रकृतिकारूनंता

समुत्थायततस्ताभ्यांयुयुधेभगवान्हरिः पंचवर्षसहस्राणिबाहुप्रहरणोविभुः ७२ तावप्यतिबलोन्मत्तौमहामायाविमोहितौ उक्त
वंतौवरोस्मत्तोव्रियतामितिकेशवम् ७३ श्रीभगवानुवाच भवेतामद्यमेतुष्टौममवध्यावुभावपि किमन्येनवरेणात्रएतावद्धि
वृतंमम ७४ ऋषिरुवाच वंचिताभ्यामितितदासर्वमापोमयंजगत् विलोक्यताभ्यांगदितोभगवान्कमलेक्षणः ७५ आवांजहि
नयत्रोर्वीसलिलेनपरिप्लुता ७६ ऋषिरुवाच तथेत्युक्त्वाभगवताशंखचक्रगदाभृता कृत्वाचक्रेणवैछिन्नेजघनेशिरसीतयोः
७७

यशब्दान्मयट् आपोमयमिदंसर्वमापोमूर्तिःशरीरिणामितिवत् ७५ किंगदितंतत्राह आवामिति नयत्रोर्वीयत्रवानसलिलेनपरिप्लुतातत्रावांजहीत्यर्थः ७६ ऋषि
रुवाच तथेति पूर्ववर्त्तमानकथाभिप्रायेणऋषिरुवाचेत्युक्तिः अत्रभूयउपहाराभिप्रायेण वस्तुतःसप्तशतीत्वव्यवहारप्रयोजकसप्तशतमंत्रसंख्यापूरणीयत १३
याउक्तिःयथाचैतत्तथाकात्यायनीसंमतिपूर्वकंसर्वत्रैउपपादयिष्यामः तत्रनयत्रोर्वीत्येवंसंपादयन् तयोःशिरसीजघनेउपस्थादूर्ध्वंनाभेरधोभागेकृत्वाचक्रेण
छिन्नवान् ७७

CC-0. In Public Domain. Digitization by eGangotri

एतेन भगवद्देहस्य शुद्धसात्विकत्वेनापांचभौतिकतया जयन्नेमारणेपि सलिलप्लुतत्वाभावविशिष्टोर्व्यां प्रार्थितस्य वधस्याधृतिरिति प्रशस्तमुपहरति एवमेषेति समुत्पन्ना प्रादु-
र्भूता अस्या देव्या इति अधिकरणे षष्ठी अस्याः तामस्याः मूलभूतायाः त्रिगुणा महालक्ष्मीः तस्या इत्यर्थः अत एव तु शब्दसंगतिः भूयः प्रभावं पुनः प्रादुर्भावं भूय इत्युक्तिस्तु ता
मस्यास्तस्या अंशाभेदात् पूर्वोक्तप्रभावोपि तस्या एवेत्यवनयितुं यद्वा प्राधानिकरहस्योक्त आद्यन्तचतुर्भुजप्रादुर्भावापेक्षया मध्यमचरित्रवक्ष्यमाणाष्टादशभुजाप्रादुर्भावस्य पु

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ७८ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी
माहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः १ ऋषिरुवाच देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा महिषेऽसुराणामधिपे देवानां च पु
रंदरे १ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् जित्वा च सकलान्देवानिंद्रोऽभून्महिषासुरः २

नस्त्वमादाय तदुक्तिः तदुक्तं लक्ष्मीतंत्रे योगनिद्रा हरेरुक्ता या सा देवी दुरत्यया महाकाल्यास्तनुं विद्धि तां मां देवीं सनातनीम् मधुकैटभनाशार्थमहितोच्चतदा तया
जघ्नाते वरलाभेन देवदेवेन विष्णुना एषा सा वैष्णवी माया महाकाली दुरत्यया स्तुत्या वशीकृता कुर्यात् दिशस्तोत्तुश्चराचरमिति स्तुता विश्वेश्वर्यादिसूक्तरूपया
तदुक्तम् विश्वेश्वर्यादिकं सूक्तं दृष्टं तद्ब्रह्मणा तदा स्तुतये योगनिद्रायाः समदेव्याः पुरंदरः अस्या देव्याः समुत्पत्तिश्चरितं स्तोत्रमित्यपि हिताय सर्वभूतानां धार्यते ब्रह्मवा
दिभिरिति विश्वेश्वर्यादिसूक्तमेव रात्रिसूक्तमिति व्यवह्रियते कालरात्रिर्महारात्रिरिति तत्र रात्रिपदाभ्यासादिति बोध्यम् विश्वेश्वरिपदेनोपक्रमात् विश्वेश्वरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सूक्ष्ममपि ७८ समासोसावर्णिः कः प्रकाशोयत्रतादृशेमन्वंतरेतद्वर्णनमित्यर्थः इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतसप्तशतीव्याख्यानेप्रथमोऽध्यायः १ भूयः शृण्वित्युक्तंतत्रेतिहासमाह ऋषिरुवाच देवासुरमिति असुराणामधिपेमहिषेचसति पुनर्देवानामधिपेपुरंदरे इंद्रेसतिदेवा असुराश्च प्रहर्त्तारोयत्रतादृशंयुद्धमब्दशतमासीदित्यर्थः देवासुरमित्यत्रार्शआदित्वादच् रंभासुरतपस्ययाप्रसन्नस्यशिवस्यांशोयंतत्सुतोमहिषः सचतपसा देवीनिकटेममसायुज्यंभवत्विति वरंप्रार्थितवानितिकालीपुराणेस्पष्टम् १ तत्रेति इंद्रःसुरराट् २ ततइति पद्मयोनिंब्रह्माणंप्रजापतिमिति तस्यविशेषणम् ब्रह्मणः प्रजास्रष्टृत्वेन सि

ततः पराजितादेवाः पद्मयोनिंप्रजापतिम् पुरस्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ ३ यथावृत्तंतयोस्तद्वन्महिषासुरचेष्टितम् त्रिदशाःकथयामासुर्देवाभिभवविस्तरम् ४ सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच अन्येषांचाधिकारान्सस्वयमेवाधितिष्ठति ५ स्वर्गान्निराकृताः सर्वेतेनदेवगणाभुवि विचरंतियथामर्त्यामहिषेणदुरात्मना ६ एतद्वःकथितंसर्वममरारिविचेष्टितम् शरणंचप्रपन्नास्मोवधस्तस्यविचिंत्यताम् ७

द्धसंबंधत्वात् आदौदेवानांतत्रगमनम् ततः पालनसंहारयोः शिवविष्ण्वोरेवाधिकारात्सब्रह्माणंतयोःसमीपेगमनम् ३ यथावृत्तमिति देवानामभिभवस्यविस्तरः प्रपंचोयत्रेतिचेष्टितविशेषणम् ४ सूर्येंद्रेति सस्वयमित्यत्र एतत्तदोरितिसुलोपः स्वयमितिहिसकारपाठस्तु अनचिचेतिद्वित्वेनबोध्यः ५ स्वर्गादिति निराकृताःनिःसारिताः ६ एतद्वइति वः इतिद्वयोर्बहुवचनम् गौरवात्चपरंशरणंप्रपन्नाः आगतास्मोभवामः ७ ५ ५ ५ १४

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति भ्रुवोः कुटी कौटिल्यं तेन कुटिले भुग्ने आननेययोस्तौ भ्रूशब्दस्य पृषोदरादित्वात् ह्रस्वः कुटेरिक् प्रत्ययांतात् कृदिकारादिति ङीष् ब्रह्मणः कोपे पि रज आधिक्ये न शिवस्य तमोगुण प्राधान्येन कोपे पि तमोगुणस्याधिक्येन विष्णु कोपस्य पालकमूलत्वेन सत्वाधिक्यवत्तया त्रिगुणा एषा इति ध्वन्यते अत एवोक्तं वैकृतिक रहस्ये सर्वदेव शरीरेभ्यो याविर्भूतामितप्रभा त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी तत्रापि रजः सत्वयोराधिक्यं देवानां रजः सत्वमयत्वात् ८ तत इति द्वितीयं तत इति प्रसिद्धा

इत्थं निशम्य देवानां वचांसि मधुसूदनः चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ ८ ततोतिकोपपूर्णस्य चक्रिणो वदनात्ततः निश्चक्राम मह
त्तेजो ब्रह्मणः शंकरस्य च ९ अन्येषां चैव देवानां शक्रादीनां शरीरतः निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत १० अतीव तेजसः कूटं ज्वलं
तमिव पर्वतम् ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरम् ११ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् एकस्थं तदभून्नारी व्याप्तलोकत्रयं
त्विषा १२ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम् याम्येन चाभवन्केशा बाहवो विष्णुतेजसा १३ दित्यर्थकं वदनादित्यस्य विशेषणम् ९ अन्ये-
षां चेति कुपितानामिति विशेषः यत्तेजः निर्गतं तच्च ब्रह्मादीनां तेजश्च ऐक्यं एकत्वं समगच्छत छांदसस्तङ् १० अतीवेति तत्रेत्यस्य काले इति देशे इति वा विशेषः
११ अतुलमिति तत् ततः तत्र पुराणांतर प्रसिद्धे कात्यायनाश्रमे तत्तेजः एकस्थं सन्नारी अभूत् त्विषा दीप्त्या १२ तेजोविभागेनांग विभागमाह यदिति शंभोः श्वेतां
गतया तत्तेज मायातं मुखं श्वेतमित्यर्थः विष्णोर्नीलवर्णतया बाहवो द्वादशनीलाः १३ ७ ७ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰ स॰ सौम्येनेति सोमसंबंधिनेत्यर्थः छांदसत्वादिदमर्थेपियण् अतएवश्वेतस्तनी ऐंद्रेणमध्यंरक्तंजंघोरूइत्यत्र पूर्वनिपातेकवद्भावविधेरनित्यात्तद्दोषः भिन्नेपदेवा अ॰
१५ जंघेऊरूत्ववारुणेनेत्यन्वयः भुवः पृथ्व्याः नितंबः कटिपश्चाद्भागः १४ ब्रह्मणइति अतएवपादौरक्तौ एतदुक्तंवैकृतिकरहस्ये श्वेताननानीलभुजासुश्वेतस्तन २
मंडला रक्तमध्यारक्तपादानीलजंघोरूरुन्मदा सुचित्रजघना चित्रमाल्यांबरविभूषणा चित्रानुलेपनाकांतिरूपसौभाग्यशालिनीति एवंचरूपेणापिविग्रु

सौम्येनस्तनयोर्युग्मंमध्यमैंद्रेणचाभवत् वारुणेनचजंघोरूनितंबस्तेजसाभुवः १४ ब्रह्मणस्तेजसापादौतदंगुल्योर्कतेजसा वसूनांच
करांगुल्यः कौबेरेणचनासिका १५ तस्यास्तुदंताःसंभूताःप्राजापत्येनतेजसा नयनत्रितयंजज्ञेतथापावकतेजसा १६ भ्रुवौचसंध्य
योस्तेजःश्रवणावनिलस्यच अन्येषांचैवदेवानांसंभवस्तेजसांशिवा १७ ततःसमस्तदेवानांतेजोराशिसमुद्भवाम् तांविलोक्य
मुदंप्रापुरमरामहिषार्दिताः १८

णात्वंसूचितम् स्वस्यचित्तत्वात्चित्रमाल्यादिधारणम् वसूनामित्यस्यतेजसेतिशेषः एवमन्यत्रापि १५ तस्याइति
प्राजापत्येनदक्षादितेजसा तेनब्रह्मणःतेजसापादावित्यनेननविरोधः पावकोग्निः १६ भ्रुवौचेति संध्ययोस्तेजः भ्रुवावभूतामित्यन्वयः करणस्यैवकर्तृत्व
विवक्षापुंनपुंसकयोः कर्णःश्रवणः श्रवणंश्रुताविति हेममाली अन्येषांचदेवानांसंबंधितेजसांशिवाचंडीसंभवः एकीभावः कार्यैवेत्यर्थः एवंप्रसिद्धो १७ १५
ततइति तेजोराशिसमुद्भवामितिसापेक्षत्वेविरामकत्वात्समासः मुदंहर्षम् १८

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मादिषुविद्यमानस्तत्तेजसैव भगवती आविर्भूतेतिताप्तर्यम् एवमायुधदानमपिबोध्यं शूलमिति विनिष्कृष्य आकृष्येत्यर्थः समुत्पाद्यजनयित्वेत्यर्थः पदेर्ण्यंतस्यरूपम् एवमग्रेपि अत्रचक्रंचेतिचाददात् १९ शंखंचेति वरुणाच्छंखस्य अग्नेःशक्तेः वायोश्चापबाणयोर्लाभइत्यर्थः शंखंचेति चकारोवक्ष्यमाणपाशसमुच्चयेइत्यर्थेवा २० वज्रमिति देयभेदादेकस्यैवदातुः क्वचित्पुनरुपादानेपिनदोषः २१ कालेति उत्पाद्येतिशेषः प्रजानांपतिर्ब्रह्मा अक्षमालांकमडलुंचददावित्यन्वयः

शूलंशूलाद्विनिष्कृष्यददौतस्यैपिनाकधृक् चक्रंचदत्तवान्कृष्णःसमुत्पाद्यस्वचक्रतः १९ शंखंचवरुणःशक्तिंददौतस्यैहुताशनः मारुतोदत्तवांश्चापंबाणपूर्णौतथेषुधी २० वज्रमिंद्रःसमुत्पाद्यकुलिशादमराधिपः ददौतस्यैसहस्राक्षोघंटामैरावताद्गजात् २१ कालदंडाद्यमोदंडंपाशंचांबुपतिर्ददौ प्रजापतिश्चाक्षमालांददौब्रह्माकमंडलुम् २२ समस्तरोमकूपेषुनिजरश्मीन्दिवाकरः कालश्चदत्तवान्खड्गंतस्याश्चर्मचनिर्मलम् २३ क्षीरोदश्चामलंहारमजरेचतथांबरे चूडामणिंतथादिव्यंकुंडलेकटकानिच २४

ब्रह्माक्षमालांकमंडलुमितिवामनपुराणात् २२ समस्तेति कालस्तदभिमानिनीदेवता तस्याइतिसंबंधत्वेनविवक्षायांषष्ठी २३ क्षीरोदश्चेति अंगुलीयरत्नदानांतंक्षीरोदःकर्त्ता २४ विश्वकर्मणः परशुअस्त्रकवचदातृत्वं चूडामण्यादिकवचदानांतंविश्वकर्मकर्तृत्वमित्यन्वयः तन्मते अर्द्धचंद्रशब्देनतदाकारोललाटभूषणविशेषः २५ २६ अम्लानेत्यारभ्यपंकजदानांतंजलधिः कर्त्ता तत्रपंकजंहस्तेरत्नासिंहयोर्दानेहिमवानददिति दद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानेइत्यस्यलङि्रूपम् छांदसत्वात्परस्मैपदम् २७ २८ ददाविति अनेनाष्टादशभुजासहस्रभुजाचैषेतिसूचितम् तदुक्तंवैकृतिकरहस्ये अष्टादशभुजापूज्यासासहस्र
स्रभुजासती अष्टादशभुजधार्याणांविशिष्योक्तेः २९ सामान्यतः अन्यैरपिदेवैरायुधैरित्युक्तेश्चेतिभावः आयुधान्यत्रवक्ष्यंते दक्षिणाधःकरक्रमात् अक्षमालाच
कमलंबाणोसिःकुलिशंगदा चक्रंत्रिशूलंपरशुःशंखोघंटाचपाशकः शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः अलंकृतभुजामेभिरायुधैः कमलासनाम् सर्वदेवम
यीमीशांमहालक्ष्मीमिमांनृप पूजयन्सर्वलोकानांसदेवानांप्रभुर्भवेदिति एवंस्वरूपायुधैरस्याब्राह्मीत्वंवैष्णवीत्वंचत्रिगुणात्वंच सर्वमूलभूतशक्तेरयंमादु

अर्द्धचंद्रंतथादिव्यंकेयूरान्सर्वबाहुषु नूपुरौविमलौतद्वद्ग्रैवेयकमनुत्तमम् २५ अंगुलीयकरत्नानिसमस्तास्वंगुलीषुच विश्वकर्माद
दौतस्यैपरशुंचातिनिर्मलम् २६ अस्त्राण्यनेकरूपाणितथाभेद्यंचदंशनम् अम्लानपंकजांमालांशिरस्युरसिचापराम् २७ अददज्ज
लधिस्तस्यैपंकजंचातिशोभनम् हिमवान्वाहनंसिंहंरत्नानिविविधानिच २८ ददावशून्यंसुरयापानपात्रंधनाधिपः शेषश्चसर्व
नागेशोमहामणिविभूषितम् २९

र्भावस्तत्समानइतिचसूचितम् यद्यप्यत्रब्रह्मादीनामिंद्रादीनांचशरीरान्निष्क्रांततेजोदेवीविग्रहरूपेणाभिव्यक्त
मासीत् आयुधानिचदेवैःस्वस्वशूलादिभ्योविनिर्गमय्यदत्तानिइत्येवोक्तम् तथापिदेवीशक्त्यंशाएवतत्तद्देवपालनीयैकदेशपालनशक्तित्वेनयेदेव्यानिवेशिता १६
स्तेएवमहिषवधेनसर्वलोकरक्षणायपुनरेकीभूयदेवीरूपंप्राप्ताः एवंतदायुधाःनिजशक्त्यंशाअपीतिबोध्यम् अहंविभूत्याबहुभिरित्यादितृतीयचरितगत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनसमूहात् लक्ष्मीतंत्रेऽपिशक्रंप्रतिलक्ष्मीवचनानि महालक्ष्मीरहंशक्रपुनःस्वायंभुवेंतरे हितायसर्वदेवानांजातामहिषमर्द्दिनी मदीयाःशक्तिलेशायेतत्तद्देवशरीरगाः धृतंमयातैःसंभूतैरूपंपरमशोभनम् आयुधानिचदेवानांयानियानिसुरेश्वर मत्कृत्यस्तदाकाराण्यायुधानिममाभवन्निति ३० संमानितेति साट्टहासमितिनादक्रियाविशेषणम् साट्टहासोत्यर्थहासः नभइतिभुवर्लोकलक्षणम् ३१ अमायतेति मामानेदैवादिकत्यतानांनञ्समासः तेन असंभवतेत्यर्थः अ

नागहारंददौतस्यैधत्तेयःपृथिवीमिमां अन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा ३० संमानिताननादोच्चैःसाट्टहासंमुहुर्मुहुः तस्याना
देनघोरेणकृत्स्नमापूरितंनभः ३१ अमायतातिमहताप्रतिशब्दोमहानभूत् चुक्षुभुःसकलालोकाःसमुद्राश्चचकंपिरे ३२ चचा
लवसुधाचेलुःसकलाश्चमहीधराः जयेतिदेवाश्चमुदातामूचुःसिंहवाहिनीम् ३३ तुष्टुवुर्मुनयश्चैनांभक्तिनम्रात्ममूर्त्तयः दृष्ट्वास
मस्तंसंक्षुब्धंत्रैलोक्यममरारयः ३४ सन्नद्धाखिलसैन्यास्तेसमुत्तस्थुरुदायुधाः आःकिमेतदितिक्रोधादाभाष्यमहिषासुरः ३५

स्यनभसीत्यादि ३२ चचालेति महीधराःपर्वताः ३३ तुष्टुवुरिति भक्त्यानम्रः अपकृष्टत्वज्ञानवानात्माशरीरंनम्रंयेषांसंक्षुब्धं आकुलंयातमितिशेषःअमरा
रयश्चसंक्षुब्धाइत्यर्थः ३४ सन्नद्धेति युद्धायसज्जानि धृतसन्नाहानि अखिलसैन्यानियेषां आःइतिक्रोधाविष्कारे अनेनचमहिषासुरस्यतमोमयत्वमुक्तम्
दूताप्रेरणात् कस्यचित्सैनिकस्यप्रथमप्रेषणाच्च स्वयमेवक्रोधजमाह नप्रथममेवयुद्धार्थंधावमानाच्च रूपेणापितमोमयत्वाच्च अतएवरजःसत्वाधिकदेव्या
स्तद्वत्त्वम् ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अभ्यधावतेति स्वरितेत् ३६ देवींविशेषयतिसार्द्धेन पादेति धनुषोज्यायाश्चनिस्वनेन धनुषः कैंकारःज्यायाःटंकारः ३७ दिशइति समंतात्सर्वतः ३८ शस्त्रास्त्रै-
रिति शस्त्रंकेवलंमंत्रस्तद्युक्तमस्त्रम् ३९ युयुधेइति अन्यैःप्रधानदैत्यैः सहितः चामराख्यः चिक्षुराख्यश्च रथनागहयपादातरूपचतुरंगसेनायुतोयुयुधेइत्यर्थः
४० अयुध्यतेति अयुतानामितिनियुतैरितिच तद्गतबहुत्वविवक्षयाबहुवचनम् एवमग्रेपि एकंदशशतंचैवसहस्रमयुतंतथा लक्षंचनियुतंचैवकोटिरर्बुद

अभ्यधावतंतंशब्दमशेषैरसुरैर्वृतः सददर्शततोदेवींव्याप्तलोकत्रयांत्विषा ३६ पादाक्रांत्यानतभुवंकिरीटोल्लिखितांबराम् क्षोभिता
शेषपातालांधनुर्ज्यानिःस्वनेनताम् ३७ दिशोभुजसहस्रेणसमंताद्व्याप्यसंस्थिताम् ततःप्रववृतेयुद्धंतयादेव्यासुरद्विषाम् ३८
शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगंतरम् महिषासुरसेनानीश्चिक्षुराख्योमहासुरः ३९ युयुधेचामरश्चान्यैश्चतुरंगबलान्वितः
रथानामयुतैःषड्भिरुदग्राख्योमहासुरः ४० अयुध्यतायुतानांचसहस्रेणमहाहनुः पंचाशद्भिश्चनियुतैरसिलोमामहासुरः ४१ अ
युतानांशतैःषड्भिर्बाष्कलोयुयुधेरणे गजवाजिसहस्रौघैरनेकैःपरिवारितः ४२

मेवञ्च वृंदंखर्वोनिखर्वश्च शंखपद्मौचसागरः अंत्यम-
ध्यपरार्द्धञ्चदशवृद्ध्यायथाक्रममितिब्रह्मांडे ४१ अयुतानामिति गजवाजीत्यतोबिडालसैन्यम् ४२ वृतइति अथतेषांवधानंतरम् अयुतानांपंचा-
शद्भिरयुतैः परिवारितोबिडालनामातत्रसंयुगेयुयुधेइत्युत्तरश्लोकेनान्वयः दुर्धरोदुर्मुखश्चैवबिडालनयनस्तथेति वामनपुराणेपि बिडालनयन

CC-0. In Public Domain. Digitization by eGangotri

शब्दोयोगरूढोनकेवलंयौगिकः प्रकृ तेत्त्वनामैकदेशेनामग्रहणं अतएवबिडालस्यासिनेतिवक्ष्यमाणंसंगच्छते ४३ युयुधेइतिस्पष्टम् ४४ युयुधुरिति अस्य
पूर्वेणान्वयः अनुदात्तेत्वलक्षणतङोनित्यत्वात्परस्मैपदम् उत्तरार्द्धमुत्तरान्वयि ४५ हयानांचेति रथदंतिहयानांप्रत्येकंकोटिकोटिसहस्रसंख्यायुतोमहि

वृतोरथानांकोट्याचयुद्धेतस्मिन्नयुध्यत बिडालाख्योयुतानांचपंचाशद्भिरथायुतैः ४३ युयुधेसंयुगेतत्ररथानांपरिवारितः अन्येच
तत्रायुतशोरथनागहयैर्वृताः ४४ युयुधुःसंयुगेदेव्यासहतत्रमहासुराः कोटिकोटिसहस्रैस्तुरथानांदंतिनांतथा ४५ हयानांचवृतो
युद्धेतत्राभून्महिषासुरः तोमरैर्भिंदिपालैश्चशक्तिभिर्मुसलैस्तथा ४६ युयुधुःसंयुगेदेव्याखड्गैःपरशुपट्टिशैः केचिच्चचिक्षिपुःश
क्तीःकेचित्पाशांस्तथापरे ४७ देवींखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमुः सापिदेवीततस्तानिशस्त्राण्यस्त्राणिचंडिका ४८ लीलयैवप्रचि
च्छेदनिजशस्त्रास्त्रवर्षिणी अनायासाननादेवीस्तूयमानासुरर्षिभिः ४९ मुमोचासुरदेहेषुशस्त्राण्यस्त्राणिचेश्वरी सोपिक्रुद्धोधु
तसटोदेव्यावाहनकेसरी ५० चचारासुरसैन्येषुवनेष्विवहुताशनः निःश्वासान्मुमुचेयांश्चयुध्यमानारणेंबिका ५१

षस्तत्राभूदित्यर्थः उत्तरान्वयिभिंदिइतिदंत्यांतः ४६ युयुधुरितिकेचिद्दैत्याइतिशेषः अपरेइत्युत्तरान्वयि ४७ देवीमिति अपरेतुतेप्रसिद्धदैत्याइत्यर्थः प्रोपाभ्या
मित्यात्मनेपदंन छांदसत्वात् ४८ लीलयैवआयासरहितानना ४९ मुमोचेति उत्तरार्द्धमुत्तरान्वयि धुताःकंपिताः ५० चचारेतिउत्तरार्द्धमुत्तरान्वयियान्यावत्
५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स·स· तएवेति तावंतएवेत्यर्थः एकैकनिश्वासादेकैकगणः संभूतइत्यर्थः तेगणाः ५२ नाशयंतइति देवीप्रभावेनाप्यायिताः अवादयंतः अवादितवंतइत्यर्थः गणाः अ·

१८ केचिदितिशेषः ५३ मृदंगांश्चेति युद्धमेव महोत्सवोवीराणांहर्षत्वात् शक्तीनांवृष्टिभिर्वर्षैरित्यर्थः ५४ खड्गेतिस्पष्टम् ५५ असुरानिति अकर्षयदिति छं २

तएवसद्यःसंभूतागणाःशतसहस्रशः युयुधुस्तेपरशुभिर्भिंदिपालासिपट्टिशैः ५२ नाशयंतोसुरगणान्देवीशक्त्युपबृंहिताः अवादयंत ःपटहान्गणाःशंखांस्तथापरे ५३ मृदंगांश्चतथैवान्येतस्मिन्युद्धेमहोत्सवे ततोदेवीत्रिशूलेनगदयाशक्तिवृष्टिभिः ५४ खड्गादिभिश्चशतशोनिजघान महासुरान् पातयामासचैवान्यान्घंटास्वनविमोहितान् ५५ असुरान्भुविपाशेनबध्वाचान्यानकर्षयत् केचिद्द्विधाकृतास्तीक्ष्णैःखड्गपातैस्तथापरे ५६ विपोथितानिपातेनगदयाभुविशेरते वेमुश्चकेचिद्रुधिरंमुसलेनभृशंहताः ५७ केचिन्निपातिताभूमौभिन्नाःशूलेन वक्षसि निरंतराःशरौघेणकृताःकेचिद्रणाजिरे ५८ सेनानुकारिणःप्राणान्मुमुचुस्त्रिदशार्दनाः केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ५९

षष्ठ्यौरादिकाल्लङ् अपरइत्युत्तरान्वयि ५६ विपोथिताइति अपरेगदयाविपोथिता आमर्दिताः निपातेननिपतनेनभुविशेरतइत्यन्वयः वेमुरितिछांदसम् ५७ केचिदिति शूलेनवक्षसिभिन्नाःभूमौनिपातिताः निपेतुरित्यन्वयःउत्तरार्द्धमुत्तरान्वयि ५८ सेनेति सेनामनुपश्चात्कुर्वंतिसेनायगाः १८

शरौघव्याप्तत्वात् सेनाःशल्लक्यस्तत्सदृशाश्च अपरेछिन्नग्रीवाः प्राणान्मुमुचुरित्यर्थः ५९ ॐ ॐ ॐ ॐ ॐ

CC-0. In Public Domain. Digitization by eGangotri

शिरांसीति छिन्नानीति शेषः ६० एकइति आशिरःपादपर्यंतंपाटिताइत्यर्थः उत्तरार्द्धमुत्तरान्वयि ६१ कबंधाइति मनुष्याणांसहस्रेषुहतेषुहतमूर्धस्क त
दावेशात्कबंधःस्यादेकोमूर्द्धाक्रियान्वितइतिलक्षितः अपरेकबंधाश्चयुयुधुः ६२ कबंधाइति उभयत्रापियुयुधुरितिशेषः छिन्नाशिरसइतिस्वरूपकथनं
छिन्नानिशिरांसियैरितिवा ऋष्टयःउभयतोधाराःखड्गाःभाषंतइतिछांदसः ६३ पातितैरिति रथनागसहितैरश्वैरित्यर्थः एवमग्रेपि ६४ शोणितौघेति

शिरांसिपेतुरन्येषामन्येमध्येविदारिताः विच्छिन्नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः ६० एकबाह्वक्षिचरणाःकेचिद्देव्याद्विधाकृ
ताः छिन्नेपिचान्येशिरसिपतिताःपुनरुत्थिताः ६१ कबंधायुयुधुर्देव्यागृहीतपरमायुधाः ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः
६२ कबंधाश्छिन्नशिरसःखड्गशक्त्यृष्टिपाणयः तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहासुराः ६३ पातितैरथनागाश्वैरसुरैश्चवसुं
धरा अगम्यासाभवत्तत्र यत्राभूत्समहारणः ६४ शोणितौघामहानद्यःसद्यस्तत्रविसुस्रुवुः मध्येचासुरसैन्यस्यवारणासुर-
वाजिनाम् ६५ क्षणेनतन्महासैन्यमसुराणांतथांबिका निन्येक्षयंयथावह्निस्तृणदारुमहाचयम् ६६.

असुरसैन्यस्यमध्येवारणासुरवाजिनाम् शोणितस्य ओघः प्रवाहोयासुताहृश्योनद्यःप्रसुस्रुवुःछांदसत्वात्समासः ६५ ६६ सचेति क्षयंनिन्येइतिशेषः
तत्रोत्स्रेक्ष्यते अमरारीणां शरीरेभ्यो असून्विचिन्वतीव भूतेर्लङितियोअडागमःछांदसः ६७ देव्याइति चोपयर्येतुतपुस्तुष्टाः ६८ इतिशिक्षभट्टकृतस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्यानेद्वितीयोऽध्यायः २ ऋषिरुवाच निहन्यमानमिति १ २ तस्येति उत्करः समूहः वाजिनां यंतारं चरयं कजया
नेत्यन्वयः ३ चिच्छेदेति आशुगाः बाणाः ४ ५ सिंहमिति सव्येवामे ६ तस्याइति पफालविशीर्णः तस्याभुजमित्यन्वयः ७ चिक्षेपेति ततः शूलं अंबराद्विवि

सचसिंहोमहानादमुत्सृजन्धुतकेसरः शरीरेभ्योमरारीणामसूनिवविचिन्वति ६७ देव्यागणैश्चतैस्तत्रकृतंयुद्धंतथासुरैः य
थैषांतुतुषुर्देवाःपुष्पवृष्टिमुचोदिवि ६८ इतिश्रीमार्कंडेयपुराणे॰ देवीमाहात्म्येमहिषासुरसैन्यवधोनामद्वितीयोऽध्यायः २
ऋषिरुवाच निहन्यमानतत्सैन्यमवलोक्यमहासुरः सेनानीश्चिक्षुरःकोपाद्ययौयोद्धुमथांबिकाम् १ सदेवींशरवर्षेणववर्ष
समरेसुरः यथामेरुगिरेःशृंगंतोयवर्षेणतोयदः २ तस्यछित्वाततोदेवीलीलयैवशरोत्करान् जघानतुरगान्बाणैर्यंतारंचैववा
जिनाम् ३ चिच्छेदचधनुःसद्योध्वजंचातिसमुच्छ्रितम् विव्याधचैवगात्रेषुछिन्नधन्वानमाशुगैः ४ सच्छिन्नधन्वाविरथोहता
श्वोहतसारथिः अभ्यधावततांदेवींखड्गचर्मधरोसुरः ५ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्द्धनि आजघानभुजेसव्येदेवीम
प्यतिवेगवान् ६ तस्याःखड्गोभुजंप्राप्यपफालनृपनंदन ततोजग्राहशूलंसकोपादरुणलोचनः ७ १९

बभिवद्इत्युत्तरान्वयि तेजोभीइत्यत्रइलोपइतिदीर्घः ८ दृष्ट्वेति ततएवंस्कंदरंशूलमापतत् आगच्छत् दृष्ट्वाचेत्यर्थः सचशतधानीतमितिशेषः ९ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोपीति हुंकारेइतिन्हस्वम् ११ १२ ततइति समुत्सत्य आप्लुत्यगजकुंभांतरास्थित इत्येकंपदम् १३ युध्यमानाविति नागात् गजात् युयुधाते इत्यत्र प्रगृह्य-

चिक्षेपचततस्तत्तु भद्रकाल्यांमहासुरः जाज्वल्यमानंतेजोभीरविबिंबमिवांबरात् ८ दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत तेनत
च्छतधानीतंशूलंसचमहासुरः ९ हतेतस्मिन्महावीर्येमहिषस्यचमूपतौ आजगामगजारूढश्चामरस्त्रिदशार्दनः १० सोपिश
क्तिंमुमोचाथदेव्यास्तामंबिकाद्रुतम् हुंकाराभिहतांभूमौपातयामासनिष्प्रभाम् ११ भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः
चिक्षेपचामरः शूलंबाणैस्तदपिसाच्छिनत् १२ ततःसिंहःसमुत्सत्यगजकुंभांतरास्थितः बाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा
१३ युध्यमानौततस्तौतुतस्मान्नागान्महींगतौ युयुधातेतिसंरब्धौप्रहारैरतिदारुणैः १४ ततोवेगात्खमुत्सत्यनिपत्यचमृगा
रिणा करप्रहारेणशिरश्चामरस्यपृथक्कृतम् १५ उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैवकरालश्चनिपा
तितः १६ देवीक्रुद्धागदापातैश्चूर्णयामासचोद्धतम् बाष्कलंभिंदिपालेनबाणैस्ताम्रंतथांधकम् १७

लाभावाच्छांदसः १४ ततइति युद्धानंतरम् वेगात्खमुत्सत्य गत्वापुनस्ततोनिपत्यावतीर्यइत्यर्थः १५ उदग्रश्चेति रणेयुद्धेदंतैर्गजदंतनिर्मितायुधैः मुष्टिभिःतलैश्चपेटै
श्चइत्यर्थः यद्वा दंतैर्दंतक्षतैरित्यर्थः १६ देवीति उद्धतं तत्र माभिंदीतीदस्मध्यः १७ ५ ५ ५ ५ ५ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१८ बिडालस्येति यमक्षयंयमगृहम् १९ एवमिति गणान्‌निश्वाससंभवान् २० कांश्चिदिति खुरः कवर्गादिः २१ वेगेनकांश्चिदिति वेगयुक्तभ्रमणेनवेगोगतेर्भ्रमणं

उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं त्रिनेत्राचत्रिशूलेन जघानपरमेश्वरी १८ बिडालस्यासिनाकायात्पातयामासवैशिरः दुर्धरंदुर्मुखंचोभौशरैर्निन्येयमक्षयम् १९ एवंसंक्षीयमाणेतुस्वसैन्येमहिषासुरः माहिषेणस्वरूपेणत्रासयामासतान्‌गणान् २० कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् लांगूलताडितांश्चान्यान्‌शृंगाभ्यांचविदारितान् २१ वेगेनकांश्चिदपरान्नादेनभ्रमणेनच निश्वासपवनेनान्यान्पातयामासभूतले २२ निपात्यप्रमथानीकमभ्यधावतसोसुरः सिंहंहंतुंमहादेव्याःकोपंचक्रेततोंबिका २३ सोपिकोपान्महावीर्यःखुरक्षुण्णमहीतलः शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच २४ वेगभ्रमणविक्षुण्णामहीतस्यव्यशीर्यत लांगूलेनाहतश्चाब्धिःप्लावयामाससर्वतः २५ धुतशृंगविभिन्नाश्चखंडंखंडंययुर्घनाः श्वासानिलास्ताःशतशोनिपेतुर्नभसोचलाः २६ इतिक्रोधसमाध्मातमापतंतंमहासुरम् दृष्ट्वासाचंडिकाकोपंतद्वधायतदाकरोत् २७

मंडलाकारगतिः २२ निपात्येति प्रमथाःगणाः २३ २४ वेगेनेति विक्षुण्णाकुट्टिताव्यशीर्यते कर्मकर्त्तरिरूपंसर्वतःसार्वविभक्तिकस्तसिः प्लावयामास जलेनेतिशेषः २५ धुतेति कंपितेत्यर्थः खंडस्यखंडायस्यांक्रियायां श्वासानिलेनाकाशंप्रत्यस्ताःक्षिप्ताःअचलाःपुनराकाशात्पेतुरित्यर्थः २६ २७ ७ ७ ७ ७ ७ ७ ७ २०

CC-0. In Public Domain. Digitization by eGangotri

सेति सातस्योपरिपाशंक्षिप्त्वातंबबंधेत्यन्वयः २८ ततइतितस्यसिंहीभूतस्य अदृश्यतदेव्येतिशेषः २९ ततइति तंपुरुषंदेवी आस्वेवखड्गचर्मणेतिसमाहारद्वंद्वः तत्सहितंसायकै
श्चिच्छेदेत्यन्वयः ३० करेणेति महासिंहंदेवीवाहनंकर्षतइत्यस्यसिंहमित्यादिनिरकृंततेतिछांदसम् ३१ ततइति तथैवभागवदेव ३२ ततइति महिषस्याशिवा

साक्षिप्त्वातस्यवैपाशंतंबबंधमहासुरम् तत्याजमाहिषंरूपंसोपिबद्धोमहामृधे २८ ततःसिंहोभवत्सद्योयावत्तस्यांबिकाशिरः छिनत्तिता
वत्पुरुषःखड्गपाणिरदृश्यत २९ ततएवाशुपुरुषंदेवीचिच्छेदसायकैः तंखड्गचर्मणासार्द्धंततःसोभून्महागजः ३० करेणचमहासिंहंतंचक
र्षजगर्जच कर्षतस्तुकरंदेवीखड्गेननिरकृंतत ३१ ततोमहासुरोभूयोमाहिषंवपुरास्थितः तथैवक्षोभयामासत्रैलोक्यंसचराचरम् ३२
ततःक्रुद्धाजगन्माताचंडिकापानमुत्तमम् पपौपुनःपुनश्चैवजहासारुणलोचना ३३ ननर्दचासुरःसोपिबलवीर्यमदोद्धतः विषाणाभ्यां
चचिक्षेपचंडिकांप्रतिभूधरान् ३४ साचतान्प्रहितांस्तेनचूर्णयंतीशरोत्करैः उवाचतंमदोद्धूतमुखरागाकुलाक्षरम् ३५ देव्यु
वाच गर्जगर्जक्षणंमूढयावन्मधुपिबाम्यहम् मयात्वयिहतेत्रैवगर्जिष्यंत्याशुदेवताः ३६

वतारत्वेनजायमानदयादिविच्छेदायात्रमद्यपानं
पानंमद्यंकर्मणिल्युट् पानादरुणलोचनापुनःपुनर्जहासेत्यन्वयः ३३ ननर्देति बलंशारीरंवीर्यमुत्साहः ताभ्यांमदोगर्वः ३४ साचेति मदेनोद्धूत अतिशयेनजा
तोमुखेरागोयस्याःसा आकुलाक्षरमितिवचनंक्रियाविशेषणम् मद्यस्वभावोयम् ३५ देव्युवाच गर्जगर्जेति संभ्रमेणाद्विरुक्तिर्मदेनच पिबामीतिपूर्वंपपावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰स॰ स्तुक्तिः राजानंप्रतिक्रमइतिनदोषः ३६ ऋषिरुवाच एवमिति समुत्पत्यकूर्दनंकृत्वातंसा आरूढा अथ एनंपादेनाक्रम्यदृढंबध्वाकंठेशूलेनाताडयदित्यन्व अ॰

२१ यः ३७ ततइति तयापादाक्रांतः धृढंधृतोपिसः ततः शूलताडनोत्तरंततः महिषस्वरूपीयात् निजमुखादर्द्धनिष्क्रांतः निसृतार्द्धकायः एवदेव्यावीर्येण अतिअति ३

शयेनसंवृतः परिवृन्दः निष्क्रमितुंनाशकदित्यर्थः ३८ अर्द्धेति एवंचाशिरश्छेदोद्भवंतंदानवंशूलपाणिनमितिविशेषः कल्पांतरायइतिबोद्धव्यम् ३९ ततइति नना

ऋषिरुवाच एवमुक्त्वासमुत्पत्यसारूढातंमहासुरम् पादेनाक्रम्यकंठेचशूलेनैनमताडयत् ३७ ततः सोपिपदाक्रांतस्तयानिजमुखा त्ततः अर्द्धनिष्क्रांतएवातिदेव्यावीर्येणसंवृतः ३८ अर्द्धनिष्क्रांतएवासौयुध्यमानोमहासुरः तयामहासिनादेव्याशिरश्छित्वानिपाति तः ३९ ततोहाहाकृतंसर्वंदैत्यसैन्यंननाशतत् प्रहर्षंचपरंजग्मुः सकलादेवतागणाः ४० तुष्टुवुस्तांसुरादेवींसहदिव्यैर्महर्षिभिः जगु र्गंधर्वपतयोननृतुश्चाप्सरोगणाः ४१ इतिश्रीमार्कंडेयपु॰ देवीमाहात्म्येमहिषासुरवधस्तृतीयोऽध्यायः ३ ऋषिरुवाच श क्रादयः सुरगणानिहतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या

शपलायितं हाहेतिकृतंयेनेति सैन्यविशेषणम् ४० तुष्टुवुरिति सुराइंद्रा

द्याः दिव्यैर्ब्रह्मादिभिः सहमहर्षिभिश्चसहतुष्टुवुरित्यर्थः ४१ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेमहिषासुरवधोनाम २१

तृतीयोऽध्यायः ३ तुष्टुवुः सुराइत्युक्तांतांस्तुतिमाह ऋषिरुवाच शक्रादयइति तस्मिन्महिषासुरेदेव्यानिहतेइत्यन्वयः शिरोधरांसा अंसः

CC-0. In Public Domain. Digitization by eGangotri

स्कंधः पुलकाः रोमांचाः १ देव्येति आततंव्याप्तंततंसृष्टंच निःशेषदेवगणशक्तीनांसमूहनायवृद्धये ~~तच्छक्तिसमूहस्य~~ स्वतेजोंशप्रचयएवचमूर्त्तिर्विग्रहोयस्या
स्तयेत्यर्थः समूहइतिभावेक्तः नतास्मेत्यत्रचाशरीतिविसर्गस्यसः २ यस्याइति यस्या अतुलंप्रभावंतेजः बलंशारीरंवक्तुमनंतः ~~सहस्रास्योपि ब्रह्मा च सोपिहरः~~
सर्वशक्तिरपिनालंपर्याप्तं असुरेभ्योभयस्येत्यर्थः द्वंद्वेवासमाहारेवा ३ याश्रीरिति पापात्मनांभवनेष्वलक्ष्मीः कृतधियांनिर्मलांतःकरणानांहृदयेबुद्धिः स्वर्गा

तांतुष्टुवुः प्रणतिनम्राशिरोधरांसावाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः १ देव्यायया ततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमू
हमूर्त्या तामंबिकामखिलदेवमहर्षिपूज्यांभक्त्यानतास्मविदधातुशुभानिसानः २ यस्याः प्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहि
वक्तुमलंबलंच साचंडिकाखिलजगत्परिपालनायनाशायचासुरभयस्यमतिंकरोतु ३ याश्रीः स्वयंसुकृतिनांभवनेष्वलक्ष्मीः
पापात्मनांकृतधियांहृदयेषुबुद्धिः श्रद्धासतांकुलजनप्रभवस्यलज्जातांत्वांनतास्मपरिपालयदेविविश्वम् ४

पवर्गसाधनंज्ञानं ~~सतांहृदयेषुश्रद्धा~~ आस्तिक्यबुद्धिः कुलजनप्रभवस्यशुद्धजन्मनोहृदयेषुलज्जाकरणीयाप्रवृत्तिलक्षणोंतःकरणवृत्तिविशेषः नता
स्मेतिप्राग्वत् ४ एषाआपाततःस्तुतिर्वस्तुतस्त्वनिर्वाच्यास्तुत्यैवेत्याह किमिति असुरादैत्याः देवाः शिवादयः गणाः प्रमथाः तत्प्रभृतिषु अचिंत्यंस
र्वोत्कृष्टत्वादनिरूपणीयंतवरूपं अतः किंकेनप्रकारेण वर्णयामश्चपरंदैत्यनाशकारीभूरिवीर्यं अतिअत्युत्कृष्टंचपरंयुद्धेषुयानिचरितानि तान्यप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स.स. तिअत्युत्कृष्टानि अतःकिंवर्णयामेत्यन्वयः सर्वत्राचिंत्याइति ५ मूलप्रकृतिस्त्वमेवेत्याह हेतुरिति त्वंसमस्तजगतांहेतुर्मूलकारणम् तत्रहेतुर्यतः त्रिगुणासत्वरज अ
२२ स्तमोयुता नन्वेवंरागादिसंबंधेनसर्वकारणंनस्यादत आह अपीति त्रिगुणापिदोषैरागादिभिर्नज्ञायसेनविषयाक्रियसे यद्वा दोषैर्विशिष्टाकेनापिनज्ञा ४
यसेतदभावादित्यर्थः नन्वेवंपरिछिन्नतयासर्वहेतुत्वंनस्यादत आह हरिहरादिभिरप्यपारा अज्ञातपरिच्छेदापरिच्छेदाभावादित्यर्थः तत्रहेतुः सर्वाश्रि
या सर्वमाश्रयंयस्याःसा कार्यंहिकारणमाश्रयते सर्वत्रवर्त्तमानाच्च यतश्चएवजगत् तवांशभूतं सर्वसमष्टेर्ब्रह्मणस्त्वदंशत्वात् एतद्रूपंपरिच्छिन्नत्वव्या

किंवर्णयामतवरूपमचिंत्यमेतत्किंचातिवीर्यमसुरक्षयकारिभूरि किंचाहवेषुचरितानितवातियानिसर्वेषुदेव्यसुरदेवगणादिके
षु ५ हेतुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिपरमाप्रकृ
तिस्त्वमाद्या ६ यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वम
तएवजनैःस्वधाच ७

हतंस्यादितिभावः नत्वेवंविकारापत्तिरत आह अव्याकृताषड्विधविकाररहितत्वात् हियतःसंसारमाद्याप्रथमाप्रकृतिःस
त्वरजस्तमसांसाम्यावस्थासि कीदृशीपरमा परमात्मामीयते जीवभावेनचिच्छिद्यतेयया परमात्मैवप्रकृतिः धर्माध्यासात् जीवत्वेनाध्यवसीयते ६ २२
यस्याइति हेदेवि यस्याःसमुदीरणेनउच्चारणेनसमस्तसुरतासकलसुरसमूहः सर्वयज्ञेषुतृप्तिंप्रयातिसास्वाहा त्वमेवासि वेदेप्रसिद्धं तथापितृगण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यापितृतृप्तिहेतुस्त्वमेव अतएवजनैः पितृकर्मणिस्वधाचउच्चार्यतेवास्वाहा ७ प्रकृतिस्त्वमसिरुक्ताब्रह्मापित्वमेवेत्याह येति हेदेवियामुक्तिहेतुः अविचिं-
त्यमनुष्ठेयत्वचिंताया अभ्यविषयंमहाव्रतं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपंयोगशास्त्रप्रसिद्धंसाधनंयस्याइदृशीचयासाभगवतीभगवद्विषया
परमाउत्कृष्टविद्यातद्विषयावरणभञ्जिका ब्रह्मज्ञानरूपात्वमेवासि ह्यितः अनस्त्यक्तसमस्तरागादिमोक्षेच्छुभिर्मुनिभिर्वशीकृतेंद्रियैः तत्वंब्रह्मैवज्ञेय
त्वेनसारोयेषांतैरभ्यस्यतेइत्यर्थः अभ्यस्यसेइत्यत्रासंधिः संहितायाअनित्यत्वात् ८ शब्देति ऋविमलानामपौरुषत्वेनदोषरहितानां ऋचांयजुषां

यामुक्तिहेतुरविचिंत्यमहाव्रतात्वमभ्यस्यसे सुनियतेंद्रियतत्वसारैः मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीप
रमाहिदेवी ८ शब्दात्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतांचसाम्नाम् देवीत्रयीभगवतीभवभावनायवार्त्ता
चसर्वजगतांपरमार्त्तिहंत्री ९ मेधासिदेविविदिताखिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा श्रीः कैटभारिहृदयैककृ
ताधिवासागौरीत्वमेवशशिमौलिकृतप्रतिष्ठा १०

साम्नांचनिधानमाश्रयः शब्दब्रह्मरूपा भवस्यसंसारस्य भावनायप्रवृत्त्याविच्छेदाययया
देवीद्योतनशीला त्रयीवेदत्रयीसात्वंभगवती भवंतितेभवाः प्राणिनस्तेषांभवायजीवनायवार्त्ताकृषिवाणिज्यपशुपालत्वम् ९ तदधिष्ठात्र्यपित्वमेवेत्या-
ह मेधासीति मेधासरस्वतीसैवदुःखप्राप्यत्वेनदुर्गासीत्युच्यते दुर्गसंसारसागरस्यनौः ज्ञानद्वारा एवंपूर्वार्द्धेनब्राह्मीत्वंचोक्तं प्रसिद्धनौतोव्यतिरेकमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सःसः
२३

असंगेति साहिकर्णधारादिसंगवती शंभोरुता प्रतिष्ठा आस्पदं यया अर्द्धशरीरत्वात् उत्तरार्द्धेनरौद्रीत्वं वैष्णवीत्वंचोक्तम् १० ईषदिति ईषत् हाससहितं छांद अ
सः पदव्यत्ययः पूर्वार्धोक्तगुणविशिष्टंतववक्त्रं विलोक्यापि आसरोषेण प्राप्तरोषेण महिषासुरेण सहसा दर्शनसमकालमेव तथातिनिष्ठुरं यत्प्रहृतं तदत्याश्च ४
र्यमित्यर्थः जगन्मोहकमिति दृश्यात्तस्य मोह इति अतिरूपभेदोयम् तादृशस्यापि वधेन देव्या एवोत्कर्षः सिद्ध्यति ११ दृष्ट्वात्विति दृष्ट्वापीत्यर्थः भ्रुवोः कुटी

ईषत्सहासममलं परिपूर्णचंद्रबिंबानुकारि कनकोत्तमकांतिकांतम् अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासु
रेण ११ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपि-
तांतकदर्शनेन १२ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सु
विपुलं महिषासुरस्य १३

वक्रता तया करालं भीषणं उद्यच्छशांकेत्यनेनातिरक्तता अनेन महिषस्यापि धीरत्वं देव्युत्कर्षः प्राग्वदेव १२ देवी
ति देवि प्रसीदेत्युक्त्वा विचार्यव्यर्थमेतद्वचः प्रसन्नत्वादेवतवेत्याह भवती परा सानुग्रहा माबुद्धिर्यस्यास्तादृशी कथमेतत् ज्ञानं तत्राह यतोनोभवा
य कोपवती त्वं नो रिपूणां कुलानि सद्यो विनाशयसि तत्र संप्रतिपत्तिमाह विज्ञातमित्यादि एवंच कोपोप्यपररक्षणफलको न तु स्वाभाविक इति स २३
त्वगुणप्रधानत्वं दर्शितम् १३ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri

तेइति संमताः महाजनांगीकृताः धर्मघटितोवर्गः धर्मार्थकाममोक्षरूपः धन्याः पुण्यवत्त्वेन प्रसिद्धाः निभृताः नितरांपोषिताः अभ्युदयदासर्वमनोरथदा १४ धर्म्या णीति हेदेवि भवतीप्रसादात् यः सुकृतीप्राग्जन्मार्जितपुण्यवान् सततमेवसुकृतलब्धत्वत्प्रसादादेव अत्यादृतः नित्यनैमित्तिकादावतिश्रद्धावान् प्रतिदिनंस दैवषष्टिघटिकावच्छेदेनसकलानिधर्म्याणिकर्माणिकरोतिपुनस्त्वत्त एवत्वत्प्रीत्युद्देशेनकृतकर्मण्योलब्धत्वत्प्रसादादेवस्वर्गंप्रयाति ततःक्रमेणवामोक्षंच-

तेसंमताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिधर्मवर्गः धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रस-न्ना १४ धर्म्याणिदेविसकलानिसदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रयेपिफल दानुदेवितेन १५ दुर्गेस्मृताहरसिभीतिमशेषजंतोः स्वस्थैःस्मृतामतिमतीवशुभांददासि दारिद्र्यदुःखभयहारिणिकात्वदन्या सर्वोपकारकरणायसदार्द्रचित्ता १६ एभिर्हतैर्जगदुपैतिसुखंतथैतेकुर्वंतुनामनरकायचिरायपापम् संग्राममृत्युमधिगम्यदिवं प्रयांतुमत्वेतिनूनमहितान्विनिहंसिदेवि १७

नन्विनिश्चये तेनत्वंलोकत्रयेपिफलदाइतिशेषः १५ दुर्गेइति दुर्गेदुर्गमेसंकटेइतियावत् त-न्नामइतिच दारिद्र्यशब्दभावेष्यञ् भयंप्रतिकूलप्रतिसंधानजम् आर्द्रचित्तास्निग्धचित्ता १६ सर्वोपकारित्वमुपपादयाति एभिरिति दैत्यैरित्यर्थः उ पैतीतिलट् उपैत्वित्यर्थः एतेदैत्याःनामेत्यभ्युपगमेनरकायेतितादर्थ्येचतुर्थी तथापिरणेमृत्युंप्राप्यस्वर्गंगच्छंतुइतिहेतुत्रयंमनासिकृत्वाजगदहितान् हंसीत्यर्थः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वैवेति दर्शनोत्तरमेतावन्मात्रेणैव भस्मकरणयोग्येषु यत्त्वं शस्त्रं पातयसि तत्तेषामुत्तमलोकप्रापयेइतितेष्वपिउपकारित्वमेवत्वमितिकिंवक्तव्यं भक्तेष्विति भावः १८ खड्गेति निकरः समूहः विस्फुरणं सर्वत्रप्रसरणम् निवहः समूहः यद्विलयं नागतास्तदेतत् अंशुमद्यादिंदुखंडं तद्योगिमद्यत्कमाननं तव विलोकयतां चैषामाश्रयादितिशेषः १९ दुर्वृत्तानां वृत्तं पापं तस्य शमनं तव शीलं स्वाभाविको गुणः तथान्यैरतुल्यमत एवाविचिंत्यम् कीदृशमितिचिंताविष

दृष्ट्वैव किंन भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् लोकान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति ते
ष्वहितेषु साध्वी १८ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोसुराणाम् यन्नागता विलयमंशुमदिंदु
खंडयोग्याननं तव विलोकयतां तदेतत् १९ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः वीर्यं च हंतृ हृतदेवप-
राक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् २० केनोपमा भवतु तेस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र चित्ते कृपा स
मरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपि २१

यम् दृष्ट्वैव किन्नेत्यादिना रूपं रूपमाकृतिः च परं हता आत्मसात्कृताः देवा येन ईदृशः पराक्रमो येषां तेषां दैत्यानां हंतृ वीर्यं एवं चेदृशरूपेण ईदृशबलेन तेषां शस्त्रतो हननमिति तदीयपापशांतये इति तेषु दयैव त्वया कृतेति भावः २० केनेति अतिहारि मनोहरं विरोधोत्रालंकारः केनोपमेति तृतीया आर्षत्वात् चित्ते कृपा रिपुष्वप्युपकारत्वात् निष्ठुरता तु स्पष्टैव अत्र कृपा स्वाभाविकी निष्ठुरता त्वारोपितेति विरोधपरिहार इति बोध्यम् २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैलोक्यमिति त्वयेत्यंतमेकान्वयः ततोरिपुगणाइत्यंतं अपरंवाक्यंभयमित्यतोभवमित्यंतमपरं अनेनचित्तेकृपेत्येतद्विवृतम् नमस्तेइत्यनेननमस्काराति
रिक्तप्रत्युपकारकरणेनास्माकंसामर्थ्यमिति ध्वनितम् २२ २३ प्राच्यामिति दक्षिणेइत्यस्यदिग्भागेइतिशेषः भ्रामणेनेत्यत्रन्हस्वाभावः संज्ञापूर्वकविधे

त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्धनितेपिहत्वा नीतादिवंरिपुगणाभयमप्यपास्तमस्माकमुन्मदसुरारिभ
वंनमस्ते २३ शूलेनपाहिनोदेविपाहिखड्गेनचांबिके घंटास्वनेननःपाहिचापज्यानिःस्वनेनच २३ प्राच्यांरक्षप्रतीच्यांचचंडिके
रक्षदक्षिणे भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरि २४ सौम्यानियानिरूपाणित्रैलोक्येविचरंतिते यानिचात्यर्थघोराणितैर
क्षास्मांस्तथाभुवम् २५ खड्गशूलगदादीनियानिचास्त्राणितेंबिके करपल्लवसंगीनितैरस्मान्रक्षसर्वतः २६ ऋषिरुवाच
एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः अर्चिताजगतांधात्रीतथागंधानुलेपनैः २७ भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तुधूपिता
प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान् २८

रनित्यत्वात् २४ सौम्यानीति सृष्टिस्थितिव्यापाराणि अत्यर्थघोराणि संहारव्यापाराणि त-
थासुवंपृथिवींचेत्यर्थः २५ खड्गेति संगःसंसर्गः २६ ऋषिरुवाच एवमिति नंदनंदेवोद्यानं दिव्यैःउत्कृष्टैः गंधाःश्रीनागादयः अनुलेपनंश्रीचंदनादि २७
भक्त्येति अंतःकरणेनप्रेमतयाभजनंसेवनंभक्तिः तयाप्रेमलक्षणयाभक्त्यादिव्यैर्मनोज्ञैः धूपोस्त्विति पाठः २८ ५ ५ ५ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव्युवाच म्रियतामिति देवाऊचुः भगवत्येति २९ यदिति यतइत्यर्थः पूर्वान्वियर्थम् उत्तरार्द्धमुत्तरान्वयि यदिवापीति वाशब्दएवमर्थेयद्येवंसत्यपिवरो
देयइतिवच्छेदात्तदावक्ष्यमाणमस्त्वित्यर्थः अस्माकमस्मभ्यमित्यर्थः ३० संस्मृतेति हिंसेथाइत्यार्षः उत्तरार्द्धमुत्तरान्वयि ३१ तस्येति वित्तर्द्धिविभवैरितिसह-

देव्युवाच म्रियतांत्रिदशाःसर्वेयदस्मत्तोभिवांछितम् देवाऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्यते २९ यदयंनिहतःशत्रुरस्मा
कंमहिषासुरः यदिवापिवरोदेयस्त्वयास्माकंमहेश्वरि ३० संस्मृतासंस्मृतात्वंनोहिंसेथाःपरमापदः यश्चमर्त्यःस्तवैरेभिस्त्वांस्तोष्यत्य
मलानने ३१ तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदाम् वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्वदांबिके ३२ ऋषिरुवाच इतिप्रसादिता
देवैर्जगतोर्थेतथात्मनः तथेत्युक्त्वाभद्रकालीबभूवांतर्हितानृप ३३ इतितत्कथितंभूपसंभूतासायथापुरा देवीदेवशरीरेभ्यो
जगत्त्रयहितैषिणी ३४ पुनश्चगौरीदेहात्सासमुद्भूतायथाभवत् वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः ३५

योगेतृतीयाभवनेचसाहित्यंवित्तंज्ञानंतस्यवृद्धिरुपचयः विभवाऐश्वर्यादयः धनदारादीनांसंपद अनुरूपाआत्मभावाः आदिनापुत्रादिवृद्धयेउपचयाय
३२ ऋषिरुवाच इतीति तथात्मनः आत्मनश्चार्थेइत्यर्थः तथेत्युक्त्वातथास्त्वित्युक्त्वा भद्रंकालयतीतिभद्रकाली अंतर्हिताऽदृश्याबभूवेत्यन्वयः ३३
इतीतिस्पष्टम् ३४ पुनश्चेति गौरीदेहः कारणंयस्याइत्यर्थः समुद्भवः प्रादुर्भावःयथा तत्रहेतुर्दुष्टवधोदेवलोकरक्षणंवा ३५ ७९ ७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतेनाप्यस्याः कोर्थस्तदाह उपकारिणीति उपकारस्वभावायतइत्यर्थः तच्छृणुध्वेत्यार्षस्तङ् तत्प्रकारं मयामत्तः निपातोयम् ख्यातंलोकप्रसिद्धम् एना-
सुपक्रम्यलक्ष्मीतंत्रेलक्ष्मीवाक्यम् अभिष्टुतासुरैः साहंमाहिषंजघ्नुषीक्षणात् महिषांतकरीसूक्तंदृष्टंदेवैर्महर्षिभिः उत्पत्तिंयुद्धविक्रांतिस्तोत्रंचेतिसुरेश्वर
कथयंतिसुविस्तीर्णंब्राह्मणावेदपारगाः लभंतेचफलंशश्वदाधिपत्यमनश्वरम् इतिमाहिषांतकरीसूक्तंदेवैर्महर्षिभिश्चदृष्टम् देव्यायया ततमितिश्लो
केखिलदेवमहर्षिपूज्यत्वविशेषणात् युष्माभिस्तुतयोयाश्चेति श्लोकेब्रह्मर्षीणांस्तुतिकर्तृत्वप्रतिपादनाच्चेतिबोध्यम् ३६ इतिशिवभट्टसुतसतो

रक्षणायचलोकानांदेवानामुपकारिणी तच्छृणुध्वमयाख्यातंयथावत्कथयामिते ३६ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वं
शक्रादिकृतदेव्याःस्तुतिःमहिषासुरवधःचतुर्थोध्यायः ४ ऋषिरुवाच पुराशुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः

गर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेचतुर्थोऽध्यायः ४ यथावत्कथयामीतिप्रतिज्ञातमितिहासमाह ऋषिरुवाच पुरेति कश्यपात् दन्वांसुत्प-
न्नौनमुचिज्येष्ठौशुंभनिशुंभाविमौसतालव्यौचेतिवामनपुराणेलक्ष्मीतंत्रेपि तामसेत्वंतरेशक्रमहाविद्यांविधायसागौरीदेहात्समुद्भूताकौशिकीति
तदाप्यहम् वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः मदीयाःशक्तयोयास्तादेवश्रेष्ठशरीरगाः तास्तास्तद्रूपधारिण्यःसाहाय्यंविदधुर्मम ताभिर्निह
तदैत्येंद्रात्हंतव्योमेययातया संहृत्यात्मनिताःसर्वामदीयाविप्रुषोखिलाः अहंनिजघ्नुषीपश्चाद्दैत्यौशुंभनिशुंभकाविति नारायणीस्तुतिर्नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स॰स॰ सूक्तंपरमशोभनम् पुरंदरतदादृष्टंदेवैरग्निपुरोगमैः एषासंपूजिताभक्त्यासर्वज्ञत्वंप्रयच्छति कौशिकीसर्वदेवेशसर्वकामप्रदात्यहम् उत्पत्तिर्युद्धवि अ॰
२६ क्रांतिःस्तुतिश्चेतिपुरातनैः पठ्यतेवितयंविप्रैर्वेदवेदांगपारगैः एतासांपरमाप्रोक्ताकूटस्थासामहीयसी महालक्ष्मीर्महाभागाप्रकृतिःपरमेश्वरी असु ५
व्याःस्तुतयेदृष्टंब्रह्माद्यैःसकलैःसुरैः नमोदेव्यादिकंदेवीसूक्तंसर्वफलप्रदम् इमांदेवींस्तुवन्नित्यंस्तोत्रेणानेनभामिह क्लेशानतीत्यसकलानैश्वर्यंम
हदश्नुतइति यज्जस्त्वावैश्यस्सुरथौपरांसिद्धिमवापतुरिति अग्निमुखदेवगणादृष्टस्तोत्रंनारायणीसूक्तम् तत्रनारायणिनमोस्तुतइतिबहुधाभ्यासा

त्रैलोक्यंयज्ञभागाश्चहृतामदबलाश्रयात् १ तावेवसूर्यतांतद्वदधिकारंतथैंदवम् कौबेरमथयाम्यंचचक्रातेवरुणस्यच २ ता
वेवपवनर्द्धिंचचक्रतुर्वन्हिकर्मच ततोदेवाविनिर्धूताभ्रष्टराज्याःपराजिताः ३

तु नमोदेव्यैइत्यादिकंदेवीसूक्तंदेवीपदेनोपक्रमादितिबोध्यम् ~~मध्येगर्वःबलंशक्तिः~~ १ तावेति सुवतिकर्मणिलोकंप्रेरयतीतिसूर्यस्तस्यभावः सर्वलो-
ककर्मप्रेरकता तद्वदैंदवमाधिकारंतथाकौबेरंवरुणस्यचाधिकारमित्यन्वयः २ ताविति पवनः ऋध्यतेनेनेतिकरणोक्तिन् तेनतदधिकारमित्यर्थः
हृतेतिआत्मसात्कृताइत्यर्थःअधिकारस्त्रिराद्वृत्तादशात्रिदशाःअधिकारवृत्तरूपांतभावेनैकार्थाभावः तेनत्रयस्त्रिंशादित्यर्थः तेचार्काद्वादशरुद्राएका २६
दशावसवोष्टौविश्वेदेवौद्वाविति एकएवत्रिशब्दस्तंत्रेणोभयार्थः निराकृताः स्वर्गादपिनिराकृताः निःसारिताःसस्मरंतिस्मृतवंतःवर्त्तमानसामीप्ये
भूतेलट् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४ तत्रैवहेतुमाह तयेति स्मृतासती अखिलाः परमापदइत्यन्वयः ५ इतीति भवान्या अभिव्यक्तिस्थानत्वाद्धिमवद्गमनं तत्रहिमवति सुंभनिसुंभदमन्याः सरस्वती
त्वेपियथाविष्णुमायात्वं तथोक्तमुपक्रमे ६ द्योतितांसर्वात्मेनस्तुतिमाह देवाऊचुः नमइति देवी द्युत्यादीनि महादेवी महतांब्रह्मादीनामपिस्वर्गादिव्यवहारस्य

हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः महासुराभ्यांतांदेवींसंस्मरंत्यपराजिताम् ४ तयास्माकंवरोदत्तोयथापत्सुस्मृता
खिलाः भवतांनाशयिष्यामितत्क्षणात्परमापदः ५ इतिकृत्वामतिंदेवाहिमवंतनगेश्वरम् जग्मुस्तत्रततोदेवींविष्णुमायांप्रतु
ष्टुवुः ६ देवाऊचुः नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् ७ रौद्रायैनमोनित्यायैगौ
र्यैधात्र्यैनमोनमः ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः ८ कल्याण्यैप्रणतांवृद्ध्यैसिद्ध्यैकूर्म्यैनमोनमः नैर्ऋत्यैभूभृतांल
क्ष्म्यैशर्वाण्यैतेनमोनमः ९ दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै ख्यात्यैतथैवकृष्णायैधूम्रायैसततंनमः १०

वर्त्तयित्री शिवाकल्याणरूपातद्धेतुत्वात् प्रकृत्यैसृष्टिशक्त्यैभद्रायैरक्षणशक्तिः नियताःसमाहिताचित्ताःप्रणताःस्मस्मेति पादपूरणे ७ रौद्रायैइति सं
हारशक्त्यैनित्याकालानवच्छिन्नानित्याख्याशक्तिरूपाच गौरीति तद्धरणाधात्री जगदाधाराज्योत्स्नाचंद्रकिरणा इंदुश्चंद्रइदमुपलक्षणम् ज्योती
रूपस्य सुखापरमानंदरूपा ८ कल्याणीतत्कर्त्री शर्वाणीशिवशक्तिः ९ दुर्गायैइतिदुःखज्ञेयायै दुर्गोदुरधिगमः परिच्छेदोयस्यास्तस्यैदुर्गात्संसारात्सारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोतीतिच सारोबलंतद्रूत्यैसर्वकारिण्यैसर्वजननेस्वतंत्रायैप्रकृतिपुरुषयोर्भेदज्ञानंख्यातिस्तद्रूपायैप्रसिद्धौच कृष्णातद्वर्णाकृष्णाशक्तिश्चधूम्रातद्व-
र्णा १० अतीति विद्यात्वेनसंसारश्यामकत्वादतिसौम्या अविद्यारूपेणसंसारहेतुत्वादतिरौद्रा नमोनमःइत्येतदुक्तिपूर्वकंनताः नम्राइत्यर्थः जगत्प्रतिष्ठा
जगदुपादानकारणम् देव्यैदेवशब्देक्षितिःक्रिया ११ ~~येति विष्णु~~मायामूलशाब्दविद्येतिशाब्दितासर्वांगमेषुप्रतिपादिता नमस्तस्यै इतित्रिकेनका

अतिसौम्यातिरौद्रायैनतास्तस्यैनमोनमः नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः ११ यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १२ यादेवीसर्वभूतेषु चेतनेत्यभिधीयते नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः
१३ यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यै॰ १४ यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता नमस्तस्यै॰ १५ यादेवी
सर्वभूतेषुक्षुधारूपेणसंस्थिता नमस्तस्यै॰ १६ यादेवीसर्वभूतेषुछायारू॰ नमस्तस्यै॰ १७ यादेवी॰ शक्तिरूपेण॰ नमस्त
स्यै॰ १८ यादेवी॰ तृष्णारूपे॰ नमस्तस्यै॰ १९ यादेवी॰ क्षांतिरूपेण॰ नमस्तस्यै॰ २०

यिकवाचिकमानसिकरूपंनमस्कारत्रयंदर्शितमे-
वमग्रेपि १२ चेतनानिर्विकल्पायाचिच्छक्तिरित्युच्यते १३ बुद्धिः सविकल्पकज्ञानम् १४ निद्रासुषुप्तीः स्वप्नावस्थावा १५ क्षुधाअभ्यवजिहीर्षा १६ ~~छाया~~ २७
~~संसारतापा~~भावः वर्णसादृश्यंच १७ ~~शक्तिः कार्यजननसामर्थ्यम्~~ १८ तृष्णाअनात्मीयस्वीकारेच्छा १९ क्षांतिःसत्यपिसामर्थ्येऽपकाराचिकीर्षा २० ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातिर्मोत्सादिः २१ लज्जास्व कार्यविषयाव्यज्ञानभिन्ना २२ शांतिरिंद्रियसंयमः विषयोपरतिरूपः २३ श्रद्धाश्रुत्याद्युक्तेर्थेआस्तिकत्वम् २४ कांतिःशोभा २५
लक्ष्मीर्धनादिसंपत् २६ वृत्तिर्जीविकावृत्तिश्च २७ स्मृतिरनुभूतविषयज्ञानम् २८ दयापरदुःखप्रहारेच्छा २९ तुष्टिरधिगताधिकानभिलाषः ३० मातापा

यादेवीसर्व०जातिरूपेण० नमस्तस्यै० २१ यादेवीस० लज्जारूपेण० नमस्तस्यै० २२ यादेवीस० शांतिरूपेण० नमस्तस्यै० २३
यादेवीस०श्रद्धारूपेण० नमस्तस्यै० २४ यादेवीसर्व० कांतिरूपेण० नमस्तस्यै० २५ यादेवीस० लक्ष्मीरूपेणसंस्थिता नमस्त
स्यै० २६ यादेवीसर्व० वृत्तिरूपेणसंस्थिता नमस्तस्यै० २७ यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता नमस्तस्यै० २८ यादेवी
सर्वभूतेषुदयारूपेणसं० नमस्तस्यै० २९ यादेवीस० तुष्टिरूपेण० नमस्तस्यै० ३० यादेवीसर्व० मातृरूपेण० नमस्तस्यै० ३१
यादेवीसर्वभूतेषुभ्रांतिरूपेणसंस्थिता नमस्तस्यै० ३२ इंद्रियाणामधिष्ठात्रीभूतानामखिलेषुया भूतेषुसततंतस्यैव्याप्त्यैदे
व्यैनमोनमः ३३ चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत् नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३४

लयित्रीमातृकाधिष्ठात्रीदेवताच ३१ भ्रांतिरतद्वतितद्बुद्ध्यः ३२ इंद्रियेति याखिलेषुभूतेषु अंतर्यामिविधयास्थिताइंद्रियाणांज्ञानकरणानांज्ञानविषयाणां
सूक्ष्मस्थूलानांअधिष्ठात्रीप्रवर्तिकाचतस्यैव्याप्त्यैदेव्यैव्यापिकायैइत्यर्थः ३३ चितिः चिच्छक्तिः ३४ ५ ५ ५ ५

CC-0. In Public Domain. Digitization by eGangotri

अत्रायंसंग्रहः विष्णुमायाचेतनाचबुद्धिर्निद्रेक्षुधातथा छायाशक्तिश्चतृष्णाचक्षांतिर्जातिस्ततःपरम् लज्जाशांतिस्ततःश्रद्धाकांतिर्लक्ष्मीस्ततःपरम् वृत्तिःस्मृ
तिर्दयाचैवतुष्टिर्माताततःपरम् भ्रांतिर्व्याप्तिश्चितिश्चैवत्रयोविंशतिसंख्यकाः इतोधिकमनार्षंस्यात्तंत्रेकात्यायनेस्फुटम् नवार्णपीठपूजाविधावेता एवत्रयो
विंशतिः तल्लक्षणंव्याप्तिचित्योःत्यागश्चतदयुक्तम् कात्यायनीतंत्रविरोधात् स्तुतेति याशुभहेतुरीश्वरी सुरैर्ब्रह्मादिभिः पूर्वंस्तुतातथाइंद्रेणचमहिषवधेसत्यभी
ष्टस्यसंश्रयात्दिनेषुप्रतिदिनंसेवितासानः शुभानिभद्राणि अतिशयितसुभानिकरोतुआपदश्चहंत्वित्यन्वयः ३५ येति सांप्रतंचयाईशासुरैरस्माभिःउद्धत

स्तुतासुरैः पूर्वमभीष्टसंश्रयात्तथासुरेंद्रेणदिनेषुसेविता करोतुसानःशुभहेतुरीश्वरीसुभानिभद्राण्यभिहंतुचापदः ३५ यासां
प्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहंतिनः सर्वापदोभक्तिविनम्रमूर्तिभिः ३६ ऋ
षिरुवाच एवंस्तवादियुक्तानांदेवानांतत्रपार्वती स्नातुमभ्याययौतोयेजाह्नव्यानृपनंदन ३७ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः
स्तूयतेत्रका शरीरकोशतश्चास्याःसमुद्भूताब्रवीच्छिवा ३८ दैत्यपीडितैः नमस्यतेस्तूयतेचकरोतुसानइत्यनेनान्वयः ३६ ऋषिरुवाच एवमिति तत्रदे
वसन्निहितेहेराजन् पार्वतीजाह्नव्यास्तोयेस्नातुमिवस्वीयस्तवादियुक्तानामभिसंमुखंययावित्यर्थः ३७ तथापितेषामज्ञानंदृष्ट्वाकास्तूयत इति पृच्छति सो
ति कामदन्यास्तूयते यन्मांनाभिभाषथमदन्यायाअभावः ततोप्यज्ञानमेवदृष्ट्वातेषांदययास्वयमब्रवीत् अस्याइत्युक्तिः राजानंप्रतिकृषेःशरीररूपात्को
शतोगृहात्समुद्भूतासत्वप्रधानांशेनप्रादुर्भूता ऽतएवशिवाअब्रवीदित्यर्थः ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमब्रवीत्तदाह स्तोत्रमिति समेतैः मिलितैः रणे निशुंभेन पराजितैः अतएव शुंभेन निराकृतैः स्वर्गादिति शेषः ३९ शरीरेति यत् निर्गता तत् कोशिकी निगीयते इत्य-
न्वयः कौशिकीति पृषोदरादित्वात्साधुतालव्यमिदम् ४० तस्यामिति कृष्णा सहोदरीत्वात्तमः प्रधानशिवशक्तित्वाच्च कृष्णा वर्णत्वं सरस्वत्याः प्रादुर्भूतत्वाच्च-
शिवशक्तेस्तत एव पुनः सरस्वत्या निर्ममइतिबोध्यम् तदारभ्य शिवः कालीपतिरितिबोध्यम् आश्रयः स्थानं तदुक्तं वैकृतिकरहस्ये गौरीदेहात्समुद्भूता यासत्वै-
कगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी दधौचाष्टभुजा बाणमुसले शूलचक्रभृत् शंखं घंटां लांगलं च कार्मुकं वसुधाधिप एषा संपूजिता भ

स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृतैः देवैः समेतैः समरे निशुंभेन पराजितैः ३९ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृतांबिका कौशि
कीति समस्तेषु ततो लोकेषु गीयते ४० तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती तस्या सर्वज्ञत्वं प्रयच्छति शिवपुराणसंहितायां दैत्यौ
शुंभनिशुंभाख्यौ भ्रातरौ संबभूवतुरिति याचितं तपसा ताभ्यां ब्रह्मणः परमेष्ठिनः अवध्यत्वं जगत्यस्मिन्पुरुषैरखिलैरपि अयोनिजा तु या कन्या स्वयंग-
कोशात्समुद्भवा अजातपुंस्पर्शरतिरविलंबपराक्रमा तस्या वध्यौ तु भौ संख्ये तस्यां कामाभिभूतये इतिचाभ्यर्थितो ब्रह्मा ताभ्यां प्राह तथास्त्विति तत
स्ताभ्यां जगति उपद्रुते तयोर्वधाय देवेशं ब्रह्मा प्रार्थितवान् शिवम् विनिंद्यापि रहस्यं वा क्रोधयित्वा यथा तथा तद्वर्णकोशजां शक्तिमकामां कन्यकां सि
काम् निशुंभशुंभयोर्हंत्रीं देवेभ्यो दातुमर्हसि एवमभ्यर्थितो धात्रा भगवान्नीललोहितः कालीत्याह रहस्यं वामित्युक्त्वा क्रुद्धां तां द्रष्टुं क्रीडार्थं काली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तुतमितिशिवस्योक्तेः भूयसीचतवप्रीतिरगौरमितिमेवपुः कालोक्तिरपिकालीतिघटतेकथमन्यथेतिदेवीवचनमुपन्यस्यकथंचिद्देवीदेवाज्ञयादेवीगौतमाश्र
मंप्राप्यतपश्चरित्वारजोगुणाधिकात् अक्षगुणोगौररूपंप्राप्यनीलकोशमुत्सृष्टवती ततः कोशादुद्भूताकौशिकीत्युक्तम् तत्कोशंसहसोत्सृज्यगौरीसास
मजायत सातुमायात्मिकाशक्तिर्योगनिद्राहरेःस्मृतेति ततः प्रत्यागतयादेव्यादेवंप्रतिकौशिकीमहिमाकथितः किंदेवेननसादृष्टायास्सृष्टेकौशिकीमया
तादृशीकन्यकालोकेनभूतानभविष्यति अजातपुंस्पर्शरतिरधृष्यावातिसुंदरीति ४१ ततोंबिकामिति परमुत्कृष्टम् ४२ ताभ्यामिति शुंभाये

कालिकेतिसमाख्याताहिमाचलकृताश्रया ४१ ततोंबिकांपरंरूपंबिभ्राणांसुमनोहरम् ददर्शचंडोमुंडश्चभृत्योसुंभनिशुंभयोः
४२ ताभ्यांसुंभायचाख्यातासातीवसुमनोहरा काप्यास्तेस्त्रीमहाराजभासयंतीहिमाचलम् ४३ नैवतादृक्क्वचिद्रूपंदृष्टंकेनचि
दुत्तमम् ज्ञायतांकाप्यसौदेवीगृह्यतांचासुरेश्वर ४४ स्त्रीरत्नमतिचार्वंगीद्योतयंतीदिशस्त्विषा सातुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुम
र्हति ४५ तिक्रियायोगेनचतुर्थीकापिअनिर्वाच्या ४३ नैवेति असौदेवी कापि अतोज्ञायताम् मनुष्यद्वारातत्स्वरूपंविचार्यतां गृह्यतांचअं
गीक्रियतांच ४४ ~~ननुकिमर्थमंगीकार~~स्तस्याइत्यत आह स्त्रीरत्नमिति उत्तमस्त्रीत्यर्थः भवान् तांद्रष्टुमर्हति सातवदर्शनयोग्या अतों- २९
गीक्रियतामितिभावस्तुहेतौ ४५ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri

यदिसारत्नभूताकथमस्माकंस्यादत आह यानीति यानिगजाश्वादीनिरत्नानिस्वजातिश्रेष्ठानि तुहेतौ एवंचसमस्तानिसमस्तरत्नानियतस्तवगृहे अतइयमपितवभविष्यतीतिभावः ४६ तदेवविवृणोति ऐरावतइति ४७ विमानमिति वेधसोवरप्रदस्यापियद्विमानमानीतंतदद्भुतम् एवंच

यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो त्रैलोक्येतुसमस्तानिसांप्रतंभांतितेगृहे ४६ ऐरावतःसमानीतोगजरत्नंपुरंदरात्
पारिजाततरुश्चायंतथैवोच्चैःश्रवाहयः ४७ विमानंहंससंयुक्तमेतत्तिष्ठतितेंगणे रत्नभूतमिहानीतंयदासीद्वेधसोद्भुतम् ४८
निधिरेषमहापद्मःसमानीतोधनेश्वरात् किंजल्किनींददौचाब्धिर्मालामम्लानपंकजाम् ४९ छत्रंतेवारुणंगेहेकांचनस्रा-
वितिष्ठति तथायंस्यंदनवरोयःपुरासीत्प्रजापतेः ५० मृत्योरुत्क्रांतिदानामशक्तिरीशत्वयाहृता पाशःसलिलराजस्यभ्रा
तुस्तवपरिग्रहे ५१ निशुंभस्याब्धिजाताश्चसमस्तारत्नजातयः वन्हिश्चापिददौतुभ्यमग्निशौचेचवाससी ५२

धोवर्त्तिसकलाजय्यत्वंसूचितम् बलान्नतुदत्तंदत्तवरत्वाच्चतेनोपेक्षितंइतिह्वदयम् ४८ निधिरिति किंजल्किनींतन्नामिकांददावित्यस्यभयादितिशेषः ४९ छत्रमिति कांचनस्रावि स्वर्णवर्षणशीलं प्रजापतेर्दक्षस्य अयंरिपूणामजेयः ५० मृत्योरिति उत्क्रांतिर्मरणं परिग्रहेपरिजनेकरणभूतस्त्वाहृस्तेवा ५१ निशुंभस्येति अब्धिजातारत्नजातयश्चनिशुंभस्यपरिग्रहइत्यर्थः अग्निशौचे अग्निरेवनैर्मल्यकरणंययोरित्यर्थः कल्पवृक्षोपकल्पितं अग्निप्रक्षेपान्नैर्मलंवासोयुग्मंअग्नि-
शौचाख्यमाहुः ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति तदिति कर्त्तुः शेषत्वविवक्षायांषष्ठी ५३ ऋषिरुवाच निशम्येतिसुग्रीवंतन्नामानम् ५४ इतिचेतिचेति इदंचेत्यर्थः वक्ष्यमाणस्यपरामर्शः अनेनशुं
भनिशुंभयोरजोगुणमयत्वंसूचयति अतएवतद्वधार्थंसत्वगुणप्रधानोवतारइतिबोध्यम् लघुशीघ्रम् ५५ सइति सःदूतः ततः शुंभात्सकाशात् यत्रशै

एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते स्त्रीरत्नमेषाकल्याणीत्वयाकस्मान्नगृह्यते ५३ ऋषिरुवाच निशम्येतिवचः शुंभः
सतदाचंडमुंडयोः प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरम् ५४ इतिचेतिचवक्तव्यासागत्वावचनान्मम यथाचाभ्येतिसंप्रीत्या
तथाकार्यंत्वयालघु ५५ सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने सादेवीतांततःप्राहश्लक्ष्णंमधुरयागिरा ५६ दूतउवाच
देविदैत्येश्वरःशुंभस्त्रैलोक्यपरमेश्वरः दूतोहंप्रेषितस्तेनत्वत्सकाशमिहागतः ५७ अव्याहताज्ञःसर्वासुयःसदादेवयोनिषु
निर्जिताखिलदैत्यारिःसयदाहशृणुष्वतत् ५८ ममत्रैलोक्यमखिलंममदेवावशानुगाः यज्ञभागानहंसर्वानुपाश्नामिपृथ
क्पृथक् ५९ त्रैलोक्येवररत्नानिममवश्यान्यशेषतः तथैवगजरत्नंचहृतंदेवेंद्रवाहनम् ६०

लोद्देशेसादेवी आस्तेतत्रगत्वाश्लक्ष्ण
मनुत्कटंमधुरयाकोमलयागिराप्राहेत्यन्वयः ५६ दूतउवाच देवीति नकेवलंदैत्येश्वरएव किंतुत्रैलोक्यस्यपरमेश्वरइत्यर्थः सकाशंसमीपं ५७ तदेवो
पपादयति अव्याहतेति देवयोनिषुदेवताःदेवाश्चतेजगद्योनयश्चेत्यर्थात् ५८ तदुक्तिमाह ममेति ५९ अशेषतःअशेषाणिहृतमित्यन्वयि ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीरोदेति तदश्वरत्नं त्वत्प्राइंद्राद्बलात्कारेण गृहीत्वा अमरैः प्रणिपत्य समर्पितमित्यर्थः उच्चैःश्रवसेत्यत्रापि अजितियोगविभागादच् समासांतः ६१ यानिचेति रत्नभूतानि भूतानि रत्नरूपाणि स्थितानीत्यर्थः ६२ स्त्रीति वयमित्यात्मगौरवार्थं बहुवचनम् ६३ मांवेति उरुविक्रमं महाविक्रमम् वैभसिद्धौ ६४ परमे-

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ६१ यानिचान्यानि देवेषु गंधर्वेषूरगेषु च रत्नभू तानि भूतानि तानि मय्येव शोभने ६२ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ६३ मां वा ममानुजं वापि निशुंभमुरुविक्रमम् भज त्वं चंचलापांगी रत्नभूतासि वै यतः ६४ परमैश्वर्यमतुलं प्राप्स्यसे मत्प रिग्रहात् एतद्बुध्या समालोच्य मत्परिग्रहतां व्रज ६५ ऋषिरुवाच इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भग वती भद्रा ययेदं धार्यते जगत् ६६ देव्युवाच सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् त्रैलोक्याधिपतिः शुंभो निशुं भश्चापि तादृशः ६७ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ६८ ति प्राप्स्यसइति छांद

सस्तङ् मत्परिग्रहात् मदाश्रयात् समालोच्य विचार्य मत्परिग्रहतां मत्स्त्रीत्वं ६५ ऋषिरुवाच इत्युक्तेति अंतःस्मितत्वेन सावहेलमुत्तरं सूचितम् ६६ देव्यु वाच सत्यमिति अत्र शंभविषये त्रैलोक्याधिपतिरिति समत्वं ६७ किं त्विति अत्र परिग्रहत्वविषये अल्पबुद्धित्वादिति संभवाय प्रतिज्ञाहानौ च महान्दोषः पा पंचपुरुषपरिग्रहे ६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिज्ञातमाह योमामिति जयतिसंग्रामातिरिक्तेनापिप्रकारेण संग्रामेयोमेदर्पंबलत्वाभिमानंव्यपोहति यश्चमेप्रतिबलः समानबलः पूर्वपूर्वाभावेउत्तरः तादृशश्चेत्तलज्ञएवेतिगूढ आशयः ६९ तदिति पाणिग्रहणात्पूर्वंममगमनमनुचितमितिभावः ७० दूतउवाच अवलिप्तेति अवलेपोगर्वः एवंप्रागुक्तंयदग्रेपुमान् अपिनतिष्ठेत् तदग्रेस्त्रीनतिष्ठेदेवेतिभावः ७१ नन्वहंदेवीत्यतःस्थास्यामीत्यतआह अन्येषामपीतिद्वाभ्याम् एकिकेतिकुत्सायामसस्कृत्

योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति योमेप्रतिबलोलोकेसमेभर्त्ताभविष्यति ६९ तदागच्छतुशुंभोत्रनिशुंभोवामहासुरः मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु ७० दूतउवाच अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः त्रैलोक्येकःपुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः ७१ अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि तिष्ठंतिसंमुखेदेविकिंपुनःस्त्रीत्वमेकिका ७२ इंद्राद्याःसकलादेवास्तस्थुर्येषांनसंयुगे शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसंमुखम् ७३ सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवामागमिष्यसि ७४ देव्युवाच एवमेतद्बलीशुंभोनिशुंभश्चातिवीर्यवान्

७२ ७३ उपसंहरति सात्वमिति मयैवेत्यनेनागमनेनतेषांसर्वेषांदुष्टतयागौरवंनतिष्ठेदित्यर्थः तदेवविपक्षेबाधकमाह केशाकर्षणेननिर्धूतंखंडितंगौरवंयस्यास्तादृशीमागमिष्यसि अङितुमानजोर्थःसकाकुश्च ७४ देव्युवाच एवमेतदिति सोपहासंयत् यतःप्रतिज्ञेत्यस्यकृतेतिशेषः ७५

CC-0. In Public Domain. Digitization by eGangotri

सत्वमिति मयायदेतदुक्तंतत्सर्वमादृतःसन्नृतस्मैआचक्ष्वसःयुक्तंतत्करोतुचेत्यन्वयःआदृतइत्यनेनान्यूनानतिरिक्तंवदेतिसूच्यते ७६ इतिशिवभट्टसुतसती
गर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेपंचमोऽध्यायः ५ ऋषिरुवाच इतीति अमर्षःकोपःसमाचष्ट उक्तवान् १ तस्येति दैत्यानाम-

किंकरोमिप्रतिज्ञामेयदनालोचितापुरा ७५ सत्वंगच्छमयैवोक्तंयदेतत्सर्वमादृतः तदाचक्ष्वासुरेंद्रायसचयुक्तंकरोतुतत् ७६
इतिश्रीमार्कंडेयपुराणे०मन्वंतरेदेवीमाहात्म्येदेवीदूतसंवादेपंचमोऽध्यायः ५ ऋषिरुवाच इत्याकर्ण्यवचोदेव्याः
सदूतोऽमर्षपूरितः समाचष्टसमागम्यदैत्यराजायविस्तरात् १ तस्यदूतस्यतद्वाक्यमाकर्ण्यासुरराट्ततः सक्रोधःप्राहदै
त्यानामधिपंधूम्रलोचनम् २ हेधूम्रलोचनाशुत्वंस्वसैन्यपरिवारितः तामानयबलाद्दुष्टांकेशाकर्षणविह्वलाम् ३ तत्प
रित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः सहंतव्योमरोवापियक्षोगंधर्वएववा ४ ऋषिरुवाच तेनाज्ञप्तस्ततःशीघ्रंस-
दैत्योधूम्रलोचनः वृतःषष्ट्यासहस्राणामसुराणांद्रुतंययौ ५ सदृष्ट्वातांततोदेवींतुहिनाचलसंस्थिताम् जगादोच्चैः
प्रयाहीतिमूलंशुंभनिशुंभयोः ६

धिपंसेनापतिम् २ हेइति दुष्टांदुर्वचनाम् विह्वलामाकुलाम् ३ ४ ऋषिरुवाच तेनेति सहस्रा
णामसुराणांषष्ट्यावृतइत्यन्वयः ५ सदृष्ट्वेति तुहिनंहिमम् मूलंसमीपम् ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स॰स॰ विपक्षेबाधकमाह नचेदिति तर्हीत्यर्थः ७ देव्युवाच दैत्येश्वरेणेति एवंकेशाकर्षणविह्वलाम् बलात्सामर्थ्यसत्ता अवशतात्त्व सावष्टंभोक्तिरेषा ८ ऋषि अ॰
३२ रुवाच इतीति तंसाभस्मचकारेत्यन्वयः ९ अथेति अंबिकाकर्त्री अतएवतथास्वारस्यम् १० निर्नायकसैन्येदेव्याः प्रयासोव्यर्थइतिमत्वासिंहोयुयुधे ६

नचेत्स्त्रीत्वाद्यभवतीमद्भर्त्तारमुपैष्यति ततोबलान्नयाम्यद्यकेशाकर्षणविह्वलाम् ७ देव्युवाच दैत्येश्वरेणप्रहितोबल
वान्बलसंवृतः बलान्नयसिमामेवंततःकिंतेकरोम्यहम् ८ ऋषिरुवाच इत्युक्तःसोभ्यधावत्तामसुरोधूम्रलोचनः हुं
कारेणैवतंभस्मसाचकारांबिकाततः ९ अथक्रुद्धंमहासैन्यमसुराणांतथांबिका ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः १०
ततोधुतसटःकोपात्कृत्वानादंसुभैरवम् पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः ११ कांश्चित्करप्रहारेणदैत्यानास्येनचा
परान् आक्रांत्याचाधरेणान्यान्जघानसमहासुरान् १२ केषांचित्पाटयामासनखैःकोष्ठानिकेसरी तथातलप्रहारेण
शिरांसिकृतवान्पृथक् १३ विच्छिन्नबाहुशिरसःकृतास्तेनतथापरे पपौचरुधिरंकोष्ठादन्येषांधुतकेसरः १४

ततइति तत्रहेतुगर्भविशेषणम् स्ववाहनइति अर्द्धर्चादित्वात्पुंस्त्वंस्वीयवाहनइत्यर्थः पपातप्राविशत् ११ कांश्चिदिति ससिंहः आक्रांतिराक्रमणंतेन- ३२
चअधरेणअधरकायेनाधरोष्ठेनच अन्यान् महासुरान्दैत्यान्जघानेत्यन्वयः १२ केषामिति कोष्ठानितुउदरमध्यानिततोविस्तृतांगुलिःपाणिः १३ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५ श्रुत्वेति क्षयितमिति क्षयशब्दादाख्यातसन्नंतात्क्तः कृतक्षयमिति १६ तौपूर्वौ १७ हेचंडेति बहुलैर्बहुभिरित्यर्थः गच्छतगच्छतंछंदोनुरोधाद्विंदु
लोपः लघुशीघ्रम् १८ आनयनेप्रकारद्वयमाह केशेष्विति आकर्षणमात्रादनागमनेबंधनंचइतिगौरवाद्बहुवचनं तृतीयासहयुधियुद्धेप्रसक्तेयदित-

क्षणेनतद्बलंसर्वंक्षयंनीतंमहात्मना तेनकेसरिणादेव्यावाहनेनातिकोपिना १५ श्रुत्वातमसुरंदेव्यानिहतंधूम्रलोचनम् बलंच
क्षयितंकृत्स्नंदेवीकेसरिणाततः १६ चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिताधरः आज्ञापयामासचतौचंडमुंडौमहासुरौ १७ हेचंडहेमुं
डबलैर्बहुलैःपरिवारितौ तत्रगच्छतगत्वाचसासमानीयतांलघु १८ केशेष्वाकृष्यबध्वावायदिवःसंशयोयुधि तदाशेषायुधैःसर्वै
रसुरैर्विनिहन्यताम् १९ तस्यांहतायांदुष्टायांसिंहेचविनिपातिते शीघ्रमागम्यतांबध्वागृहीत्वातामथांबिकाम् २० इतिश्रीमार्कं
डेयपुराणेसावर्णिकेमन्वं० धूम्रलोचनवधोनामषष्ठोऽध्यायः ६ ऋषिरुवाच आज्ञप्तास्तुततोदैत्याश्चंडमुंडपुरोगमाः चतुरंग
बलोपेताययुरभ्युद्यतायुधाः १

थानयनेसंदेहस्तदासर्वैर्दैत्यैः सकलायुधैः साविशेषेणनिहन्यतांमार्यतामित्यर्थः १९ उपसंहरति आगम्यता
मित्यंतेनसर्वथागृहीतुमशक्याचेदेवंहंतव्यानान्यथेत्याह बध्वेति अथेतिपक्षांतरे यदाशक्यतेतर्हिबध्वातांगृहीत्वैवागंतव्यमित्यर्थः २० इतिशिवभट्टसु
तसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेषष्ठोऽध्यायः ६ ऋषिरुवाच आज्ञप्ताइति शैलेंद्रशृंगे हिमाचलशृंगेसिंहस्योपरीतिस्थितामित्यन्वयः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ तेइति चंडादयः समप्रधानाः समादातुंगृहीतुंउद्यमंउद्योगंउद्यताःउत्साहवंतः आकृष्टंआकर्णांतकृष्टंचापंयैस्तेकोशोद्धृतासयश्चतत्समीपगाः गृहीतुमुद्यतानांरक्षणार्थंसमीपगाइत्यर्थः ३ अनेनचंडादीनामितितामसत्वंसूचितम् अतस्तद्वधार्थंतामसीप्रादुर्भावमाह ततइति मषीलिपिसाधनद्रव्यम् तद्वत्

ददृशुस्तेततोदेवीमीषद्धासांव्यवस्थिताम् सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने २ तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः आकृष्टचापासिधरास्तथान्येतत्समीपगाः ३ ततःकोपंचकारोच्चैरंबिकातानरीन्प्रति कोपेनचास्यावदनंमषीवर्णमभूत्तदा ४ भ्रुकुटीकुटिलात्तस्याललाटफलकाद्द्रुतम् कालीकरालवदनाविनिष्क्रांतासिपाशिनी ५ विचित्रखट्वांगधरानरमालाविभूषणा द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा ६ अतिविस्तारवदनाजिह्वाललनभीषणा निमग्नारक्तनयनानादापूरितदिङ्मुखा ७ सावेगेनाभिपतिताघातयंतीमहासुरान् सैन्येतत्रसुरारीणामभक्षयततद्बलम् ८

श्यामवर्णंनिःसरमाणकालीप्रतिबिंबादितिभावः ४ भ्रुकुटीति तस्याःकुपितदेव्याःविनिष्क्रांतानिःसृता ५ विचित्रेति खट्वांगंपदिकाकंकालपंजरस्थंवा नरमालेत्यत्रनरशब्दस्तन्मुंडलाक्षणिकः द्वीपीव्याघ्रःशुष्कमांसानिर्मांसदेहा अतएवातिभैरवा ६ अतीति अतिशयितोविस्तारोयस्यतादृशंवदनंयस्याइत्यर्थः ललनंचालनंनिमग्नातिनिम्नप्रविष्टानि आरक्तानिनयनानियस्यास्त्रिनेत्रत्वात् ७ ८ छ छ छ छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्ष्णीति पार्ष्णिग्राहोगजपार्ष्णिरक्षकः अंकुशग्राही महामात्रः योधोगजारूढोवीरः ९ तथैवेति योधमिति जात्यावेकवचनम् एवंरथमपरमन्यमित्या दानम् चर्वयंतीति वर्त्तमानसामीप्ये भूतेलट् अतिभैरवमितिक्रियाविशेषणम् १० एकमिति अपोथयत् अवधीत् ११ तैरिति मथितान्यपिमथितानि

पार्ष्णिग्राहांकुशग्राहीयोधघंटासमन्विताम् समादायैकहस्तेनसुरवेविक्षेपवारणान् ९ तथैवयोधंतुरगैरथंसारथिनासह नि क्षिप्यवक्त्रेदशनैश्चर्वयंत्यतिभैरवम् १० एकंजग्राहकेशेषुग्रीवायामथचापरम् पादेनाक्रम्यचैवान्यमुरसान्यमपोथयत् ११ तैर्मुक्तानिचशस्त्राणिमहास्त्राणितथासुरैः मुखेनजग्राहरुषादशनैर्मथितान्यपि १२ बलिनांतद्बलंसर्वमसुराणांमहात्मनाम् ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा १३ असिनानिहताःकेचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसुरादंताग्राभिहता स्तथा १४ क्षणेनतद्बलंसर्वमसुराणांनिपातितम् दृष्ट्वाचंडोभिदुद्रावतांकालीमतिभीषणाम् १५ शरवर्षैर्महाभीमैर्भीमाक्षीं तांमहासुरः छादयामासचक्रैश्चमुंडःक्षिप्तैःसहस्रशः १६

चकारेत्यन्वयः १२ बलिनामिति महात्मनांमहादेहानाम् १३ १४ १५ शरवर्षैरिति चंडःशरवर्षैःमुंडःसहस्रशःक्षिप्तैश्चक्रैः छादयामासइत्यन्व यः एवंपूर्वश्लोकेचंडग्रहणंमुंडस्याप्युपलक्षणम् १६ ७९ ७९ ७९ ७९ ७९ ७९ ७९ ७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तानीति मुखंविशमानानिव घनोदरंविशमानान्यर्कबिंबानीवबभुः शानच्छांदसः १७ ततइति भीमभितिक्रियाविशेषणम् वक्त्रांते वक्त्रमध्येविकटदंतत्वात् दुर्दर्शाः येदशनाः तेषांतेजसाउज्ज्वलातेजोमया १८ उत्थायचेति महासिंहंमहाखड्गंउत्थायउत्थाप्यउद्यमसकोपवारणंयथास्यात्तथा हमित्युक्त्वादेवींचंडम-

तानिचक्राण्यनेकानिविशमानानितन्मुखम् बभुर्यथार्कबिंबानिसुबहूनिघनोदरम् १७ ततोजहासातिरुषाभीमंभैरवनादिनी काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला १८ उत्थायचमहासिंहंदेवीचंडमधावत गृहीत्वाचास्यकेशेषुशिरस्तेनासिनाच्छिनत् १९ अथ मुंडोभ्यधावत्तांदृष्ट्वाचंडंनिपातितम् तमप्यपातयद्भूमौसाखड्गाभिहतंरुषा २० हतशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितम् मुंडं चसुमहावीर्यंदिशोभेजेभयातुरम् २१ शिरश्चंडस्यकालीचगृहीत्वामुंडमेवच प्राहप्रचंडाट्टहासमिश्रमभ्येत्यचंडिकाम् २२ मयातवात्रोपहृतौचंडमुंडौमहापशू युद्धयज्ञेस्वयंशुंभंनिशुंभंचहनिष्यसि २३ ऋषिरुवाच तावानीतौततोदृष्ट्वाचंडमुंडौमहासुरौ उवाचकालींकल्याणाललितंचंडिकावचः २४

धावत अस्यचंडस्यतेनोद्यतेन १९ अथेति खड्गादिभिर्हतं पूर्वोद्यतखड्गाभिहतं अस्यशिरोनच्छिन्नंखड्गप्रहारमात्रम् २० २१ शिरइति मुंडंसाशिरस्कंसदेहमित्यर्थः प्रचंडाट्टहासेनमिश्रंयुक्तंयथाभवतितथाचंडिकांयल्ललाटफलकान्निर्गतांतांदेवींप्राहेत्यर्थः २२ मयेति अत्रयुद्धयज्ञेमहापशूइतिरूपकंउपहृतौप्रधानांगद्वारेणचंडस्योपहारः २३ ऋषिरुवाच ताविति कालींललाटभवांकल्याणीति कर्तृविशेषम् चंडिकाकौशिकी २४

CC-0. In Public Domain. Digitization by eGangotri

यस्मादिति चंडंशिरोद्वाय हेदेविख्याताभविष्यसीत्यन्वयः चामुंडेति पृषोदरादित्वात्साधुः अनेनेयंतामसीकौशिकीजन्याकालीकौशिकीनियम्याभवतीत्याहुः २५
इतिशिवभट्टसुतनागोजीभट्टकृतेसप्तशतीव्याख्यानेसप्तमोऽध्यायः समाप्तः ७ चंडेइति क्षयितेषुकृतक्षयेषु १ ततइति तेषांवधजकोपेनास्वाधीनचेताः

यस्माच्चंडंचमुंडंचगृहीत्वात्वमुपागता चामुंडेतिततोलोकेख्यातादेविभविष्यसि २५ इतिश्रीमार्कंडेयपुराणेसावर्णिके॰
देवीमाहात्म्येचंडमुंडवधोनामसप्तमोऽध्यायः ७ ऋषिरुवाच चंडेचनिहतेदैत्येमुंडेचविनिपातिते बहुलेषुचसै
न्येषुक्षयितेष्वसुरेश्वरः १ ततःकोपपराधीनचेताःशुंभःप्रतापवान् उद्योगंसर्वसैन्यानांदैत्यानामादिदेशह २अद्यस
र्वबलेर्दैत्याःषडशीतिरुदायुधाः कंबूनांचतुरशीतिर्निर्यांतुस्वबलैर्वृताः ३ कोटिवीर्याणिपंचाशदसुराणांकुलानिवै शतं
कुलानिधौम्राणांनिर्गच्छंतुममाज्ञया ४ कालकादौर्हृदामौर्याःकालकेयास्तथासुराः युद्धायसज्जानिर्यांतुचाज्ञयात्वरि
ताममम ५ इत्याज्ञाप्यासुरपतिःशुंभोभैरवशासनः निर्जगाममहासैन्यःसहस्रैर्बहुभिर्वृतः ६ अतएवस्त्रीवधेप्यस्यप्रवृत्तिरितिभा
वः सर्वसैन्यानामितिदैत्यानांविशेषणम् २ अद्येतिउदायुधास्तत्संज्ञकाश्च कंबूनांतन्नाम्नांचतुराशीतिर्दैत्याइतिशेषः ३ कोटीति कोटिवीर्याणितन्नामा-
नि धौम्राःधूम्रवंश्याः ४ कालकाःतन्नामानः दौर्हृदाःदुर्हृदोपत्यानि मौर्याःतन्नामानः तथाकालकायाअपत्यानिकालकेयाःअसुराःसज्जाःससामग्रीकाः
५ इतीति भैरवशासनम् ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आयांतमिति आगतमित्यर्थः अंतरंमध्यम् ७ ततइति तन्नादानितिबहुवचनंमहानादमित्येकत्वाविवक्षया अतीवेत्यस्यानेकवारमित्यर्थेवा उपबृंहयदित्य
व्यागमशास्त्रस्यानित्यत्वात् अड्भावः ८ धनुरिति नादैःस्वीयैरापूरितदिङ्मुखाकालीधनुर्ज्यासिंहघंटानांभीषणैर्नादैर्जिग्येजितादेव्याधनुरादिशब्दैः

आयांतंचंडिकादृष्ट्वातत्सैन्यमतिभीषणम् ज्यास्वनैःपूरयामासधरणीगगनांतरम् ७ ततःसिंहोमहानादमतीवकृतवान्नृप
घंटास्वनेनतन्नादानंबिकाचोपबृंहयत् ८ धनुर्ज्यासिंहघंटानांनादापूरितदिङ्मुखा निनादैर्भीषणैःकालीजिग्येविस्तारिता
नना ९ तन्निनादमुपश्रुत्यदैत्यसैन्यैश्चतुर्दिशम् देवीसिंहस्तथाकालीसरोषैःपरिवारिताः १० एतस्मिन्नंतरेभूपविनाशा
यसुरद्विषाम् भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेशगुहविष्णूनांतथेंद्रस्यशक्तयः शरीरेभ्योविनिष्क्रम्यत
द्रूपैश्चंडिकांययुः १२ यस्यदेवस्ययद्रूपंयथाभूषणवाहनम् तद्वदेवहितच्छक्तिरसुरान्योद्धुमाययौ १३ हंसयुक्तविमा
नाग्रेसाक्षसूत्रकमंडलुः आयाताब्रह्मणःशक्तिर्ब्रह्माणीसाभिधीयते १४

कालीशब्दोजितइतिभावः ९ तदिति कालीचंडीललाटजा
सरोषैःसक्रोधैः १० एतस्मिन्निति देवीदानवसंपातावसरे भवायसंपदे ११ ब्रह्मेति विष्णुशब्देनवराहनृसिंहावपिशक्तयःस्वातिरेकिण्योदेवताः शक्तिश ३५
क्तिमतोस्तादात्म्यात् १२ ब्रह्मादिरूपैरित्यर्थकंतद्रूपैरितिव्याचष्टे यस्येति तद्वत्तथाविधरूपभूषणवाहनेत्यर्थः १३ हंसेति विमानाग्रेइत्यस्यास्थितेतिशेषः

CC-0. In Public Domain. Digitization by eGangotri

अक्षसूत्रंजपमालाब्रह्माणीब्रह्माणमानयतिवेष्टयतीतिव्युत्पत्त्यायंशब्दःसाधुः १४ माहेश्वरीति महाहीतक्षकानंतौवलयौचंद्ररेखाचंद्रकलासैवविभू
षणंयस्याः १५ कौमारीति गुहरूपिणी गुहसमानाकारा कुमारसंबंधिनीशक्तिरायया विस्यर्थान्नपौ नरुत्त्वम् ऐंद्रीत्युक्तापियथाशक्रस्तथैवसेतिवत्-
अंबिकापदेनगुहस्यशिवव्यूहत्वंसूचयति १६ तथैवेति अत्रशार्ङ्गपदेनबाणोप्युपलक्ष्यते बाहुभिर्गरुडारूढाशंखचक्रगदासिनी शार्ङ्गबाणधराजाता

माहेश्वरीवृषारूढात्रिशूलवरधारिणी महाहिवलयाप्राप्ताचंद्ररेखाविभूषणा १५ कौमारीशक्तिहस्ताचमयूरवरवाहना यो-
द्धुमभ्याययौदैत्यानंबिकागुहरूपिणी १६ तथैववैष्णवीशक्तिर्गरुडोपरिसंस्थिता शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपा
ययौ १७ यज्ञवाराहमतुलंरूपंयाबिभ्रतोहरेः शक्तिःसाप्याययौतत्रवाराहींबिभ्रतीतनुम् १८ नारसिंहीनृसिंहस्यबि
भ्रतीसदृशंवपुः प्राप्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्तातथैवैंद्रीगजराजोपरिस्थिता प्राप्तासहस्रनयनायथाशक्र
स्तथैवसा २०

वैष्णवीरूपशालिनीतिवामनपुराणात् एतेनास्याः षड्भुजात्वंसूचितम् १७ यज्ञेतियज्ञांगकल्पितंवराहाकारं बिभ्रतोहरेरित्यनेनास्याःविष्णुत्व
मेवेतिसूचितम् एवंनृसिंहोपि तत्रैवकालीपुराणे शरभवराहयुद्धेविष्णोःशरभपक्षपातित्वंवराहबलहारकत्वमुक्तम् नृसिंहस्यचवराहानुयायित्वमुक्तंविरु-
द्धतेतिवाच्यम् तस्यलीलामात्रत्वात् १८ १९ वज्रेति यथाशक्रइत्याकारपरम् एवंचसर्वास्तत्तदाकारताद्रष्टव्या गजराजऐरावतः २० ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिविशिष्टतेजसः कौशिक्याः सविधियंतु मशक्तास्तादेवशक्तीरीशानोदेव्यैदर्शितवानित्याह ततइति ताभिः परिवृतः ईशानः ममप्रीत्याएताभिर्देवशक्ति अ.
स.स. भिःसहासुराहन्यंतामितिचंडिकामाहेत्यन्वयः स्वशक्तेः पार्वत्याः प्रादुर्भूतत्वेन धृष्टतयाईशान एवतथोक्तवानितिभावः अंडाधिकारिण इमेब्रह्मादयः अंडांतरा- ८
३६ धिकारिणांशुंभादिजितत्वेनधृष्टत्वासंभवात् २१ स्वस्यापिसहायप्रदर्शनेनैषादृशाभगवतीतस्योत्तरंनाह किंतु काचिन्नशक्तिरित्याह ततइति अतिभीष

ततःपरिवृतस्ताभिरीशानोदेवशक्तिभिः हन्यंतामसुराः शीघ्रंममप्रीत्याहचंडिकाम् २१ ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी २२ साचाहधूम्रजटिलमीशानमपराजिता दूतत्वंगच्छभगवन्पार्श्वंशुंभनिशुंभयोः २३ ब्रूहिशुंभंनिशुंभंचदानवावतिगर्वितौ येचान्येदानवास्तत्रयुद्धायसमुपस्थिताः २४ त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः यूयंप्रयातपातालंयदिजीवितुमिच्छथ २५

णादर्शनमात्राद्भयकरी अत्युग्रारौद्रस्वभावा शिवानांशृगालीनांशतेननिनादिनी शतशब्दोऽनंतवाची निनदद्नंतशिवावृता २२ साचेति धूम्रजटिलंधूम्रवर्णजटावंतं अपराजिता तदाख्या अपरैरजिताचदूतभावंवार्तावहत्वंग
च्छशुंभनिशुंभयोःपार्श्वंविगच्छेत्यन्वयःआहेतिनिपातः कालमात्रेतेनाब्रवीदित्यर्थः त्रिमूर्त्यंतेनाशिवापेक्षयायस्याःकौशिक्यास्तत्प्रादुर्भावकसमक्षतयाआ ३६
धिक्येनतस्यदूत्येनत्प्रेषणंनानुचितम् २३ ब्रूहीति येचतत्रशुंभांतिकेऽन्येदानवास्तांश्चब्रूहीत्यन्वयःयुद्धायसुद्धंकर्तुम् २४ वचनमाह त्रैलोक्यमितिस्पष्टम् २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलेति अवलेपोगर्वः मच्छिवाःयामयासहहनिनदंत्यः प्रादुर्भूताः पिशितंमांसम् २६ यतइतिदूत्यमेवदौत्यम् प्रज्ञाद्यण्शिवदूतीगौरादित्वात्ङीप् आर्षांगपू
र्वपदादितिवा २७ तेपीति अमर्षेण सर्वतःपूरिताः यतः यंदेशमाक्रम्यकात्यायनीस्थितातंदेशंजग्मुरित्यन्वयः मूलशक्त्यभेदेतस्या अपिकात्यायनी
त्वोक्तिः २८ ततइति प्रथममादौअग्रेसंमुखेववर्षुरितिगुणःछांदसः उद्धतः प्रकटः अनेनस्त्रीप्रथमतोहंतुमयोग्येतिविवेकराहित्येनरौद्राविष्टत्वंसूचि-

बलावलेपादथचेद्भवंतोयुद्धकांक्षिणः तदागच्छततृप्यंतुमच्छिवाःपिशितेनवः २६ यतोनियुक्तोदौत्येनतयादेव्याशिवःस्वय
म् शिवदूतीतिलोकेस्मिंस्ततःसाख्यातिमागता २७ तेपिश्रुत्वावचोदेव्याःशर्वाख्यातंमहासुराः अमर्षापूरिताजग्मुर्यतःका
त्यायनीस्थिता २८ ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवीममरारयः २९ साचतान्प्रहितान्बा-
णान्शूलशक्तिपरश्वधान् चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथाकालीशूलपातविदारितान् खट्वां
गपोथितांश्चान्यान्कुर्वतीव्यचरत्तदा ३१ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणीचाकरोच्छत्रून्येनयेनस्मधावति
३२

तम् २९ ३० तस्येति तस्या अग्रतइतिच्छेदः छांदसः संधिः तथाचंडीवत् तदादेव्याशस्त्रच्छेदोखट्वांगं कंकालपंजरम् पट्टिकावा कालीललाटजा कुर्व
तीनुक्तशास्त्राभावात् ३१ कमंडल्विति आक्षेपः प्रक्षेपः वीर्यंबलम् हततेजसः धावतीतिस्मयोगेभूतेलट् येनयेनप्रदेशेन ३२ ६९ ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

माहेश्वरीतिस्पष्टम् ३३ ऐंद्रीति दैत्यदानवयोर्मातृतोभेदः ऐंद्र्याःकुलिशपातेनेत्यर्थः३४तुंडेति वाराहीचासौमूर्त्तिश्च वाराहमूर्त्तिस्तयाचक्रेणेत्यनेनवाराह्यासु रवमेववराहसदृशंनत्वन्यत् एवंशक्तिमतोवराहस्यापिबोध्यम् ३५ नखैरिति आजौरणेअंबरमाकाशम् ३६ चंडेति चंडउत्कटः सकोपोवाशिवदूत्यभिदूषि

माहेश्वरीत्रिशूलेनतथाचक्रेणवैष्णवी दैत्यान्जघानकौमारीतथाशक्त्यातिकोपना ३३ ऐंद्रीकुलिशपातेनशतशोदैत्यदानवाः पेतु र्विदारिताभूमौरुधिरौघप्रवर्षिणः ३४ तुंडप्रहारविध्वस्तादंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्यान्यपतंश्चक्रेणचविदारिताः ३५ नखैर्विदा रितांश्चान्यान्भक्षयंतीमहासुरान् नारसिंहीचचाराजौनादापूर्णदिगंबरा ३६ चंडाट्टहासैरसुराःशिवदूत्यभिदूषिताः पेतुर्विदारि ताभूमौतांश्चखादाथसातदा ३७ इतिमातृगणंक्रुद्धंमर्दयंतंमहासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ पलायन परान्दृष्ट्वादैत्यान्मातृगणार्दितान् योद्धुमभ्याययौक्रुद्धोरक्तबीजोमहासुरः ३९ रक्तबिंदुर्यदाभूमौपतत्यस्यशरीरतः

ताइतितृतीयासमासः प्रापितमूर्च्छा साशिवदूती ३७ इतिपूर्वोक्तैरभ्युपायैःसंग्रामसाधनैः दैत्यान्मर्दयंतंमातृगणंदृष्ट्वानेशुःपलायिताइत्यन्वयः ब्रह्मा- ण्याद्या अष्टमातरः ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीनारसिंह्यैंद्रीचामुंडामातरःस्मृताइतिडामरतंत्रेनवार्णविधानेउक्ताः ३८ पलाय नेति रक्तंबीजंकारणंयस्यसः रक्तबीजः ३९ तदेवाह रक्तेति अस्यरक्तबीजस्यमेदिन्याःमेदिन्यांस्थित्वेत्यर्थः ल्यप्लोपेपंचमी ४० ७५

CC-0. In Public Domain. Digitization by eGangotri

सरक्तबीजः ४१ कुलिशेनेति तस्यरक्तबीजस्य ४२ यावंतइति वीर्यप्रभावः बलंशारीरंविक्रमः उत्साहरूपः ४३ तइति समंसह अत्युग्रेतिशस्त्रविशेषणंसमस्तम्

ससमुत्पततिमेदिन्यास्तत्प्रमाणोमहासुरः ४० युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः ततश्चैंद्रीस्ववज्रेणरक्तबीजमताडयत् ४१
कुलिशेनाहतस्याशुबहुसुस्रावशोणितम् समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः ४२ यावंतःपतितास्तस्यशरीराद्रक्तबिं
दवः तावंतःपुरुषाजातास्तद्वीर्यबलविक्रमाः ४३ तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः सममातृभिरत्युग्रशस्त्रपातातिभीष
णम् ४४ पुनश्चवज्रपातेनक्षतमस्यशिरोयदा ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः ४५ वैष्णवीसमरेचैनंचक्रेणाभि
जघानह गदयाताडयामासऐंद्रीतमसुरेश्वरम् ४६ वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः सहस्रशोजगद्व्याप्तंतत्प्र-
माणैर्महासुरैः ४७ शक्त्याजघानकौमारीवाराहीचतथासिना माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरम् ४८ सचापिग
दयादैत्यःसर्वाएवाहनत्पृथक् मातृःकोपसमाविष्टोरक्तबीजोमहासुरः ४९

४४ पुनश्चेति ववाहेतिबहिर्गताविस्यस्यरूपम् ४५ वैष्णवीति ऐंद्र्याःशक्तेरिनंपराङ्मुखंस्वसंमुखंप्राप्तंएनंवैष्णवीचक्रेणाभिजघानगदयाचताडयामा-
सेत्यन्वयः ४६ ४७ शक्त्येति ४८ सचापीति अहनदितिछांदसंदितेरपत्यंदैत्यः महांतोसुराः यस्मादितिनपौनरुक्त्यम् ४९ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५० तैश्चेति उत्तमंनिरतिशयंसकलंजगदित्यतिशयोक्तिः ५१ तानिति तान् विषण्णान् दृष्ट्वासत्वरात्वरया सहिताचंडिकासुरान्प्राह यूयंमाविषीदतेतिशेषः५२
एवंसुरानाश्वास्यविस्तीर्णवदनेनरक्तबिंदोरितिजात्यपेक्षयाततोजातान्महासुरान् मच्छस्त्रपातसंभूतान् रक्तविंदूंश्चक्षिमिमप्राशानेवप्रतीच्छगृहाण५३

तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि पपातयोवैरक्तौघस्तेनासन्शतशोसुराः ५० तैश्चासुरासृक्संभूतैरसुरैःसकलं
जगत् व्याप्तमासीत्ततोदेवाभयमाजग्मुरुत्तमम् ५१ तान्विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा उवाचकालींचामुंडेवि
स्तीर्णंवदनंकुरु ५२ मच्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान् रक्तबिंदोःप्रतीच्छत्वंवक्त्रेणानेनवेगिना ५३ भक्षयंतीचरर
णेतदुत्पन्नान्महासुरान् एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्यति ५४ भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे इत्यु-
क्त्वातांततोदेवीशूलेनाभिजघानतम् ५५ मुखेनकालीजगृहेरक्तबीजस्यशोणितम् ततोसावाजघानाथगदयातत्रचंडि
काम् ५६ नचास्यावेदनांचक्रेगदापातोल्पिकामपि तस्याहतस्यदेहात्तुबहुसुस्रावशोणितम् ५७

किंच पानसमयेत्वद्वक्त्रेसमुत्पन्नान्महासुरान् भक्षयंतीरणेचर एवंप्रकारेणैवदैत्यःक्षयंगमिष्यति ५४ भक्ष्यमाणाइति उत्पत्स्यंतीति अनुदात्तेत्व
लक्षणम् तङोऽनित्यत्वान्नतङ् ५५ मुखेनेति शोणितंभूगतमेव विस्तीर्णत्वाद्वदनस्य असौरक्तबीजः तत्रयुद्धे ५६ नचेति चिदानंदात्मत्वादितिभावः५७ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतस्ततइतिसर्वतइत्यर्थः अतिविस्तीर्णत्वात् हतस्यउत्तरार्द्धमुत्तरान्वयि ५८ तांश्चेति उत्तरार्द्धमुत्तरान्वयि असिभिरितिक्रियापेक्षंबहुवचनं ऋष्टिभि
रित्यप्येवम् ऋष्टिरुभयतोधारोसिः ५९ जघानेति शस्त्रसंघैः समूहैः समाहत इतितृतीयातत्पुरुषः ६० नीरक्तश्चेति कातर्यात् निःशेषरुधिरत्वात् नीर-

यतस्ततस्तद्वक्त्रेणचामुंडासंप्रतिच्छति मुखेसमुद्गतायेस्यारक्तपातान्महासुराः ५८ तांश्चखादाथचामुंडापपौतस्यचशोणि
तम् देवीशूलेनवज्रेणबाणैरसिभिऋष्टिभिः ५९ जघानरक्तबीजंतंचामुंडापीतशोणितम् सपपातमहीपृष्ठेशस्त्रसंघसमा
हतः ६० नीरक्तश्चमहीपालरक्तबीजोमहासुरः ततस्तेहर्षमतुलमवापुस्त्रिदशानृप ६१ हतेमातृगणस्तस्मिन्ननर्तासृ-
ङ्मदोद्धतः ६२ इतिश्रीमार्कंडेयपुराणे० देवीमाहात्म्येरक्तबीजवधाख्योअष्टमोऽध्यायः ८ राजोवाच विचित्रमि
दमाख्यातंभगवन्भवताममदेव्याश्चरितमाहात्म्यंरक्तबीजवधाश्रितम् १ भूयश्चेच्छाम्यहंश्रोतुंरक्तबीजेनिपातिते च
कारशुंभोयत्कर्मनिशुंभश्चातिकोपनः २ ऋषिरुवाच चकारकोपमतुलंरक्तबीजेनिपातिते शुंभासुरोनिशुंभश्चह
तेष्वन्येषुचाहवे ३

कश्चसन्मातृगणोब्रह्माण्यादिसमूहोननर्तेत्यर्थः ६१ ६२ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्या
ख्याने अष्टमोऽध्यायः ८ राजोवाच विचित्रमिति राजासुरथः चरितंकर्मसाहात्म्यंप्रभावःसमाहारद्वंद्वः आश्रितंजनकम् १ २ ऋषिरुवाच चकारे
तिआहवेरणे ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हन्यमानमिति उद्दहन्नधारयत् ४ संदष्टौष्ठपुटाः दंताभ्यामंतः संधृतोष्ठाः तथासतिपुटाकारताभवति ५ ६ ततइति देव्याइतिसहार्थेतृतीया ७ चिच्छेदेति ता

हन्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन् अभ्यधावन्निसुंभोथमुख्ययासुरसेनया ४ तस्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुराः संदष्टौष्ठपुटाःक्रुद्धाहंतुंदेवीमुपाययुः ५ आजगाममहावीर्यःशुंभोपिस्वबलैर्वृतः निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः ६ ततोयुद्धमतीवासीद्देव्याःशुंभनिशुंभयोः शरवर्षमतीवोग्रंमेघयोरिववर्षतोः ७ चिच्छेदास्तांछरांस्ताभ्यांचंडिकास्वशरोत्करैः ताडयामासचांगेषुशस्त्रौघैरसुरेश्वरौ ८ निशुंभोनिशितंखड्गंचर्मचादायसुप्रभम् अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमम् ९ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमम् निशुंभस्याशुचिच्छेदचर्मचाप्यष्टचंद्रकम् १० छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसोसुरः तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखागताम् ११ कोपाध्मातोनिसुंभोथशूलंजग्राहदानवः आयांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत् १२ आविध्याथगदांसोपिचिक्षेपप्रतिचंडिकाम् सापिदेव्यात्रिशूलेनभिन्ना भस्मत्वमागता १३

भ्यामस्तान्क्षिप्तानित्यन्वयः ८ ९ ताडितइति क्षुरविशेषः चर्मचालकं अष्टसंख्याकरत्नादिघटितंचंद्राकारसहितम् १० छिन्नेइतिश

क्तिक्षेपोदेवींप्रति अभिमुखागतांतांदेवींचिच्छेदेत्यर्थः ११ कोपेति जग्राहग्रहणपूर्वकंप्रक्षेपेनग्राहिः आयांतंतच्छूलं १२ आविध्यभ्रामयित्वा देव्याकर्त्र्यात्रिशूलेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणेनसापिगदाभिन्ना भस्मत्वमागता आपातिताच अंतर्भाविण्यर्थात्तक्तः १३ पुंगवंश्रेष्ठं अत्रनिशंभस्यमूर्च्छासंपादनेनपातनम् १४ तस्मिन्निति प्रययौसुंभ इतिशेषः १५ सइति तथासामुद्रिकाप्रकारेणात्युच्चैर्भुजैर्नभोव्याप्यबभावित्यर्थः १६ आयांतमागच्छंतम् १७ स्वनेनचेति चेनशंखज्याशब्दयोःसमुच्चयः वधो

ततः परशुहस्तंतमायांतंदैत्यपुंगवम् आहत्यदेवीबाणौघैरपातयतभूतले १४ तस्मिन्निपतितेभूमौनिशुंभेभीमविक्रमे भ्रात
र्यतीवसंक्रुद्धः प्रययौयोद्धुमंबिकाम् १५ सरथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषंबभौनभः १६ त
मायांतंसमालोक्यदेवीशंखमवादयत् ज्याशब्दंचापिधनुषश्चकारातीवदुःसहम् १७ पूरयामासककुभोनिजघंटास्वनेनच स
मस्तदैत्यसैन्यानांतेजोवधविधायिना १८ ततःसिंहोमहानादैस्त्याजितेभमहामदैः पूरयामासगगनंगांतथोपदिशोदश
१९ ततःकालीसमुत्पत्यगगनंक्ष्मामताडयत् कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः २० अट्टाट्टहासमशिवंशिवदूती
चकारह तैःशब्दैरसुरास्त्रेसुः शुंभःकोपंपरंययौ २१ दुरात्मंस्तिष्ठतिष्ठेतिव्याजहारांबिकायदा तदाजयेत्यभिहितंदेवैराका
शसंस्थितैः २२

नाशः विधायिनेतिस्वनविशेषणम् १८ उपदिशः सामान्यदिगाक्षेपेपदिक्त्वं पूर्वादीनांदशानांतदाहदशेति १९ समुत्पत्यउत्प्लुत्य पुनरवतीर्यपृथ्वीं २० अट्टाट्टहासंशकंध्वादित्वात्पररूपम् अशिवंरिपूणांभयदम् २१ आकाशेसंस्थितैः देवैःदानवसंग्रामदर्शनायतत्रास्थितैः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महोल्कयेति महाज्वालावत्याशक्त्येत्यर्थकं यद्वा तन्नामकशक्त्येत्यर्थकम् २३ सिंहेति उत्तरार्द्धस्यतथापीत्यादिनिर्घातनिःस्वनः उत्पातध्वनिः जितवा
नित्यस्यशुंभनादमितिशेषः २४ शुंभेति अनेनदेवीशुंभयोः समयुद्धमुक्तम् २५ ततइति अभिहतःसमंताद्धतोभिहतः २६ ततइति शुंभमूर्च्छानंतरं

शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा आयांतीवह्निकूटाभासानिरस्तामहोल्कया २३ सिंहनादेनशुंभस्यव्याप्तं-
लोकत्रयांतरम् निर्घातनिस्वनोघोरोजितवानवनीपते २४ शुंभमुक्तान्शरान्देवीशुंभस्तत्प्रहितान्शरान् चिच्छेदस्वश
रैरुग्रैः शतशोथसहस्रशः २५ ततःसाचंडिकाक्रुद्धाशूलेनाभिजघानतम् सतदाभिहतोभूमौमूर्च्छितोनिपपातह २६ ततो
निशुंभःसंप्राप्यचेतनामात्तकार्मुकः आजघानशरैर्देवींकालींकेसरिणंतथा २७ पुनश्चकृत्वाबाहूनामयुतंदनुजेश्वरः
चक्रायुधेनदितिजश्छादयामासचंडिकाम् २८ ततोभगवतीक्रुद्धादुर्गादुर्गार्त्तिनाशिनी चिच्छेदतानिचक्राणिस्वशरैः
सायकांश्चतान् २९ ततोनिशुंभोवेगेनगदामादायचंडिकाम् अभ्यधावतवैहंतुंदैत्यसेनासमावृतः ३०

निशुंभोयः पूर्वंमूर्च्छितःआत्तंगृहीतम् २७ पुनरिति दनोःपुत्रोपिदितिजसमानशीलत्वाद्दितिजः २८ ततइति दुर्गेसंकटे आर्त्तेः पीडायाः नाशिनीतिणि
निप्रत्ययः २९ ततइति दैत्यसेनयासमावृतः ३० ५ ५ ५ ५ ५ ५

CC-0. In Public Domain. Digitization by eGangotri

३१ शूलेति समायांतम् संमुखमायांतम् वेगाविद्धेनवेगाक्षिप्तेन ३२ ३३ स्वनवदितिप्रहस्येत्यस्यविशेषणम् ३४ ततइति उग्रमितिक्रियाविशेषणं
कालीशिवदूतीचचखादेत्यन्वयः ३५ निराकृताः ध्वस्ताः मंत्रोत्रप्रणवः ३६ ३७ खंडंखंडंखंडप्रकाराः खंडस्यखंडावायस्यांक्रियायांतथाकृताः

तस्यापततएवास्तुगदांचिच्छेदचंडिका खड्गेनशितधारेणासचशूलंसमाददे ३१ शूलहस्तंसमायांतंनिशुंभममरार्दनम्
हृदिविव्याधशूलेनवेगाविद्धेनचंडिका ३२ भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः महाबलोमहावीर्यस्तिष्ठेतिपुरुषोव-
दन् ३३ तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः शिरश्चिच्छेदखड्गेनततोसावपतद्भुवि ३४ ततःसिंहश्चखादोग्रदंष्ट्राक्षु-
ण्णशिरोधरान् असुरांस्तांस्तदाकालीशिवदूतीतथापरान् ३५ कौमारीशक्तिनिर्भिन्नाःकेचिन्नेशुर्महासुराः ब्रह्माणी
मंत्रपूतेनतोयेनान्येनिराकृताः ३६ माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापरे वाराहीतुंडघातेनकेचिच्चूर्णीकृताभुवि ३७
खंडंखंडंचचक्रेणवैष्णव्यादानवाःकृताः वज्रेणचैंद्रीहस्ताग्रविमुक्तेनतथापरे ३८ केचिद्विनेशुरसुराःकेचिन्नष्टामहा
हवात् भक्षिताश्चापरेकालीशिवदूतीमृगाधिपैः ३९ इतिमार्कंडेयपु०देवीमाहात्म्येनिशुंभवधोनामनवमोऽध्यायः ९

आद्येप्रकारेगुण
वचनस्येतिद्वित्वम् वज्रेणचखंडंखंडंकृत्वाइत्यत्र ३८ विनेशुर्मृताःनष्टाःपलायिताः ३९ । इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेस०व्याख्यानेनव
मोध्यायः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स॰ श॰ ऋषिरुवाच निशुंभमिति १ बलेति बलगर्वेणदुर्विनीते दुर्गेमागर्वमावह यत्वमतिमानिनीसती अन्यासांबलमाश्रित्ययुध्यसेइत्यन्वयः २ देव्युवाच एकै अ॰
४१ वेति एकास्वगतसजातीयभेदहीनापरमात्मस्वरूपत्वात् अपरान्याममसहायभूताद्वितीयाकास्तिनकापीत्यर्थः अनुभूयमानस्तुभेदोनवास्तवइत्याह १०

ऋषिरुवाच निशुंभंनिहतंदृष्ट्वाभ्रातरंप्राणसंमितम् हन्यमानंबलंचैवशुंभःक्रुद्धोब्रवीद्वचः १ बलावलेपाद्दुष्टेत्वंमादुर्गेगर्व मावह अन्यासांबलमाश्रित्ययुध्यसेयातिमानिनी २ देव्युवाच एकैवाहंजगत्यत्रद्वितीयाकाममापरा पश्यैतादुष्टमय्येव विशंत्योमद्विभूतयः ३ ततःसमस्तास्तादेव्योब्रह्माणीप्रमुखालयम् तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदांबिका ४ देव्युवा च अहंविभूत्याबहुभिरिहरूपैर्यदास्थिता तत्संहृतंमयैकैवतिष्ठाम्याजौस्थिरोभव ५ ऋषिरुवाच ततःप्रववृतेयुद्धं देव्याःशुंभस्यचोभयोः पश्यतांसर्वदेवानामसुराणांचदारुणम् ६ शरवर्षैःशितैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः तयोर्युद्धमभू द्भूयःसर्वलोकभयंकरम् ७ पश्यैति वाक्यार्थस्यकर्मत्वंमद्विभूतयइत्यनेनभेदंनिरस्यति ३ ततइति तनौशरीरे लयंअपृथक्भावंअनेनब्रह्मादिभ्यः
आविर्भूतानामप्यत्रलयदर्शनेनसमस्तोपादानत्वमस्याएवेतिदर्शयति तच्चमूलशक्त्यभेदादित्युक्तम् ४ देव्युवाच अहमिति अहंविभूत्यैश्वर्येणबहुभिःरूपैः ४१
यद्बहुत्वमास्थितातद्बहुत्वंमयासंहृतंतस्मादहमेकैवतिष्ठामि त्वमपिरणेस्थिरोभवेत्यर्थः अनेनापितदेवदृढीकृतम् ५ ऋषिरु॰ ततइति पश्यतामित्यनादरेष
ष्ठी ६ भूयःमहत् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८ उग्रंच तत् हुंकारोच्चारणंच तदादिभूतं येषामस्त्राणाम् ९ ततस्तस्मात्कुपिता धनुः इषुभिः सह १० छिन्नेइति तथा तेन प्रकारेण छिन्ने धनुषीत्यन्वयः ११
ततइति चर्मचेति चेनाश्वसारथ्योः समुच्चयः १२ १३ तदाह हताश्वइति १४ १५ समुष्टिमिति देव्याः हृदयेइत्यन्वयः तलंप्रसृतचपेटः १६ १७ उ

दिव्यान्यस्त्राणिशतशोमुमुचेयान्यथांबिका बभंजतानिदैत्येंद्रस्तत्सतीघातकर्तृभिः ८ मुक्तानितेनचास्त्राणिदिव्यानिपरमेश्व
री बभंजलीलयैवोग्रहुंकारोच्चारणादिभिः ९ ततःशरशतैर्देवीमाच्छादयतसोऽसुरः सापितत्कुपितादेवीधनुश्चिच्छेदचेषुभिः
१० छिन्नेधनुषिदैत्येंद्रस्तथाशक्तिमथाददे चिच्छेददेवीचक्रेणतामप्यस्यकरस्थिताम् ११ ततःखड्गमुपादायशतचंद्रंचभानु
मत् अभ्यधावततांदेवींदैत्यानामधिपेश्वरः १२ तस्यापततएवाशुखड्गंचिच्छेदचंडिका धनुर्मुक्तैःशितैर्बाणैश्चर्मचार्ककरा
मलम् १३ हताश्वःसतदादैत्यश्छिन्नधन्वाविसारथिः जग्राहमुद्गरंघोरमंबिकानिधनोद्यतः १४ चिच्छेदापततस्तस्यमुद्गरं
निशितैःशरैः तथापिसोऽभ्यधावत्तांमुष्टिमुद्यम्यवेगवान् १५ समुष्टिंपातयामासहृदयेदैत्यपुंगवः देव्यास्तंचापिसादेवीत
लेनोरस्यताडयत् १६ तलप्रहाराभिहतोनिपपातमहीतले सदैत्यराजःसहसापुनरेवतथोत्थितः १७

च्चैर्गगनंइत्यन्वयः आस्थितः आश्रितवान् निराधारास्वप्रयत्नेतरयाताभावहेतुहीनातेनसंभ्रमेन १८ निशुंभंबाहुयुग्मंतद्विशेषणंप्रथमामितिसु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वार्थकम् सिद्धाः देवयोनिविशेषाः मुनयोऋषयः १९ उत्पात्यकंदुकवद्दुपरिक्षिप्तः पतनसमयेचरणमुद्धृत्यभ्रामयामास धरणीतलेचिक्षेपचेत्यर्थः

उत्पत्यचप्रगृह्योच्चैर्देवीगगनमास्थितः तत्रापिसानिराधाराययुधेतेनचंडिका १८ नियुद्धंखेतदादैत्यश्चंडिकाच्चपरस्परम्
चक्रतुः प्रथमंसिद्धमुनिविस्मयकारकम् १९ ततोनियुद्धंसुचिरंकृत्वातेनांबिकासह उत्पात्यभ्रामयामासचिक्षेपधरणीत
ले २० सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्यवेगतः अभ्यधावतदुष्टात्माचंडिकानिधनेच्छया २१ तमायांतंततोदेवीसर्वदैत्य
जनेश्वरम् जगत्यांपातयामासभित्त्वाशूलेनवक्षसि २२ सगतासुः पपातोर्व्यांदेवीशूलाग्रविक्षतः चालयन्सकलांपृथ्वीं
साब्धिद्वीपांसपर्वताम् २३ उत्पातमेघाः सोल्कायेप्रागासंस्तेशमंययुः सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते २४ ततः
प्रसन्नमखिलंहतेतस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवासीन्निर्मलंचाभवन्नभः २५ ततोदेवगणाः सर्वेहर्षनिर्भरमानसाः
बभूवुर्निहतेतस्मिन्गंधर्वाललितंजगुः २६ अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुः पुण्यास्तथावाताः सुप्रभोभू
द्दिवाकरः २७

२० २१ २२ २३ २४ उत्पातेति उत्पातसूचकामेघाः शुभादेवाशुभंच उल्कादिव्यतेजःप्राक्शुंभवधात् तथातद्वत्सरितोमा ५२
र्गवाहिन्यः नपूर्ववद्दुत्पथगामिन्यः आसन् तत्रशुंभे २५ २६ पुण्याः अनुकूलाः २७ ७ ६ ६ ७

CC-0. In Public Domain. Digitization by eGangotri

जज्वलुरिति अग्नयःआह्वनीयादयः शांताःसौम्याःसंतोजज्वलुःशांताः दिक्षुजनिताःस्वनाःउत्पातसूचकस्फुरणादिशब्दोयेषांते २८ इतिशिवभट्टसु०नागो
जीभट्टकृतेदशमोध्यायः १० ऋषिरुवाच देव्योति तत्रयुद्धेवह्निपुरोगमाः वह्निमुख्याः कात्यायनीमित्यनेनपरस्परमासामैक्यंसूचयति इष्टस्यशंभा
दिवधस्यलाभात्प्राप्तेःतुमागमः विकाशीनिविकस्वराणिवक्त्राणियेषांतेतुपादपूरणेविकाशिताः प्रकाशिताः आशाःयैः १ देवीति प्रपन्नाः भक्ताःआ

जज्वलुश्चाग्नयःशांताः शांतादिग्जनित स्वनाः २८ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येशुंभवधोनामदश
मोऽध्यायः १० ऋषिरुवाच देव्याहतेतत्रमहासुरेंद्रेसेंद्राःसुरावह्निपुरोगमास्ताम् कात्यायनींतुष्टुवुरिष्टलाभाद्वि
काशिवक्त्रास्तुविकाशिताशाः १ देविप्रपन्नार्त्तिहरेप्रसीदप्रसीदमातर्जगतोखिलस्य प्रसीदविश्वेश्वरिपाहिविश्वंत्वमी
श्वरीदेविचराचरस्य २ आधारभूताजगतस्त्वमेकामहीस्वरूपेणयतःस्थितासि अपांस्वरूपस्थितयात्वयैतदाप्यायते-
कृत्स्नमलंघ्यवीर्ये ३

द्रेप्रसीदेतिविरुक्तिः चराचरस्यमध्येत्वमीश्वरी स्वतंत्राइतरत्सर्वंत्वत्परतंत्रमितिभावः २ आधारभूतेति तत्रहेतुः म
हीस्वरूपेणेतिस्थितिः अपांस्वरूपस्थितया अबाभिन्नस्वरूपेणेतिस्थितयागमकत्वात्समासः आप्यायते प्यायीत्यतः कर्मणीयकौ अनेनोक्त-
लक्षणेनसर्वात्म्यंविवक्षितम् ३ ७ ७ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स·स· त्वमिति आद्यपादे पालनशक्तिमत्वम् द्वितीयेकारणशक्तिमत्वम् मायाऽविद्या त्वयैतत्संमोहितं संसारगर्त्तेपातितम् तर्त्किंमोक्षोनास्त्येवेत्यत आह त्वं अ·
४३ प्रसन्नाकृतप्रसादावैप्रसिद्धम् भुविजगतिमुक्तिहेतुः ४ विद्याइति अंगानि ६ वेदाश्चत्वारो ४ मीमांसा ११ न्यायविस्तरः १२ पुराणं १३ धर्मशास्त्रं १४ ११
चविद्यात्वेताश्चतुर्दश आयुर्वेदधनुर्वेदगंधर्वार्थशास्त्रैःसहाष्टादशभेदाः अंशाःसकलाश्चतुःषष्टिकलोपेताः पातिव्रत्यसौंदर्यतारुण्याद्युपेताःसमस्ताः
स्त्रियोपितवांशाः त्वयैकयैतत्पूरितम् अंतर्बहिश्चव्याप्तम् एवंचत्वत्तःपृथक्भूतस्याभावात् अतस्तेस्तुत्येविषयेपरापरागौणीमुख्याचयाउक्तिस्तद्रू

त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया संमोहितंदेविसमस्तमेतत्त्वंवैप्रसन्नाभुविमुक्तिहेतुः ४ विद्याःसमस्तास्तवदेविभे
दाःस्त्रियःसमस्ताःसकलाजगत्सु त्वयैकयापूरितमंबयैतत्कातेस्तुतिःस्तव्यपरापरोक्तिः ५ सर्वभूतायदादेवीस्वर्गमुक्तिप्रदायिनी त्वंस्तु
तास्तुतयेकावाभवंतुपरमोक्तयः ६ सर्वस्यबुद्धिरूपेणजनस्यहृदिसंस्थिते स्वर्गापवर्गदेदेविनारायणिनमोस्तुते ७

पास्तुतिः कातेइत्यर्थः यद्वाउक्तिरूपात्वमेवातः कातेस्तुतिः ५ पुनरपिस्तुतेरघटनामाह सर्वेति सर्वभूताविश्वात्मिकादेवीद्योतनशीलास्वर्गमुक्त्योःप्रकर्षे
णदात्रीतियदात्वंस्तुतातदावास्तुतयेपरमा अधिकाउक्तयःकाभवंतुनकापीत्यर्थः ६ तथाप्युपगम्याप्याह सर्वस्येति बुद्धिर्निश्चयात्मकज्ञानं तद्रूपेणवस्व ४३
र्गापवर्गदात्वं नारायणस्यविष्णोःशक्तिर्नारायणी तत्संबोधनेशुद्धसत्वप्रधानावैष्णवीत्वमितिध्वन्यते तेतुभ्यं यद्वानारस्यजीवसमूहस्यायतोस्थान
भूतातद्रूपातत्साधनम् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलेति कलेतित्रिंशत्काष्ठाः अष्टादशनिमेषाः काष्ठा आदिनाक्षणमुहूर्तादयः परिणामोजनानामवस्थाविशेषः तेनाखंडकालरूपत्वम् तदेवपुनराह विश्वस्योपरतौनाशेश क्तिनाशक्तिमतीइत्यर्थः कालस्यैवजगद्भक्षकत्वात् ८ सर्वेति सर्वमंगलानांमंगलत्वरूपेशिवेकल्याणकर्त्रिशरण्येशरणार्हेत्र्यंबकेत्रिनेत्रे गौरि गौर वर्णे अनेन- शैवीत्वमप्यस्याः ध्वनितम् ९ सृष्टीति आद्यार्द्धेनब्रह्मादीनांसृष्ट्यादिशक्तिः त्वमेवेत्युक्तम् सनातनिनित्येगुणानांमहदादीनां आश्रयभूते अगुणमये अविद्यमा

कलाकाष्ठादिरूपेणपरिणामप्रदायिनी विश्वस्योपरतौशक्तेनारायणिनमोस्तुते ८ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके शर
ण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ९ सृष्टिस्थितिविनाशानांशक्तिभूतेसनातनि गुणाश्रयेगुणमयेनारायणिनमोस्तुते १० श
रणागतदीनार्त्तपरित्राणपरायणे सर्वस्यार्त्तिहरेदेविनारायणिनमोस्तुते ११ हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणि कौशां
भः क्षरिकेदेविनारायणिनमोस्तुते १२ त्रिशूलचंद्राहिधरेमहावृषभवाहिनि माहेश्वरीस्वरूपेणनारायणिनमोस्तुते १३

नगुणकृतविकारे १० शरणेति दीनाः सर्गादिकदुःखभाजः आर्त्ताः तस्करादिपीडिताः परायणस्तत्परः तदुपपादकमार्त्तिहरेइति नियतः आर्त्तेः पीडा याः हंत्रीत्यर्थः ११ हंसेति हंसयुक्तविमानास्थिते ब्रह्माणीरूपधारिके कुशंजलंतस्यायंकौशः कमंडलुः तदंभसः क्षरिकेसेविके १२ त्रिशूलेतिमा हेश्वरीस्वरूपेणेतिपूर्वार्द्धेतान्वयि १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयूरेति मयूरकुक्कुटंतासिच्छंतेनवृते कुक्कुटेः कुकुभेपिध्वजेनशिखिबर्हाणामुच्छ्रितेनसमावृतेतिहरिवंशोक्तेः अनघे अघरहिते कुमारशक्तेरिवरूपंसंस्था
नं अवयवसन्निवेशश्चयस्याः १४ शंखेति शंखादीनिगृहीतानिपरमायुधानियया १५।१६ नृसिंहेति त्रैलोक्यत्राणायसम्यक्हितेलोपः १७ म-

मयूरकुक्कुटवृतेमहाशक्तिधरेनघे कौमारीरूपसंस्थानेनारायणिनमोस्तुते १४ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे प्र-
सीदवैष्णवीरूपेना॰ १५ गृहीतोग्रमहाचक्रेदंष्ट्रोद्धृतवसुंधरे वराहरूपिणिशिवेना॰ १६ नृसिंहरूपेणोग्रेणहंतुंदैत्यान्कृतोद्य
मे त्रैलोक्यत्राणसहितेना॰ १७ किरीटिनिमहावज्रेसहस्रनयनोज्ज्वले वृत्रप्राणहरेचैंद्रिना॰ १८ शिवदूतीस्वरूपेणहत
दैत्यमहाबले घोररूपेमहारावेनारायणिनमोस्तुते १९ दंष्ट्राकरालवदनेशिरोमालाविभूषणे चामुंडेमुंडमथनेनाराय
णिनमोस्तुते २० लक्ष्मीलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे महारात्रिमहामायेनारायणिनमोस्तुते २१ मेधेसरस्व-
तिवरेभूतिबाभ्रवितामसि

हावज्रे महत्वज्रंयस्याः १८ शिवेति हतंदैत्यानांमहाबलंययासा १९ २० हेलक्ष्मीः महाविद्याउपनिषत् श्र
द्धा आस्तिक्यबुद्धिः पुष्टिसहितस्वधेमहती अविद्यासर्वावरणसमर्थोमहामोहः तद्रूपे २१ मेधेइति मेधाधारणावतीबुद्धिः सरस्वतीवाग्देवता वरेश्रेष्ठे
भूतिःसत्वप्रधानेछांदसोगुणाभावः अनेनसात्विकीलम् बभ्रूरजोगुणः तद्युक्तेतामसि तमोगुणयुक्ते इदंमूलशक्त्यभिप्रायेणनियतिरूपंतद्रूपेईशेसमर्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वेति देवीत्यस्य द्विरुक्तिः प्रसादनेत्वाहीत्यार्षम् २३ सर्वभूतेभ्यः सर्वभूतविकारेभ्यः प्राणिभ्यश्च कात्यायनि तदाश्रमभावे २४ ज्वालेति नोस्मान् भीतेर्भयात्
२५ हिनस्तीति अतः प्राणिमातावासुतानिव नोस्मान् पापेभ्यः पालिस्यर्थः अनितेः पचाद्यच् २६ असृगेति चर्चितो लिप्तः करं हस्तं उज्ज्वलयति करैः किरणै

नियतेत्वंप्रसीदेशेनारायणिनमोस्तुते २२ सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते २३
एतत्तेवदनंसौम्यंलोचनत्रयभूषितम् पातुनःसर्वभूतेभ्यःकात्यायनिनमोस्तुते २४ ज्वालाकरालमत्युग्रमशेषासुरसूदन
म् त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते २५ हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत् साघंटापातुनोदेविपापेभ्योनःसु
तानिव २६ असृगसृग्वसापंकचर्चितस्तेकरोज्वलः शुभायखड्गोभवतुचंडिकेत्वांनतावयम् २७ रोगानशेषानपहंसि
तुष्टारुष्टातुकामान्सकलानभीष्टान् त्वामाश्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतांप्रयांति २८ एतत्कृतंयत्कदनंत्व
याद्यधर्मद्विषांदेविमहासुराणाम् रूपैरनेकैर्बहुधात्ममूर्तिंकृत्वांबिकेतत्प्रकरोतिकान्या २९ रुज्ज्वलोवा २७ रोगानिति अभीष्टान्

अपहंसीत्याकृष्यत इति यत् इष्टवियोगलक्षणा विपत्तिः यतस्त्वामाश्रिता अन्येषामाश्रयतांप्रयांति २९ एतदिति कदनंनाशः धर्मद्विषोऽसुराः अद्य अधुना आ
त्ममूर्तिमेव अनेकैः रूपैः ब्रह्माण्यादिकाल्यादिलक्षणैः अभेदेतृतीया बहुधा बहुप्रकारा अन्यात्वदितराकानकापीत्यर्थः २९ ७९ ७९ ७९

CC-0. In Public Domain. Digitization by eGangotri

विद्यास्विति विद्यासु ज्ञानेषु उपायभूतानि यानि शास्त्रादीनि तेषु मन्वाद्युक्तेषु विवेकदीपेषु उपनिषत्सु आद्येषु वाक्येषु कर्मकांडपरवेदवाक्येषु च सत्स्वेवं म
मत्वगर्त्ते तदाश्रये महांधकारे संसारे एतद्विश्वं त्वदन्या का अतीव विभ्रामयति न कापीत्यर्थः ३० रक्षांसीति नागाः सर्पाः अत्र यत्रेत्यनुरुष्यते दस्यवः चौराः
दावो वनम् तथाब्धिमध्ये यत्रौर्वाग्न्यादयः तत्र त्वमेव व्यापकत्वात् स्थिता विश्वं परिपासीत्यन्वयः ३१ यतस्त्वं विश्वेश्वरी अतो विश्वं परिपासि यतः त्वं वि

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ममत्वगर्त्तेति महांधकारे विभ्रामयत्येतदतीव विश्वम् ३० रक्षांसि यत्रोग्र
विषाश्च नागा यत्रारयो दस्युबलानि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ३१ विश्वेश्वरी त्वं परिपासि
विश्वं विश्वात्मिका धारयसीति विश्वम् विश्वेशवंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ३२ देवि प्रसीद परिपालय नोरि
भीतेर्नित्यं यथासुरवधादधुनैव सद्यः पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ३३

श्वात्मिका अतस्त्वं तद्धारयसि यतो भवती विश्वेशानां इंद्रब्रह्मादीनामपि स्तुत्या अतस्त्वयि भक्तिनम्राः ये ते विश्वाश्रयाः भवंति ३२ देवीति हे देवि नोस्मा
न् सद्यः क्षणमात्रेण शत्रुभीतेः पालय यथाधुनैव संप्रत्येवासुरवधात् पालितवत्यसि तथेत्यर्थः सर्वजगतां पापानि आशु शीघ्रं प्रशमं नय उत्पाता-
नां पाकः फलदानकालस्तेन जनितान् महोपसर्गान् मार्यादींश्च प्रशमं नयेति ३३ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणतानामिति ईड्येस्तव्ये ३४ देव्युवाच वरदेति यंवरंयमभीप्सितार्थंवृणुध्वंप्रार्थयध्वम् ३५ देवाऊचुः सर्वबाधेति सर्वाचासौबाधाचेत्यर्थः इदंवैरिविनाशनस्यवि-
शेषणम् एवमेवस्त्वंशुंभादिनाशनवदेव ३६ देव्युवाच वैवस्वतेइति अंतरेमन्वंतरे अष्टाविंशतिमे अष्टाविंशतिसंख्याके योमहागमश्छांदसः युगेचतुर्युं

प्रणतानांप्रसीदत्वंदेविविश्वार्त्तिहारिणि त्रैलोक्यवासिनामीड्येलोकानांवरदाभव ३४ देव्युवाच वरदाहंसुरगणावरंयन्म
नसेच्छथ तंवृणुध्वंप्रयच्छामिजगतामुपकारकम् ३५ देवाऊचुः सर्वबाधाप्रशमनंत्रैलोक्यस्याखिलेश्वरि एवमेवत्वया
कार्यमस्मद्वैरिविनाशनम् ३६ देव्युवाच वैवस्वतेंतरेप्राप्ते अष्टाविंशतिमेयुगे शुंभोनिशुंभश्चैवान्यावुत्पत्स्येतेमहासुरौ
३७ नंदगोपगृहेजातायशोदागर्भसंभवा ततस्तौनाशयिष्यामिविंध्याचलनिवासिनी ३८ पुनरप्यतिरौद्रेणरूपेणपृथि-
वीतले अवतीर्यहनिष्यामिवैप्रचित्तांश्चदानवान् ३९ भक्षयंत्याश्चतानुग्रान्वैप्रचित्तान्महासुरान् रक्तादंताभविष्यंतिदा
डिमीकुसुमोपमाः ४०

गे तत्रकलिद्वापरसंधावनयोरुत्पत्तिः ३७ नंदेति नंदगोपस्यएषामहालक्ष्म्यंशभूता नंदाभगवतीनामयाभविष्यतिनंदजा
कनकोत्तमकांतिः सास्तुकांतिकनकांबरा कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा इंदिराकमलालक्ष्मीःसाश्रीरुक्मांबुजासनेतिरहस्योक्तेः ३८ पुनरपीन्-
ति इयमपिद्वापरेऽतीतेतत्रैवचतुर्युगेऽवतीर्णेत्याहुः वैप्रचित्तान् विप्रचित्तवंशीयान् ३९ ४० ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति एषारक्तदंतिकाकाल्यंशभूता अत्रदंतेत्युपलक्षणम् केशायुधसर्वावयवेषुरक्तत्वमस्या अतएवास्यारक्तचामुंडात्वेनव्यवहारः अत्रसर्वत्राहमिति
निर्देशः परस्परमपिशाक्तानां अभेदाभिप्रायेण ४१ भूयश्चेति अनंभसिवृष्ट्यादिजलशून्यायामपीत्यर्थः अयोनिजायथेदानींपार्वतीदेहाविर्भावएव-
मपिन्वेत्यर्थः ४२ ततइति यत्यस्मात्मुनीन् निरीक्षिष्यामितत्तस्मात् ४३ वैवस्वतमन्वंतरएवचत्वारिंशत्तमेयुगेशताक्षीशाकंभर्यवतारः तस्मिन्ने

ततोमांदेवताःस्वर्गेमर्त्यलोकेचमानवाः स्तुवंतोव्याहरिष्यंतिसततंरक्तदंतिकाम् ४१ भूयश्चशतवार्षिक्यामनावृष्ट्यामनंभसि
मुनिभिःसंस्मृताभूमौसंभविष्याम्ययोनिजा ४२ ततःशतेननेत्राणांनिरीक्षिष्यामियन्मुनीन् कीर्त्तयिष्यंतिमनुजाःशताक्षीमि
तिमांततः ४३ ततोहमखिलंलोकमात्मदेहसमुद्भवैः भरिष्यामिसुराःशाकैरावृष्टेःप्राणधारकैः ४४ शाकंभरीतिविख्यातिंत
दायास्याम्यहंभुवि तत्रैवचवधिष्यामिदुर्गमाख्यंमहासुरम् ४५

वांतरेशाकचत्वारिंशत्तमेयुगेइतिलक्ष्मीतंत्रोक्तेः तत्रैवदुर्गमासुर
वधः शाकंभरींस्तुवन् ध्यायन् शाकंसंपूजयन्नमन् अक्षय्यामश्नुतेभूतिमन्नंपानंमवांतरइतिचतत्रैव ४४ शाकंभरीति एषापार्वत्यंशाएवशा
कंभरीनीलवर्णेत्याद्युक्तेःदुर्गमनामाऽसुरः तत्रैवशाकंभर्यवतारएव शाकंभरीशताक्षीसासैवदुर्गाप्रकीर्त्तिता उमागौरीसतीचंडीकालिकेशाचपा ४६
र्वतीति यत्रमूलकरीराग्रमूलकांडाधिरूढकाः त्वक्पुष्पंकवकंचेतिशाकंदशविधंस्मृतम् ४५ ५ ५ ५ ५ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्गेति भीमंभयंकरम् ४६ भक्षयिष्यामीत्यंतस्यपदद्वयविशिष्टम् ४७ भीमेति भीमापिनीलवर्णैवदंष्ट्रादशनभासुरा चंद्रहासंचडमरुं शिरः पात्रंचबिभ्र
ती एकवीराकालरात्रिर्निद्रातृष्णादुरत्ययेत्युक्तेरियंकाल्यंशाएव पंचाशत्तमेचतुर्युगेवैवस्वतमन्वंतरेएवभीमावतारइतिलक्ष्मीतंत्रे अरुणाख्योरु

दुर्गादेवीतिविख्यातंतन्मेनामभविष्यति पुनश्चाहंयदाभीमंरूपंकृत्वाहिमाचले ४६ रक्षांसिभक्षयिष्यामिमुनीनांत्राणकारणात्
तदामांमुनयःसर्वेस्तोष्यंत्यानम्रमूर्त्तयः ४७ भीमादेवीतिविख्यातंतन्मेनामभविष्यति यदारुणाख्यस्त्रैलोक्येमहाबाधांकरिष्य
ति ४८ तदाहंभ्रामरंरूपंकृत्वासंख्येयषट्पदम् त्रैलोक्यस्यहितार्थायवधिष्यामिमहासुरम् ४९ भ्रामरीतिचमांलोकास्त-
दास्तोष्यंतिसर्वतः इत्थंयदायदाबाधादानवोत्थाभविष्यति ५० तदातदावतीर्याहंकरिष्याम्यरिसंक्षयम् ५१ इतिश्री
मार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेवैःकृतानारायणीस्तुतिर्नामएकादशोऽध्यायःसमाप्तः ११

णोनाम ४८ तदेतिभ्रामरं पाणिधृतभ्रमरं असंख्येयाःषट्पदाःयस्मिन्रूपेतत् ४९ भ्रामरीति तेजोमंडलदुर्धर्षाभ्रामरीचित्रकांतिभृत् चित्र
भ्रमणपाणिःसामहामारीतिगीयते महामायामहाकालीमहामारीक्षुधातृषाइत्युक्तेरियमपिकाल्यंशाएवसर्वतःसर्वत्रवैवस्वतेंतरएवषष्टि
तमेचतुर्युगेभ्रामर्यवतारइतिलक्ष्मीतंत्रेइत्थमित्याद्युत्तरान्वयि ५० तदेतिस्पष्टम् ५१ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्त-
शतीव्याख्यानेएकादशोऽध्यायः ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव्युवाच एभिरिति मधुकैटभवधादिलक्षणैरित्यर्थः सकलं ऐहिकीं पारलौकिकीं समाहितोनन्यमनाः १ तदेवाह मधेति २ श्रोष्यंति चासठिष्यंति अष्टम्यामि
त्यादिसुरव्यकालकथनं ३ नतेषामिति दुष्कृतं पापं दरिद्रशब्दात् घञि दारिद्र्यम् ४ शत्रुतइति नशस्त्रेति संग्रामभीतिविषयम् ५ सदानित्यम् हितं यतःतत्

देव्युवाच एभिःस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः तस्याहंसकलांबाधांनाशयिष्याम्यसंशयम् १ मधुकैटभनाशंचमहि-
षासुरघातनम् कीर्तयिष्यंतियेतद्वत्वधंशुंभनिशुंभयोः २ अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः श्रोष्यंतिचैवयेभक्त्याामम
माहात्म्यमुत्तमम् ३ नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापदः नभविष्यतिदारिद्र्यंनचैवेष्टवियोजनम् ४ शत्रुतोनभयंतस्यद
स्युतोवानराजतः नशस्त्रानलतोयौघात्कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यंपठितव्यंसमाहितैः श्रोतव्यंचसदाभक्त्या
परंस्वस्त्ययनंहितत् ६ उपसर्गानशेषांस्तुमहामारीसमुद्भवान् तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम ७ यत्रैतत्पठ्यतेसम्य-
ङ्नित्यमायतनेमम सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितम् ८

माहात्म्यंस्वस्तिकल्याणंतस्यायनंमार्गः ६ उपसर्गानिति माहात्म्यंकर्त्ता
महामारीजनक्षयकरीदेवतातस्याःसमुद्भवोयेषांतानुपसर्गानुपद्रवान् तथात्रिविधंव्याधिरागद्वेषादिरूपम् आध्यात्मिकंभूतप्रेतादिजभयप्रमाद्य-
धिभौतिकम् दैवकृतवज्रपातदारिद्र्याद्याधिदैविकंतद्रूपमुत्पातं अनिष्टं दिव्यंभौममांतरिक्षंचेतित्रिविधमुत्पातंच ७ यत्रेति यत्रायतनेगृहे ममम
संबंध्येतत्सम्यगर्थावधारणपूर्वकंअस्खलितवर्णादिच ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बलीति बलिप्रदानंदेवतोद्देशेनपश्वाद्युपहारः पूजागंधादिनार्चनम् अग्निकार्यंदेवोद्देवत्योहोमः महोत्सवः पुत्रजन्मविवाहादिउच्चार्यंइतिद्विजविषयम् ९ तत्स
लमाह जानतेति जानताविधिज्ञेन अजानतातदन्येनबलिसहितांपूजां तथावेद्यावेद्यप्रकारेणमन्माहात्म्योदीरणादोसति यथाकथंचिदपिकृतमेतत्-

बलिप्रदानेपूजायामग्निकार्येमहोत्सवे सर्वंममैतच्चरितमुच्चार्यंश्राव्यमेवच ९जानताजानतावापिबलिपूजांतथाकृताम् प्र
तीक्षिष्याम्यहंप्रीत्यावन्हिहोमंयथाकृतम् १० शरत्कालेमहापूजाक्रियतेयाचवार्षिकी तस्यांममैतन्माहात्म्यंश्रुत्वाभक्ति
समन्वितः ११ सर्वबाधाविनिर्मुक्तोधनधान्यसुतान्वितः मनुष्योमत्प्रसादेनभविष्यतिनसंशयः १२ श्रुत्वाममैतन्माहात्म्यंत
थाचोत्पत्तयःशुभाः पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान् १३ रिपवःसंक्षयंयांतिकल्याणंचोपपद्यते नंदतेचकुलंपुंसांमा
हात्म्यंममश्रृण्वताम् १४ शांतिकर्मणिसर्वत्रतथादुःस्वप्नदर्शने ग्रहपीडासुचोग्रासुमाहात्म्यंशृणुयान्मम १५

प्रतीक्षिष्यामि अंगीकरिष्यामीत्यर्थः१० शरदिति शरत्काले आश्विनशुक्लप्रतिपदमारभ्यक्रियमाणादुर्गोत्सवरूपा याचवार्षिकी वर्षशब्दोवर्षादौला-
क्षणिकः तेनचैत्रशुक्लप्रतिपदमारभ्यक्रियमाणाइत्यर्थः ११ उत्पत्तयः प्रादुर्भावानृद्वितीयार्थेप्रथमा पराक्रमंचेति पूर्वान्वयियुद्धेष्वित्युपलक्षणम् १३
उपपद्यतेप्राप्यतेकुलंचनंदते वर्द्धते १४ शांतिकर्मउपसर्गादिनिवर्त्तकं कर्मतस्मिन् तत्स्थानइत्यर्थःअन्येसप्तम्योविषयार्थे १५ ध ध

CC-0. In Public Domain. Digitization by eGangotri

तदेवविवृणोति उपसर्गाइति दुःस्वप्नशब्दोत्तु फलेइतिनपुंसकत्वम् १६ बालग्रहाः पूतनाद्याः संघातभेदे मैत्रीविघट्टने १७ दुर्वृत्तानांदुष्टानां व्याघ्रसूचकानाम् १८
पश्चित्यादिश्लोकद्वयमेकान्वयम् पशुर्बलिः अर्घोष्टांगः आपः क्षीरंकुशाग्राणिदध्यक्षततिलानिच यवाः सिद्धार्थकाश्चैवह्यष्टांगोऽर्घः प्रकीर्त्तितः १९

उपसर्गाःशमंयांतिग्रहपीडाश्चदारुणाः दुःस्वप्नंचनृभिर्दृष्टंसुस्वप्नमुपजायते १६ बालग्रहाभिभूतानांबालानांशांतिकारकम्
संघातभेदेचनृणांमैत्रीकरणमुत्तमम् १७ दुर्वृत्तानामशेषाणांबलहानिकरंपरम् रक्षोभूतपिशाचानांपठनादेवनाशनम् १८
सर्वंममैतन्माहात्म्यंममसान्निधिकारकम् पशुपुष्पार्घधूपैश्चगंधदीपैस्तथोत्तमैः १९ विप्राणांभोजनैर्होमैः प्रोक्षणीयैरहर्निश
म् अन्यैश्चविविधैर्भोगैः प्रदानैर्वत्सरेणया २० प्रीतिर्मेक्रियतेसास्मिन्सकृत्सुचरितेश्रुते श्रुतंहरतिपापानितथारोग्यंप्र
यच्छति २१ रक्षांकरोतिभूतेभ्योजन्मनांकीर्त्तनंमम युद्धेषुचरितंयन्मेदुष्टदैत्यनिबर्हणम् २२

विप्राणामिति प्रोक्षणीयैः पंचामृताभिषेकादिभिः एतैरन्यैर्विविधाभोगाः स्रगादयः प्रदानैः मदुद्देशेनविप्रेभ्योदीयमानैः वासोलंकारादिभिः एतै
रहर्निशंक्रियमाणैर्यावत्सरेणप्रीतिर्भवति २० सास्मिन्सुचरितेसकृच्छ्रुतइत्यर्थः श्रवणमुपलक्षणंश्रवणेधिकफललाभमितिकाश्चित् श्रुतमित्या-
द्युत्तरान्वयि २१ ममजन्मनांकीर्त्तनंश्रुतंसदित्यर्थः युद्धेष्वित्युत्तरान्वयि २२ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्निति ब्रह्मर्षिभिः कृताः स्तुतयः तथापिममतावत्तइत्यादयः ब्रह्मर्षिः स्मेधाः बहुवचनंपूजायां वस्तुतस्तुयुष्माभिः स्तुतयोयाश्चेत्यनेननारायणीसूक्तम् तथाब्रह्मणाऋषिभिः सहयायुष्माभिः कृताः महिषांतकरीसूक्तरूपाइत्यर्थः यथातत्स्तुतौऋषीणामपिकर्तृत्वं तथाप्रागेवनिरूपणाकृताइतिन्चदृष्टाइत्यर्थकम् लक्ष्मीतंत्रेकवाक्यत्वादित्यवधेयम् एवंचैतानिसर्वाणिस्तोत्राण्यकर्तृकादीनिबोध्यम् २३ ब्रह्मणेति स्वस्वाहेत्यादिरात्रिसूक्तरूपा श्रु

तस्मिन्कृतेवैरिकृतंभयंपुंसांनजायते युष्माभिस्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः २३ ब्रह्मणाचकृतास्तास्तुप्रयच्छंतिशुभांमतिम् अरण्येप्रांतरेवापिदावाग्निपरिवारितः २४ दस्युभिर्वावृतःशून्येगृहीतोवापिशत्रुभिः सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः २५ राज्ञाक्रुद्धेनचाज्ञप्तोवध्योबंधगतोपिवा आघूर्णितोवावातेनास्थितःपोतेमहार्णवे २६ पतत्सुचापिशस्त्रेषुसंग्रामेभृशदारुणे सर्वबाधासुघोरासुवेदनाभ्यर्दितोपिवा २७

भांमोक्षाभ्युदयसाधनींप्रयच्छंतिददति अरण्यइत्यादिश्लोकचतुष्टयमेकान्वयि प्रांतरेदूरशून्यमार्गे अरण्यइत्यस्यदावाग्नीत्यादिनान्वयः प्रांतरइत्यस्यदस्युभिरित्यादिनान्वयः २४ वनहस्तिभिरित्यस्यवृतोवेतिशेषः २५ राज्ञेति क्रुद्धेनराज्ञाचवध्यइत्याज्ञप्तइत्यन्वयः सर्वत्रवासमुच्चये महार्णवेपोतेस्थितोवातेनाघूर्णित आकुलितश्च २६ पतत्स्वेति सर्वासुबाधासुमहापीडासुवेदनयादुःखेनाभ्यर्दितश्च २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरन्निति मुच्येतेतिकर्मकर्त्तरितङ् संकटंदुःखंउत्तरार्द्धमुत्तरान्वयि २८ दूरादेवेति ममचरितंस्मरतः ममप्रभावात् दूरात्पलायत इत्यन्वयः उत्तरार्द्ध
स्यऋषिरुवाचेत्यादिः चंडोदारुणः २९ पश्यतामिति अनादरेषष्ठीनिरातंकाः निर्भयाः ३० दैत्याः शेषादैत्याः ३१ आययुः प्राविशन् ३२ एवमिति स

स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् ममप्रभावात्सिंहाद्याद्दस्यवोवैरिणस्तदा २८ दूरादेवपलायंतेस्मरतश्चरितंमम ऋषिरुवाच इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा २९ पश्यतामेवदेवानांतत्रैवांतरधीयत तेपिदेवानिरातंकाःस्वाधिकारान्यथापुरा ३० यज्ञभागभुजःसर्वेचक्रुर्विनिहतारयः दैत्याश्चदेव्यानिहतेशुंभेदेवरिपोयुधि ३१ जगद्विध्वंसिनितस्मिन्महोग्रेतुलविक्रमे निशुंभेचमहावीर्येशेषाःपातालमाययुः ३२ एवंभगवतीदेवीसानित्यापिपुनःपुनः संभूयकुरुतेभूपजगतःपरिपालनम् ३३ तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते सायाचिताचविज्ञानंतुष्टाऋद्धिंप्रयच्छति ३४ व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्वर महाकाल्यामहाकालेमहामारीस्वरूपया ३५

भूयदृश्यशरीरात्प्रादुर्भूय अंतरधीयतेतिकर्मकर्त्तरिलङ् ३३
दृष्टंमोहकारणमुपसंहरति तयाइति प्रसूयतेजनयति अथार्चिताफलमुद्दिश्यकृतभक्तिर्विज्ञानमात्मतत्त्वज्ञानंयच्छति तुष्टाफलोद्देशेनक्रियमाणकर्मणाऋद्धिंप्रयच्छति संहितायाअविवक्षितत्वान्नसंधिः ३४ व्याप्तमिति महतोब्रह्मादीनपिकलयति अधिकारेषुवर्त्तयति सामहाधिकालीतथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकाले प्रलये महामारी संहारक्रियातद्रूपया तयैतत्सकलंव्याप्तमित्यन्वयः ३५ सैवेति काले प्रलये महामारी संहारशक्तिः सृष्टिः सर्गशक्तिः अजाजन्म-
हीनाकालेस्थितिकालेसनातनी नाशहीना ३६ भवकालेसंपत्समयेवृद्धिप्रदेतिलक्ष्मीविशेषणम् अभावेव्यापत्काले ३७ पुष्पैर्धूप गंधदीपाद्यैः संपूजि
तेत्यर्थः ३८ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेद्वादशोऽध्यायः १२ ऋषिरुवाच एतादिति एवमुक्तप्रकारेणधा-

सैवकालेमहामारीसैवसृष्टिर्भवत्यजा स्थितिंकरोतिभूतानांसैवकालेसनातनी ३६ भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृ
हे सैवाभावेतथालक्ष्मीर्विनाशायोपजायते ३७ स्तुतासंपूजितापुष्पैर्धूपगंधादिभिस्तथा ददातिवित्तंपुत्रांश्चमतिंधर्मे
गतिंशुभाम् ३८ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेव्याश्चरितमाहात्म्यंनामद्वादशोऽध्यायः १२
ऋषिरुवाच एतत्तेकथितंभूपदेवीमाहात्म्यमुत्तमम् एवंप्रभावासादेवीययेदंधार्यतेजगत् १ विद्यातथैवक्रियतेभगवद्विष्णु
मायया तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः २ मोह्यंतेमोहिताश्चैवमोहमेष्यंतिचापरे

र्यतइतिसृष्टिप्रलययोरुपलक्षणं हेभूपेतिसुरथ
विशेषणम् १ विद्यातत्त्वज्ञानं तथैवेतिसमुच्चये तयादेव्या त्वंसुरथः एषवैश्यः समाधिः उत्तरार्द्धमुत्तरान्वयि तथैवान्येअन्येचेत्यर्थः विवेकिनः अधिगतलोकशास्त्राः
२ मोह्यंतइति मोहोमिथ्याज्ञानम् उपैहीति वृद्धिश्छांदसी ३ आराधितेतिसैवेत्यनेनसर्वत्रफलदात्रीयमेवेतिसूचितम् भोगः ऐहिकः ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्कंडेयउवाच३इतीति ४ प्रणिपत्येति शंसितव्रतम् तीव्रव्रतम् निर्विण्णोदुःखाकुलः ममत्वंस्वीयत्वाध्यवसायः ५ जगामेति सराजावैश्यश्चेत्यर्थः
एवमग्रेपि ६ देवीसूक्तंऋग्वेदप्रसिद्धमित्येके वस्तुतोदेवीसूक्तंनमोदेव्याइत्यादिकं पंचमाध्यायस्थस्तुतिरूपं तत्रसर्वदेवतायाः कूटस्थायाः महालक्ष्म्याः

तामुपैहिमहाराजशरणंपरमेश्वरीम् ३ आराधितासैवनृणांभोगस्वर्गापवर्गदा मार्कंडेयउवाच इतितस्यवचः
श्रुत्वासुरथः सनराधिपः ४ प्रणिपत्यमहाभागंतमृषिंशंसितव्रतम् निर्विण्णोतिममत्वेनराज्यापहरणेनच ५ जगामस-
द्यस्तपसेसचवैश्योमहामुने संदर्शनार्थमंबायानदीपुलिनमास्थितः ६ सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन् तौतं
स्मिन्पुलिनेदेव्याः कृत्वामूर्त्तिंमहीमयीम् ७ अर्हणांचक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः निराहारौयताहारौतन्मनस्कौसमा
हितौ ८ ददतुस्तौबलिंचैवनिजगात्रासृगुक्षितम् स्तोत्रंशंभ्रादिवधार्थिभिर्दृष्टम् सर्वक्लेशपरिहारैश्वर्यादिफलकंतत्कामाभ्यांताभ्यांजसं

अनुपदस्कृतत्वात् बुद्धिसन्निहितत्वाच्चेदमेवदेवीसूक्तंदेवीपदेनचगृहीतुमुचितंलक्ष्मीतंत्रसंमतश्चायमर्थः इतिप्रागेवनिरूपितमित्यपरे प्राणाधःसं-
स्थितंबीजंव्योमबीजंहुताशनः त्रिकोणबिंदुनादाढ्यंप्रणवादिनमोंतकम् अंबिकासिद्धिदंज्ञेयंदेवीसूक्तंपरंस्मृतमितिक्वचित्सम्यक्‌ ७ अर्हणांपूजां अ-
ग्नितर्पणंहोमः पुष्पधूपौगंधदीपाद्युपलक्षकौ आदौयताहारौ अल्पाहारौ ततोनिराहारौ अनेनहठयोगः सूचितः तन्मनस्कौदेवीमनस्कौसमाहि-
तौत्यक्तबाह्यचेष्टौ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तौबलिंच पशुकूष्मांडादिरूपहारं ददतुरेवेत्यस्य राजेत्यादि राजेव निजरुधिरसिक्तं एतेन वैश्यस्य तत्त्वज्ञानेच्छया सात्त्विकत्वेन कथं राजसपूजायां प्रवृत्तिरित्य-
पास्तम् राजसपूजाधिकारत्वेन ततस्तस्य सात्त्विकफले बाधकाभावाच्च ब्राह्मणस्य सात्त्विकपूजया राजसफलवत् यतात्मनोर्जितचित्तयोः प्रत्यक्षमिति-
क्रियाविशेषणम् देव्युवाच यदित्युत्तरार्द्धम् कुलनंदनेति वैश्यसंबोधनम् ज्ञानार्थित्वेन प्रशस्तत्वात् भत्तइति प्राप्यतां स्वीक्रियताम् तत् प्रार्थ्यमानम्

एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ९ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका देव्युवाच यत्प्रार्थ्यते त्वया भूप त्वया च कुल
नंदन १० मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि वाम् मार्कंडेयउवाच ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ११ अत्रापि
च निजं राज्यं हतशत्रुबलं बलात् सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः १२ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकम्
देव्युवाच स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् १३ हत्वा रिपूनस्खलितं तव तत्र भविष्यति मार्कंडेयउवाच ततइत्युत्तरा

र्द्धम् अविभ्रंशि चिरस्थायि ११ अत्रापिचेति अत्राथास्मिन् जन्मन्यपि बलाद्धत शत्रुबलमिति राज्यविशेषणम् ज्ञानं तत्त्वज्ञानं निर्विण्णमानसः संसा
राद्विरक्तमानसः १२ ममेत्यहमिति चयः संगस्तद्विच्युतिस्तन्नाशस्तत्करमिति ज्ञानविशेषणम् समासोन छांदसः प्राज्ञत्वं सुक्तोच्छयाति बुद्धिमत्त्वाच्च स्व
ल्पैरिति स्वं राज्यमित्यसमस्तम् १३ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri

हतेति तत्रराज्येतवास्खलितमस्खलनंभविष्यति उत्तरार्द्धमुत्तरान्वयि १४ सावर्णिकइति यद्वाचकंनामतदुपलक्षितोमनुरित्यर्थः वैश्येत्याद्युत्तरान्वयि
अस्मत्तइतिबहुवचनंस्वस्यसर्वात्म्यद्योतकं १५तमिति संसिद्ध्यैमुक्तये तादर्थ्येचतुर्थी ज्ञानंब्रह्मज्ञानम् मार्कंडेयउवाच इतीति १६ बभूवेति
देव्याइत्यपादानेपंचमी सूर्यादिति सावर्णिर्भविता मनुरित्यस्यपुनरावृत्तिराचारात् वक्ष्यमाणकात्यायनीतंत्राच्च अंत्येमनुरित्यनेनसावर्णि

मृतश्चभूयःसंप्राप्यजन्मदेवाद्विवस्वतः१८सावर्णिकोमनुर्नामभवान्भुविभविष्यति वैश्यवर्यत्वयायश्चवरोस्मत्तोभि
वांछितः१९तंप्रयच्छामिसंसिद्ध्यैतवज्ञानंभविष्यति मार्कंडेयउवाच इतिदत्वातयोर्देवीयथाभिलषितंवरं१६बभू
वांतर्हितासद्योभक्त्यातांभ्यामभिष्टुता एवंदेव्यावरंलब्ध्वासुरथःक्षत्रियर्षभः सूर्याज्जन्मसमासाद्यसावर्णिर्भ
वितामनुः १७ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येसुरथवैश्ययोर्वरप्रदानंनामत्रयोदशोऽध्यायः१३

रित्यारभ्यसावर्णिर्भवितामनुरित्यंतोयंमहामालामंत्रइतिसूचयतीति तदुक्तंलक्ष्मीतंत्रे सम्यक्वृद्ध्यादिस्थितासेयंजन्मकर्मावलिःस्तुतिः एतांद्विजसुरश्र
तुज्ञात्वा अधीयानोनरःसदा विधूयनिखिलांमायांसम्यक्ज्ञानंसमश्नुते सर्वसंपद आप्नोतिधुनोतिसकलापदः इतिसर्वेष्टसिद्धिः१७इतिकालोप- ५१
नामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेत्रयोदशोऽध्यायः १३ श्रीर्जयतु सामविधिब्राह्मणेथयःकामयेतपुनर्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रावितिंप्रपद्येपुनर्भूमयोभूंकन्यांशिखंडिनींपाशहस्तांयुवतींकुमारिणीमादित्यःश्रीचक्षुषेवां
प्रत्याजायेयमित्यपुनर्भवमधिकृत्यतदनुसंधेयोस्यामंत्रउक्तः रात्रिंप्रपद्येपुनर्भूमयोभूंकन्यांशिखंडिनींपाशहस्तांयुवतींकुमारिणीमादित्यःश्रीचक्षुषेवां
तः प्राणायसोमोगंधायापःस्नेहायमनोनुज्ञायपृथिव्यैशरीरमिति अस्यरात्रीजपमात्रात्सिद्धिः अस्यफलंमरणकालज्ञानंपरमफलंतुमोक्षइति त
त्रैवोक्तम् अयंचदेवीविषयोमंत्रः कन्यांकुमारिणीमित्यत्रप्रत्यभिज्ञानात् रात्रिंतद्रूपाम् अस्यास्तत्तुस्तमोद्वारानिशादिवसनाशिनीतिदेवीसुपक्र
म्यहरिवंशोक्तेः पुनर्भूःअक्रूरवधार्थंनानावतारग्रहात् अतएवमयोभूःप्राणिनांसुखदात्री कंन्याअजातपुंस्पर्शरतिरधृष्याचातिसुंदरीति-
शिवोक्तेः शिखंडिनीमयूरपिच्छभूषणामयूरकलापध्वजाच भूषणैस्तुमयूराणामंगदाद्यैश्चभास्वरा ध्वजेनशिखिबर्हाणामुच्छ्रितेनसमावृ
तेतिहरिवंशोक्तेः पाशहस्ताअक्रूरबंधनार्थं तथायुवतिः नित्यंबाल्यवार्द्धकावस्थारहिता कंसमोहनावतारेक्षणंशैशवाभिनयेपितदानीमे
वयौवनाविष्करणोक्तेः एवंभूतायाराव्यभिमानिदेवतायाः प्रभावादादित्यश्चक्षुषेचक्षूरक्षितुंभवतु यत्नवान्भवत्वितिक्रमेणार्थःमनस्तद
धिष्ठात्रीदेवता अनुज्ञाय अनुज्ञामानंरक्षितुंभवतु पृथिव्यैशरीरमित्यस्यविभक्तिपरिणामेनपृथिवीशरीरायेत्यर्थः अथास्यसप्तशतीलव्यव
हारप्रयोजकसप्तशतहोममंत्रविभागोदर्शितःकात्यायनीतंत्रे मार्कंडेयऋषिःप्रोक्तोप्रथमःश्लोकतःप्रिये व्योमादिवर्णसंभूतोद्वितीयःस्वरसं-
युतः व्योमादकारस्तस्यादिःसकारःद्वितीयःस्वर आकारइत्यर्थः नृपांतंप्रवदेन्मंत्राःसर्वेचाष्टादशप्रिये वैश्योवाचततःश्लोकाव्योमाद्याःपं
चमंत्रकाः व्योमाद्यआद्योयेषामितिमृगनयनावत्समासः नृपस्योक्तिमंतिवर्णोद्वादशस्वरसंयुतः मांतवर्णोयःसच द्वादशस्वरेणएका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणयुक्त आदिभूतः इत्यर्थः सकारोबिंदुसंयुक्तस्त्वांतेस्तोमनुरीदृशौ २५ मनुर्मनूइत्यर्थः वैश्योवाचपुनर्देवि स्वरैकादश आदितः स्वरैकादशैः एका
रः वह्निबीजं बिंदुयुक्तमंतेस्यान्मनुपंचकम् वह्निबीजंरमिति २० मार्कंडेयऋषिप्रोक्तंमंत्रत्रयमुदाहृतम् तादिवर्णंचभुवनस्वरयुग्वारुणंपरम् भुव
नस्वर औतद्युक्तंवारुणंवोइति राजोवाचेतिषण्मंत्राभादितांताः शुभानने अथोवाचऋषिंज्ञानमस्तीत्यादिस्फरेश्वरि सर्वेश्वरेश्वरीचांतेमंत्रावेद्
दशस्फुटाः राजोवाचेतिभगवानादिरंतेविदांवरः मंत्रत्रयमिदंख्यातंततोऋषिरुवाचह नित्यैवसायदाचादौप्रभुरंतेष्टमंत्रकः ब्रह्मोवाचततश्चो
क्तालंस्वाहादिमहासुरैः अंतेपंचदशैतेस्युर्मंत्राश्चपरमेश्वरि एवंस्तुत्यादिऋष्युक्तिर्वतिमंत्राश्चसप्तवै ततोभगवदुक्तिस्तुभवेदादिमनुद्वयम् वंचि
तेतिचऋष्युक्तिर्मंत्रौद्वौपरमेश्वरि ऋष्युक्तिश्चतथेत्यादिमंत्रद्वयमुदाहृतम् सर्वेलोकास्त्विहाध्यायेष्युक्सप्ततिचक्रमात् मध्येचतुर्विंशतिकाअ-
ष्टमंत्राःप्रकीर्तिताः सर्वाश्चाहुतयोज्ञेयाश्चतुरुत्तरकंशतम् उवाचांतास्तत्रबोध्यामंत्राभुवनसंख्यकाः १४ इतिप्रथमचरितनिर्णयोनामविं
शतिमंपटलम् २० ईश्वरउवाच द्वितीयेऋष्युवाचेतिनवषष्ठ्याहुतिःक्रमात् ततस्तृतीयेध्यायेतुऋषिरुवाचदेशिके पंचविंशच्चवैमंत्राःश्लो
काज्ञेयावरानने देव्युवाचेतिमंत्रांतेमंत्रश्लोकोमतःप्रिये ऋषिरुक्तिःपुनःश्लोकाःपंचमंत्राःसनातनाः एवमाहुतयस्तत्रचत्वारिंशच्चतुर्युताः
चतुर्थेक्रमतोदेविऋष्युक्तिःषट्चविंशतिः पुनस्तथैवऋष्युक्तिःश्लोकौद्वौमंत्ररूपिणौ एवंस्तुतेतिमंत्रोयमतियुध्यंस्फपाचनम् देव्युवाचेति- ५२
व्रियतांमंत्रोयंषोडशाक्षरः देवाऊचुस्ततश्चोक्ताभगवत्याकृतंवदेत् मंत्रोयंशतवर्णाख्योद्वादशोत्तरयुक्पुनः ततोऋषिरुवाचेतिइतिप्रसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दितेतिवै चतुःसंख्यास्तुतेश्लोकामंत्रास्तावंतएवहि श्लोकाश्चतुर्थेध्यायेतुषट्त्रिंशत्परमेश्वरि अर्द्धमंत्रद्वयेनैवचत्वारिंशाद्धियुक्पुनः एवंमध्यचरित्रस्यपंचा
शच्चशतोत्तरम् तथापंचायुतंमंत्रामहालक्ष्म्याविभेदतः इतिमध्यमचरित्रमंत्रनिर्णयएकविंशतितमंपटलम् २१ ऋषिरुवाचेतिपुराविष्णुमायाम्
तुष्टुवुः षण्मंत्राःश्लोकरूपास्तेदेवाऊचुस्ततःपरम् नमोदेव्यादितःश्लोकास्त्रिंशद्भिनम्रमूर्त्तिभिः विष्णुमायादितोभ्रांतिरूपातेत्रोणिषष्टियुक् अव
तारेपृथक्मंत्रास्तेषांत्रिषष्टिराहुतिः चितिरूपेणमंत्रेणआहुतित्रयमुच्चरेत् एवंमंत्राअशीतिस्तेऋषिरुवाचइत्यथ एवंस्तवादियुक्तानांत्वयाक-
स्मान्नगृह्यते मंत्राःसप्तदशैतेतुऋष्युक्तिश्चनिशाम्येतिवै इत्यादित्रितयैर्मंत्रैः शुद्धभेदाःप्रकीर्तिताः अथदूतउवाचेतिदेविदैत्येश्वरःपरम् इत्यादिनव
मंत्राश्चपुनःऋषिरुवाचह इत्युक्तेत्यादिमंत्रेणहेकेनचसरस्वति देव्युवाचेतिश्लोकास्तुचत्वारोमंत्रभेदतः दूतोवाक्येतिपुनरप्यवलिप्तासिइत्यथ मं-
त्राश्चत्वारिविज्ञेयादेव्युवाचततःपरम् एवमेतद्बलीशंभोसचयुक्तंकरोतुयत् इतिमंत्रद्वयंश्लोकावंगमंत्राश्चतेनव एकोनत्रिंशच्चशताद्धिकाम
त्ररूपकाः इतिपंचमोध्यायः ५ ऋषिरुवाचेत्याकर्ण्यश्लोकाश्चत्वारईरिताः पुनःऋषिरुवाचेतितेनाज्ञप्तस्ततःपरम् मंत्रत्रयमिदंप्रोक्तंदेव्युवाचे
तिवैतदा दैत्येश्वरेणप्रहितोएकमंत्रःप्रकीर्त्तितः ततश्चऋषिरुवाचइत्युक्तःसोभ्यधावतः इत्यादि द्वादशश्लोकभेदास्तादेवताहुतयःक्रमात्
इतिषष्ठोऽध्यायः ६ ऋष्युक्तिराज्ञइत्यादित्रयोविंशतिमातरः ऋषिरुवाचतावानीतौमातृभेदद्वयंक्रमात् सप्तविंशत्यत्रदेविभवंत्याहुतयःक्र
मात् अत्राध्यायद्वयेदेवीधूम्राक्षीतुप्रकीर्तिता इतिसप्तमोऽध्यायः ७ ऋषिश्चंडेचनिहतइत्यध्यायवसानकम् त्रिषष्ट्याहुतयःप्रोक्ताएकाअ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्द्धाहुतिः क्रमात् रक्ताक्षीदेवताअष्टौमहाशक्तयःप्रकीर्तिताः इत्यष्टमोध्यायः ८ राजाविचित्रमित्यादिश्लोकद्वयमुदाहृतम् ऋषिश्चकारकोपं-
हिइत्यादिश्लोकरूपतः एकचत्वारिंशादिति आहुतिर्नवमेस्मृता इतिनवमोध्यायः ९ ऋषिर्निशुंभंनिहतमित्यादिद्वयमत्रकम् ततोदेवीतिमंत्रोद्वौएकं
वाहमनुत्तमौ पुनर्देव्यैकमंत्रेणव्यक्तमंत्राउदीरिताः ऋषिस्ततःप्रववृतेसार्द्धद्वाविंशतित्रयम् द्वात्रिंशन्मनवस्तत्रएकोत्थर्द्धमनुर्मतः दशमेसिंहमा
सीनाशूलपाशविधारिणी मुख्याचतुर्भुजाबाणचापहस्ताशुभेक्षणा इतिदशमोध्यायः १० इतिद्वाविंशतितमंपटलम् २२ ऋषिःस्रमेधाविख्या
तःप्रोक्तोदेव्याहतेस्मृमे चतुस्त्रिंशत्तथाश्लोकामंत्रास्तत्संख्यकाश्वते ततोदेव्येकमंत्रेणवरदाहंस्ररेश्वरि देवाऊचुस्तथासर्वबाधाप्रशमनंतथा
श्लोकेनैकेनदेवेशिदेव्युवाचततःपरं वैवस्वतेंतरेप्रासेत्यादिश्लोकाश्चतुर्दश सार्द्धासर्वाहुतिर्देवि पंचाशत्संचसंयुता वैष्णवीदेवतात्यत्रमहाग-
रुडवाहिनी इत्येकादशोध्यायः ११ देव्युवाचेतिततएभिःस्तवैश्चमांसदा दूरेत्यर्द्धेनसहिताअष्टाविंशतिरूपकाः ततश्चऋषिरुवाचइत्युक्ता
श्लोकमादितः अर्द्धयुङ्नवभिःश्लोकैर्मंत्रास्तत्संख्यकामताः एवंतुद्वादशेध्यायेएकचत्वारिंशदाहुतिः इतिद्वादशोऽध्यायः१२ ततस्त्रयोद
शेध्यायेऋषिरुवाचइत्यथ एतत्तेकथितंभूपेत्यादिसार्द्धत्रयंमनुः मनुचतुष्टयमित्यर्थः मार्कंडेयउवाचेतिइतितस्यवचोदितः श्लोकषट्कंततोदेवीउ
वाचपरमेश्वरी यत्प्रार्थ्यतेत्वयाभूपश्लोकेनैकेनतोषकृत् मार्कंडेयउवाचेतिततोवक्ष्येमनुत्रयम् देव्युवाचपुनश्चैवस्वल्पश्लोकत्रयेणवै अर्द्धाना
मेवमंत्रत्वाद्भवत्यत्रषडाहुतिः षट्संख्याहुतिरित्यर्थः ततोमार्कंडेयइतिइतिदत्वातयोरिति द्वौमंत्रोपुनरुच्चार्यसावर्णिर्भवितामनुः एकोनविं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत्संख्याकाहुतिरत्रविधीयते एवंत्रयोदशेध्यायेहोमतर्पणकर्मणि शतानिसप्तसंख्यानितवप्रोक्तानिशैजले सकारादिनकारांतोमनुःपरमदुर्लभः ससं
प्रदायविधिनाज्ञातव्योममवल्लभे अन्यथाविफलोमंत्रःसत्यंसत्यंमयोदितम् तत्रमंत्रेस्वाहांताएतेमंत्रानमोंताः तर्पणेतर्पयाम्यंताः इतित्रयोविं-
शतितमंपटलम् २३ केचित्तुमंत्रंपठित्वाततस्तदध्यायदेवतायैनमइतिपूजनइत्याहुः एवंहोमाशक्तोजयंतीमंत्रेणैवहोमउक्तोन्यत्रपूजाचेतिदि
क् कात्यायनीतंत्रोक्तमंत्रविभागएवाभियुक्तैःस्पष्टीकृत्यदर्शितस्तथाहि अष्टसप्तत्युत्तराणांश्लोकानांशतपंचकम् प्रोक्तंसप्तशतीस्तोत्रंतत्सप्त
शतसंख्यया विभज्यजुहुयान्मंत्रमितिकात्यायनीमतम् मार्कंडेयउवाचेकःसावर्णाद्यास्ततःपरम् २ श्लोकमंत्राःसप्तदश अर्द्धश्लोकात्मकस्ततः
एकोनविंशदेवंस्युर्वैश्योक्तिर्विंशातिस्तथा ३ पुनरर्द्धंपुनःश्लोकत्रयमर्द्धंपुनर्भवेत् पंचविंशातिरेवंस्याद्राजाषड्विंशतिस्ततः ४ अर्द्धश्लोकात्म
कोमंत्रोमंत्रसंख्याप्रकीर्तिता ५ पुनरर्द्धंपुनःश्लोकत्रयमर्द्धंपुनर्भवेत् मार्कंडेयःपुनश्चार्द्धश्लोकःश्लोकात्मकःपुनः ६ अर्द्धश्लोकात्मकोमंत्रोरा
जार्द्धश्लोकमंत्रकः मंत्राश्चत्वारिंशदेवंश्लोकमंत्रचतुष्टयं ७ पुनरर्द्धमृषिश्चार्द्धश्लोकमंत्राःपुनर्दश पुनरर्द्धंपुनाराजाएकोनाशष्टिरुच्यते ८ पुन
रर्द्धंपुनःश्लोकःपुनरर्द्धंपुनर्ऋषिः पुनरर्द्धंपुनःश्लोकाःषण्मंत्राःपुनरर्द्धकम् ९ निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः इत्येवपाठोमंत्राणामेकस
प्ततिरुच्यते १० ब्रह्मार्द्धश्लोकमंत्रोथश्लोकमंत्रास्त्रयोदश अर्द्धश्लोकऋषिश्चार्द्धश्लोकःश्लोकास्तुपंचवै ११ पुनरर्द्धंतुमंत्राणांसपंचनवतिःस्मृ
ता भगवानर्द्धमंत्रेर्द्धंऋषिश्लोकार्द्धकंपुनः १२ श्लोकःपुनऋषिश्लोकद्वयमंत्रद्वयंभवेत् श्लोकानामष्टसप्तत्याचतुर्भिरधिकंशतम् १३ अध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यादावेवऋषिरुवाचेतिसकृन्मनुः अष्टषष्टिमिताःश्लोकास्तावंतोमनवःस्मृताः १४ एकोनसप्ततिःसर्वेध्यायेमंत्राद्वितीयके आद्यादृषिरुवाचैकःपंचविंशत्ततः
परम् १५ निहन्यमानाद्याःश्लोका सुरवरागाकुलाक्षरम् इत्यंतादेव्युवाचैकोगर्जगर्जेतिचापरः १६ श्लोकाऋषिरुवाचेतिपुनश्चश्लोकपंचकम् चतुश्च
त्वारिंशदेवंसर्वेमंत्रास्तृतीयके १७ भगवत्याकृतंसर्वमित्यर्द्धश्लोकमंत्रकः यदयंनिहतश्लोकद्वयेदेवीततःपरम् १८ ऋषिश्लोकास्तुचत्वारोमनवःप
रिकीर्तिताः षड्त्रिंशच्छ्लोककेऽध्यायेचत्वारिंशद्व्याधिकम् १९ षट्सप्ततिश्लोकयुक्तेध्यायेमंत्रास्तुपंचमे एकोनत्रिंशदधिकंशतंकात्यायनीमतम् २०
एकोऋषिरुवाचेतिपुराशुंभादयश्चषट् श्लोकमंत्रास्ततोदेवाऊचुश्चैवाष्टमोमनुः २१ नमोदेव्यादिकाःश्लोकाःपंचमंत्राःप्रकीर्त्तिताः त्रयोदशैवमंत्रास्तु
यादेवीत्यादयोपिच २२ एकविंशतिकाःश्लोकाश्चांत्यंतास्तेषुमंत्रकाः प्रतिश्लोकंत्रयोमंत्राज्ञेयाःसर्वेत्रिषष्टिकाः २३ पुनःश्लोकात्मकोमंत्रास्त्रिमंत्रःश्लो
ककःपुनः त्रयोविंशच्छ्लोककेषुमंत्रावेसप्तषष्टिकाः २४ यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता नमस्तस्यैइतिप्रोक्तोविंशत्यक्षरकोमनुः २५ नमस्त-
स्यैइतिप्रोक्तोद्वितीय श्चतुरक्षरः अष्टाक्षरस्तृतीयोपिनमस्तस्यैनमोनमः २६ एवंद्वात्रिंशतिश्लोकेज्ञेयंतंत्रत्रयंबुधैः पूर्वैस्त्रयोदशैर्मंत्रैःसहाशीति-
रुदाहृता २७ स्तुतासुरैरितिचश्लोकद्वयंचैवपुनर्ऋषिः पुनःसप्तदशाश्लोकाऋषिःश्लोकत्रयंततः २८ दूतश्चैवनवश्लोकाऋषिरेकोंबिकाततः एकइत्य
स्यैकश्लोकइत्यर्थः चतुःश्लोकीपुनर्दूतश्चतुःश्लोकीपुनःशिवा २९ श्लोकद्वयंमिलित्वातुचत्वारिंशन्नवाधिकम् अशीत्यापिचसंयोगेएकोनत्रिंश ५४
ताधिकम् ३० शतमेवंतुविज्ञेयमाहुतीनांचपंचमे विंशतिःश्लोकसंयुक्तेषष्ठेध्यायेप्रकीर्तिताः ३१ सर्वेश्लोकामंत्ररूपादेव्यैकाथऋषित्रयम् चतु

CC-0. In Public Domain. Digitization by eGangotri

विंशतिमंत्राणामित्येवंपरिकीर्तिताः ३२ पंचविंशतिश्लोकयुक्तेध्यायेमंत्रास्तुसप्तमे सर्वेमंत्राःश्लोकरूपाऋष्युवाचद्वयंततः ३३ सप्तविंशतिरेवंतु मंत्रसंख्याप्र
कीर्तिता सार्द्धैकषष्टिश्लोकाढ्येष्टमेध्यायेप्रकीर्त्तिता ३४ एकषष्टिश्लोकमंत्रा अंतेर्द्धश्लोकमंत्रकः आदावेकोऋषिश्चैवत्रिषष्टिर्मंत्रसंततिः ३५ ए
कोनचत्वारिंशाद्भिः श्लोकैर्युक्तेसमीरिताः अध्यायेनवमेमंत्रास्तावंतोथमनुद्वयम् ३६ राजाऋषिश्चेतिचैकचत्वारिंशन्मनुस्त्वयम् सार्द्धसप्तान्विते
विंशश्लोकैस्तुदशमेन्विते ३७ सप्तविंशतिमंत्रास्तुश्लोकरूपास्ततोंतिमः अर्द्धश्लोकात्मकोमंत्रोऋष्युवाचद्वयंतथा ३८ देव्युवाचद्वयंचैवद्वात्रिंशन्मंत्रसं
ग्रहः श्लोकानांसार्द्धपंचाशत्ज्ञेयमेकादशेस्फुटम् ३९ पंचाशच्छ्लोकमंत्रास्तु अंतेर्द्धश्लोकमंत्रकः शाकंभरीतिविख्यातिंतदायास्याम्यहंभुवि ४० एषोर्द्ध
मंत्रईत्याहुःकेचिद्त्रविचक्षणाः देवीद्वयमृषिश्चैकोदेवा एकमितीरितम् ४१ पंचाधिकास्तुपंचाशन्मंत्राज्ञेयापरिस्फुटम् अष्टात्रिंशच्छ्लोकयुक्तेध्य-
ध्यायेद्वादशात्मके ४२ चत्वारिंशच्च एकश्चमंत्रास्तत्राहुतिद्वयम् अर्द्धश्लोकात्मकश्लोकाः सप्तत्रिंशन्मिताऋषिः ४३ देव्युवाचेतिचैकैकमेवंसंख्या-
स्फुटोदिता त्रयोदशेसार्द्धसप्तदशश्लोकाःप्रकीर्तिताः ४४ ऋषिरुवाचेत्यारभ्यभोगस्वर्गापवर्गदा इत्यंतापंचमंत्रास्तेमार्कंडेयस्ततःपरम् ४५ इति
तस्यवचःश्रुत्वेत्यर्द्धमंत्रस्तथास्मृतः श्लोकमंत्रास्ततोज्ञेयाःपंचैवाप्यर्द्धपद्यकम् ४६ देव्युवाचेतिमंत्रोयंततःश्लोकस्तुमंत्रकः मार्कंडेयस्ततोमंत्रःश्लो
कोमंत्रद्वयंततः ४७ ततोदेवीषडर्द्धानिसप्तमंत्राःप्रकीर्तिताः मार्कंडेयस्ततोमंत्रद्वयंमंत्रत्रयंस्मृतम् ४८ आहुत्यात्वधिकोमंत्रः सावर्णिर्भवितामनुः
एकोनत्रिंशत्संख्याकामंत्रा अत्रस्मृताबुधैः ४९ केचित्तुएकादशार्द्धाहुतयोद्वादशश्लोकमंत्रकाः उवाचवचनैःषड्भि मंत्रास्तेउक्तसंख्यकाःइत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुः ५० तत्रकात्यायनीतंत्रविरोधःस्पष्टएवेतिदिक् अथवाराहीतंत्रे चंडीपाठफलंदेविशृणुष्वगदतोमम एकावृत्यादिपाठानांप्रत्येकंपठतांनृणाम् १
संकल्प्यपूज्यांसंपूज्यन्यस्यांगेषुमनून्सकृत् पश्चाद्बलिप्रदानेनफलमाप्नोतिमानवः २ न्यासप्रकारश्चनवार्णविधानेउक्तस्ते उपसर्गोपशांत्यर्थंत्रि
रावृत्तंपठेन्नरः ग्रहदोषोपशांत्यर्थंपंचावृत्तंवरानने ३ महाभयेसमुत्पन्नेसप्तावृत्तमुदीरयेत् नवावृत्त्याभवेच्छांतिर्वाजपेयफलंलभेत् ४ मुच्येतप्रा
णान्तिजाड्यादितिवा ४ राजवश्यायभूत्यैचरुद्रावृत्तमुदीरयेत् अर्कावृत्याकामसिद्धिर्वैरिनाशश्चजायते ५ मन्वावृत्त्यारिपुर्वश्यस्तथास्त्रीव-
श्यतामियात् सौख्यंपंचदशावृत्याश्रियमाप्नोतिमानवः ६ कलावृत्यापुत्रपौत्रधनधान्यागमंविदुः राजभीतिविनाशायवैरस्योच्चाटनायच ७
कुर्यात्सप्तदशावृत्तंतथाष्टादशकंप्रिये महारणविमोक्षायविंशावृत्तंपठेन्नरः ८ पंचविंशावर्त्तनाच्चभवेद्बंधविमोक्षणम् संकटेसमनुप्राप्तेदु-
श्चिकित्स्यभयेसदा ९ जातिध्वंसेकुलोच्छेदे आयुषोनाशआगते वैरिवृद्धौव्याधिवृद्धौधननाशेतथाक्षये १० तथैवत्रिविधोत्पातेतथाचैवातिपा
तके कुर्याद्यत्नाच्छतंवृत्तंततःसंपद्यतेशुभम् ११ विपदस्तस्यनश्यंतिततोयातिपरांगतिम् श्रियोवृद्धिःशतावृत्याराजवृद्धिस्तथापरा १२ मनसा-
चिंतितंदेविसिद्ध्येदष्टोत्तराच्छतात् शताश्वमेधयज्ञानांफलमाप्नोतिसुव्रते १३ सहस्रावर्त्तनाल्लक्ष्मीरावृणोतिस्वयंस्थिरा भुक्त्वामनोगतान्कामान्न
रोमोक्षमवाप्नुयात् १४ यथाश्वमेधःक्रतुषुदेवानांचयथाहरिः स्तवानामपिसर्वेषांतथासप्तशतीस्तवः १५ उत्पत्तिचरितस्तोत्ररूपत्रितयात्म
कत्वात् अथवाबहुनोक्तेनकिमन्येनवरानने १६ चंड्याःशतावृत्तपाठात्सर्वाःसिद्ध्यंतिसिद्धयः एतास्वेवकामनासुतत्तत्संख्याकस्तोत्रपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठेविशेषउक्तोमरीचिकल्पे रात्रिसूक्तंजपेदादौमध्येसप्तशतीस्तवम् १७ प्रांतेतुजपनीयंवैदेवीसूक्तमितिक्रमः एवंसंपुटितंस्तोत्रंपूर्वोक्तफलदायकम् १८ अत्र-
रात्रिसूक्तंदेवीसूक्तंचवैदिकेइतिकेचित् रात्रिसूक्तंप्रथमाध्यायस्थंविश्वेश्वरीसूक्तं देवीसूक्तंनमोदेव्याइत्यादिपंचमाध्यायस्थमित्यपरे अन्योपिप्रकारस्तं
त्रोक्तः कृष्णाष्टमींसमारभ्ययावत्कृष्णाचतुर्दशी वृद्ध्यैकोत्तरयाजाप्यंपूर्वसंपुटितंतुतत् एवंदेविमयाप्रोक्तः पौरश्चरणिकःक्रमः तदंतेहवनंकुर्यात्प्रतिश्लो
केनपायसा प्रतिश्लोकेनेतिकात्यायनीतंत्रोक्तमंत्रोपलक्षणम् रात्रिसूक्तंप्रतिऋचंतथादेव्याश्चसूक्तक मितिपक्षांतरे ऋचमित्युक्तमंत्रोपलक्षणम् हुत्वां
तेप्रजपेत्स्तोत्रमादौपूजादिकंपुनरित्यपरश्च अथातःसंप्रवक्ष्यामिनवरात्रविधानकम् जपेदेकोत्तरांवृद्धिंदि नानिनवसंख्यया नवाक्षरीविधानेनसंपू
ज्यार्थविचक्षणः सहस्रंप्रजपेन्मंत्रंप्रत्येकंचयथाविधि मध्येचैकोत्तरांवृद्धिंजपेद्देव्याःस्तवमनुम् हुत्वादशांशतोहोमंतत्रसिद्धिंसमाप्नुयात् अपरश्च जा
पेद्बिल्वंसमाश्रित्यमासमेकंतुयोनरः हुत्वाबिल्वदलैर्मासंमधुरत्रययोगतः हुत्वादशांशतोवापिकमलैःक्षीरसंयुतैः धनदेनसमांलक्ष्मींप्राप्नुयादुत्तमां
ध्रुवं हरगौरीतंत्रे श्रीकामःपुष्टिकामोवासृष्टिमार्गक्रमेणतु जपेच्छक्रादिमारभ्यशुंभदैत्यवधावधि आदिमारभ्यप्रजपेत्सश्चाच्छेषंसमांचरेत् शांत्या
दिकामःसर्वत्रस्थितिमार्गक्रमेणतु सावर्णिःसूर्यतनयःसावर्णिर्भविताममनुः संकटेन्चांत्यमारभ्यपश्चादादिंसमापयेत् ब्राह्मणद्वाराकरणेतुविशेषउक्त
स्तत्रैव पंचस्वर्णाःशतावृत्तेलक्षावृत्तेतुतत्त्रयम् पंचावृत्तेःस्वर्णमेकंत्रिरावृत्तेतदर्द्धकं एकावृत्तेपादमेकंदद्याद्वाशक्तितोबुधइति प्रथमचरित्रस्यब्र-
ह्माऋषिः गायत्रीच्छंदः महाकालीदेवतानंदाशक्तिः रक्तदंतिकाबीजं अग्निस्तत्त्वं महाकालीप्रीत्यर्थंजपेविनियोगः मध्यमचरित्रस्यविष्णुर्ऋषिःउष्णि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृछंदः महालक्ष्मीर्देवता शाकंभरीशक्तिःदुर्गाबीजं वायुस्तत्त्वं महालक्ष्मीप्रीत्यर्थेजपेविनियोगः अंत्यचरित्रस्यशंकरऋषिः अनुष्टुप् छंदः महासरस्वतीदेवता
भीमाशक्तिः भ्रामरीबीजं रविस्तत्त्वं सरस्वतीप्रीत्यर्थेजपेविनियोगः शतावृत्त्यादौकामनाभेदेनहोमभेदउक्तः वाराहीतंत्रे हुनेत्प्रदीपितेवह्नौतिलधान्यादितं
डुलान् धर्मार्थकामसंवृद्ध्यैमोक्षार्थीपायसंहुनेत् मारणेहोमनेचैवतथोच्चाटनकर्मणि हुनेन्मांसंत्रिमध्वक्तंमोहनेमधुपायसं स्तंभनेचमातुफलंवश्ये
तुसितसर्षपान् धर्मार्थकाममोक्षार्थंपूर्वाशाभिमुखोहुनेत् मोहनेमारणेचैवहुनेद्दैदक्षिणामुखः उच्चाटनेउत्तरास्यइत्याहभगवान्भवः क्रोडतंत्रे
प्रत्येकावर्त्तनंदेविहयमेधेनसंमितम् त्रिरावृत्त्याभवेत्कामान् पंचावृत्त्यारिपून्जयेत् इतिसर्वेष्टसिद्धिः कात्यायनीविद्महेकन्याकुमारीधीमहि तन्नोदु
र्गाप्रचोदयात् इत्येतद्गायत्रीयजुर्वेदे अथगायत्रीप्रयोगांतरंकात्यायनीतंत्रे पूर्वाह्णेषोडशांगुलमितंचतुरोन्नतंस्थंडिलंकृत्वा तत्रशुद्धगोघृतेनैक
स्मिन्पात्रेरुद्रवर्त्तिषुत्रयोदशदीपान्प्रज्वाल्यतेषुप्रथमदीपेप्रथमाध्यायदेवतामावाह्यआसनपाद्यादिगंधदानांतांपूजांकृत्वापुष्पसमर्पणसमयेवक्ष्यमाणैर्नव-
भिःश्लोकैःप्रतिश्लोकंपुष्पाणिसमर्पयेत् ततःप्रथमाध्यायसमाप्तौवक्ष्यमाणश्लोकैः पुष्पाणिसमर्प्यधूपदीपौदत्वापायसनैवेद्यंदत्वाताम्बूलंदक्षिणांच
दत्वानौराज्यएकंब्राह्मणंकुमारींसुवासिनींचभोजयेत् संकल्पयेद्वा एवंतत्तदध्यायदेवतावाहनादिब्राह्मणभोजनांतंप्रत्यध्यायंकुर्यात् अंतेप्रसूतनैवेद्या
दिभिर्महापूजा अनुग्रहेपूर्वाह्णेसमाप्तिः निग्रहेपराह्णेश्लोकास्तुविश्वेश्वरीजगद्धात्रीं॰ स्तुतासुरैःपूर्वमभीष्टसंश्रयाकरोतुसानःशुभहेतु॰२ यासांप्रतंचोद्धत-
दैत्यतापितैः॰ ३ याचस्मृतातत्क्षणमेवहंतिनःकरोतुसानःशुभहेतुरी॰ ४ सर्वबाधाप्रशमनं॰५ अत्रवैरिनाशनमित्यत्ररोगनाशमित्यादूहः एवंदैत्यतापितै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रित्यपि सर्वमंगलमांगल्ये०६ सृष्टिस्थितिविनाशानां०७ शरणागतदीनार्त्त०८ सर्वस्वरूपेसर्वेशे०९ एतेनुग्रहेनवश्लोकाः वश्येतुविशेषः ॐ ह्रीं रक्तचामुंडेतूर्णं अमुकंमेवश-
मानयस्वाहा अनेनप्रत्यध्यायमाद्यंतयोःपूजा सर्वांतेअयुतमंत्रश्चदशसाहस्रम् होमयेत्कटुतैलेनरक्तचंदनराजिकाः सहस्राहुतिमात्रेणराजानंवशमानयेत् मधुना-
चाशोकपुष्पंरात्रौहुत्वातुपूर्ववत् चक्रवर्त्तीभवेद्वश्यश्चंडीमंत्रप्रभावतः अंतेशतंब्राह्मणाःकुमार्यश्चभोजनीयाः धर्मार्थेबिल्वपत्रैःपूजावश्यार्थेकरवीरैर्जपाकुसु-
मैर्वा पुत्रार्थेतुलसीदलैःपुष्ट्यर्थेपंकजैः महाप्रयोगेतुषोडशमाषैःस्वर्णमूर्तिंकृत्वाकलशस्थापनंकृत्वातदग्रेघटेर्गलयंत्रेवादीपंस्थापयेत् यंत्रमंत्रंसर्वसाधार
णंस्थापनंमहतिकार्येऊनपंचाशद्दिनानि मध्येचतुर्विंशतिः तदर्द्धमल्पे ब्राह्मणास्त्रयोमहत्कार्येप्रयोगकर्त्तारः अल्पेएकः निग्रहेतुसर्वबाधाप्रशमनमित्यस्यायें
एवमुक्त्वासमुत्पत्स्येतिपठेत् अत्रप्रयोगेकश्चित्तर्पणमप्युक्तम् त्रयोदशपात्राणिदुग्धेनापूर्याद्यंतयोःपुष्पांजलिंदत्वाप्रतिश्लोकंप्रथमाध्यायदेवतांतर्पयामीतिप्रयो
गेणतर्पयेत् ततस्त्रयोदशस्वग्निषुक्रमात्तत्तदध्यायदेवताआवाह्यसंपूज्यप्रतिश्लोकमोंप्रथमाध्यायदेवतायैनमःस्वाहेतिमंत्रेणपायसेनजुहुयात् प्रत्यहंयावत्प्रयोग
समाप्तिः त्रयोदशब्राह्मणाःसुवासिन्यःकुमार्यःएकोनुपनीतो अष्टवर्षएकउपनीतश्चभोजनीयाः परार्थेप्रयोगेतुसत्याःसंतुयजमानस्यकामाइति प्रतिश्लोकंप्रत्यध्या
यंवापठेत् इदंसर्वत्रपरार्थेप्रयोगेतुबोध्यं अत्रत्रयोदशपात्रेषुत्रयोदशदीपाइत्युत्तमःपक्षः एकपात्रेत्रयोदशदीपाइतिमध्यमः एकस्मिन्नेवपात्रेयोदशदीपाइतिदेव
तान्वेत्यधमःपक्षः यथोक्तविधिदीपेषुअक्षतपुंजेषुजलपात्रेषुअग्निषुकुमारीषुवाकार्यःइत्युपदेशः अथप्रयोगांतराणिकात्यायनीतंत्रोक्तानिप्रतिश्लोकमाद्यंतयोःमं
त्रंजपेन्मंत्रसिद्धिः सप्रणवमनुलोमव्याहृतित्रयमादौअंतेतुविलोमंतदित्येवंप्रतिश्लोकंकृत्वाशतावृत्तपाठेतुशीघ्रसिद्धिः प्रतिश्लोकमादौजातवेदसइतिऋचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठेत् अपमृत्युनिवारणायाद्यावंतेशतंत्र्यंबकमंत्रंजपेत् प्रतिश्लोकंतन्मंत्रजपइतिवा प्रतिश्लोकंशरणागतदीनार्त्तश्लोकंपठेत्सर्वकार्यसिद्धिः प्रतिश्लोकंकरोतुसा
नःशुभेत्यर्द्धंपठेत्सर्वकामाप्तिः स्वामीष्टवरप्राप्त्यै एवंदेव्यावरंलब्ध्वेतिश्लोकंप्रतिश्लोकंपठेत् सर्वापन्निवारणार्थंप्रतिश्लोकंदुर्गेतिपठेत् अस्यकेवलस्यापि
श्लोकस्यकार्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः सर्वबाधेत्यस्यलक्षजपेश्लोकोक्तंफलम् इत्थंयदायदेतिश्लोकस्यजपेमहामारीशांतिः ततोवव्रेनृपोरा
ज्यमितिमंत्रस्यलक्षजपेपुनःराज्यलाभः हिनस्तिदैत्यतेजांसीत्यनेनसदीपबलिदानेघंटाबंधनेचबालग्रहशांतिः आद्यावृत्तिमनुलोमेनत्रयोदशाध्यायंप
ठित्वाततोविपरीतक्रमेणद्वितीयांकृत्वापुनरनुलोमेत्येवमावृत्तिमनुलोमेत्येवंदशाध्यायंपठित्वाततोविपरीतमावृत्तित्रयेउक्तेषुप्रकारेषुशीघ्रंकार्यसिद्धिः
सर्वापत्तिनिवारणायदुर्गेस्मृतेत्यंतेर्द्धंततोयदंतिकेयच्चदूरेइत्यूर्ध्वंतदंतेदारिद्र्यदुःखेत्यर्द्धमेवंकार्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः कांसोस्मीत्यूर्ध्वंप्रतिश्लोकंपठेल्लक्ष्मी
प्राप्तिः मारणार्थमेवमुक्त्वासमुत्पतेतिश्लोकंपठेत् मारणोक्तवृत्तिभिः फलसिद्धिः ज्ञानिनामपिचेतांसीतिश्लोकस्तस्यजपमात्रेणसद्योमोहनमित्यनुभवसिद्धम् प्रति
श्लोकंतच्छ्लोकपाठेत्ववश्यम् रोगानशेषानितिश्लोकस्यप्रतिश्लोकस्यप्रतिश्लोकंपाठेपृथक्जपेवापिविद्याप्राप्तिः भगवत्याकृतंसर्वमित्यादिद्वादशोत्तरशताक्ष-
रोमंत्रः सर्वकामदःसर्वापन्निवारणश्च देविप्रपन्नार्त्तिहरइतिश्लोकस्ययथाकार्यंलक्षायुतसहस्रशतान्यतमेप्रतिश्लोकंपाठेसर्वापन्निवृत्तिःसर्वकामाप्तिश्च एषु
प्रयोगेषुप्रतिश्लोकंदीपाग्रेकेवलमेववा नमस्कारकरणेशीघ्रंसिद्धिः प्रतिश्लोकंकामबीजसंपुटितस्यैकचत्वारिंशद्दिनेषुत्रिरावृत्तौसर्वकार्यसिद्धिः एकविंशति ५७
पर्यंतमुक्तरीत्याप्रत्यहंत्रयोदशावृत्तौवशीकरणम् मायाबीजपुटितस्यफट्बीजस्यपल्लवसहितस्यसप्तदिनपर्यंतंत्रयोदशावृत्तौउच्चाटनेसिद्धिः तादृशस्यैवादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचतुष्टयमेकादशावृत्तौसर्वोपद्रवनाशः एकोनपंचाशद्दिनपर्यंतंप्रतिश्लोकंबीजसंपुटितस्यपंचदशावृत्तौलक्ष्मीप्राप्तिः प्रतिश्लोकमेवंबीजसंपुटितस्यशतावृत्त्याविद्या
प्राप्तिः ॐ-ह्रींनमइत्येतत्संपुटितः प्रथमचरित्रस्यप्रतिश्लोकंपाठ आदावंतेक्रमेणश्लोकांतेविपरीतक्रमेणेत्यर्थः एवमग्रेपि -ह्रींनमइत्येतत्संपुटितोमध्यमचरित्र
स्यश्लोकंप्रतिवापाठः ॐ क्लींनमइत्येतत्संपुटितोंत्यचरित्रस्यपाठेशीघ्रंकार्यसिद्धिः तत्रप्रथमचरितेसौः बीजेनषडंगन्यासः त्रिगुणातामसीत्यादिषड्भिःरहस्यो
क्तंध्यानं तत्रप्रथमचरित्रस्यमार्कंडेयऋषिः अनुष्टुप् छंदः महाकालीदेवता नंदाशक्तिः सौंबीजम् अग्निस्तत्त्वंइष्टसि॰ मध्यमचरित्रस्यस्रमेधाऋषिः अनुष्टु
प् छंदः महालक्ष्मीर्देवता शाकंभरीशक्तिः -ह्रींबीजंवायुस्तत्त्वं इष्टसिद्ध्यर्थे॰-ह्रींबीजेनषडंगंसर्वदेवशरीरेइत्यादिसप्तभिः रहस्योक्तंध्यानं उत्तमचरित्रस्य-
शिवऋषिः अनुष्टुप्जगती महासरस्वतीदेवताभीमाशक्तिः क्लींबीजंसूर्यस्तत्त्वं काम्यसि॰ क्लीमितिषडंगंगौरीदेहात्समुद्भूताइत्यादिरहस्योक्तंध्यानं ऐमिति-
बीजमाद्यचरितस्येत्यन्यत्र -ह्रीमिति आद्येश्रीमितिमध्यमेक्लीमित्यंते एतान्येवक्रमेणतत्तद्देवतापूजनेइत्यन्यत्र ऐमित्यंतेइत्यन्यत्र अत्रसर्वकामनाभेदेनध्या
नभेदउक्तः वश्येरक्ततरंध्यानंपौष्टिकेकर्बुरम् उच्चाटनेधूम्रंमारणेकृष्णंसंतानेच्छायांनीलोत्पलदलश्यामंरत्नाकारंध्यानंसर्वकामदंयुद्धेकल्पांताग्निसमतया
ध्यानंजलभयेऽपिकृष्युक्तंध्यानंविषादिभयेपीयूषवृष्टिपूतपूर्णचंद्रसदृशं॰ एकदिनेसंपूर्णपाठाशक्तौपाठेयंविप्रकारकः एवंक्रमेणसप्तभिर्दिनैरेकावृ-
त्तिः एकैकंचरित्रमेकस्मिन्दिनेइतित्रिभिर्वाकेरलाः एतेषांमूलानिकात्यानीतंत्रेद्रष्टव्यानि तंत्रांतरे अस्यसप्तशतीमालामंत्रस्यनारायणऋषिर्गायत्रीछंदः
शुंभमर्दिनीरूपादक्षिणामूर्तिर्देवता क्लींबीजंसोहंशक्तिः दुर्गाप्रीत्यर्थेजपेवि॰ ॐ यन्मोहोज्ज्ञानिनोरपि अंगुष्ठाभ्यां॰ निद्राभगवतींविष्णोस्तर्जनीभ्यां॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहा॰ ॐ जयेतिदेवाश्चसुदामध्यमाभ्यांषट् ॐ आजघानसुजेसव्येअनामिकाभ्यांहुं ॐ हतेतस्मिन्महावीर्येकनिष्ठिकाभ्यांवौषट् ॐ नीतादिवंरिपुगणाभयमप्यपास्तंक
रतलकरपृष्ठाभ्यांफडित्युक्तं संपूर्णसप्तशतीस्तोत्रस्यसमार्कंडेयोब्रह्माविष्णुशिवात्मास्रुमेधाऋषिः अनुष्टुप्जगत्यौछंदसी चंडिकामहाकालीमहालक्ष्मीमहासरस्वतीरू-
पादेवताः नंदाशाकंभरीभीमाः शक्तयः रक्ताक्षीदुर्गाभ्रामर्योबीजानि अग्निवाय्वर्कास्तत्वानिइष्टार्थेविनियोगः इतिब्रह्मोत्तरखंडनाम्निकचिल्लिखितम् अस्यस्तोत्रस्य
श्लोकादिडामरतंत्रेप्युक्तम् अधुनादेविवक्ष्यामिमात्वामंत्रंनवार्णजम् यस्यस्मरणमात्रेणभुक्तिंमुक्तिंलभेन्नरः १ ब्रह्मणालेकवारेणश्लोकाः प्रोक्ताश्चतुर्दश समाधि
नाम्नाप्रोक्तास्तुश्लोकाश्चाष्टौद्विशतः २ तथावार्द्धेनसहिताभगवानेकमेकधा त्रिधाप्रोक्ताश्चविबुधैः सार्द्धषट्त्रिंशदेवहि सार्द्धन्यूनाषट्त्रिंशादित्यर्थः देव्याद्वाद-
शधासार्धैकोनषष्टिः प्रकीर्त्तिताः ऋषिणासप्तविंशत्याचत्वारिंचशतानिवैसार्द्धाष्टोत्तरकाण्यत्रदूतेनोक्ताद्विधाप्रिये श्लोकास्त्रयोदशैवात्रप्रोक्ताः आपाप्रियेम
म एवंसप्तशतीसंख्याश्लोकाअष्टौचसप्ततिः शतानिपंचदेवेशितेषांसप्तशताहुतिः विष्णुमायादितोभ्रांतिरूपांतेआहुतित्रयम् चितिरूपेणदेयंतु आहुतीनांत्रयं
प्रियेइति एवंहोमाशक्तौजयंतीमंत्रेणैवहोमउक्तोन्यत्रपूजाइतिदिक् अथैतत्स्तोत्रस्यपाठेडामरकल्पोक्तोनवार्णसंपुटीकरणप्रयोगविधिः तत्रादौतदुद्धारः ऐंबी
जमादौंदुसमानदीप्तिंह्रींसूर्यतेजोद्युतिमद्द्वितीयम् क्लींमूर्त्तिवैश्वानरतुल्यरूपंतृतीयमानंत्यसुखायचिंत्यम् १ चामुद्रुजांबूनदकांतितुर्यंसुपंचमंरक्ततरंप्रक
ल्प्यं डाषष्ठमुग्रार्त्तिहरंसलीलंयेसप्तमंकृष्णतरारिपुघ्नं २ विपांडुरंत्वष्टममासिसिद्ध्यैच्चेसूक्ष्मवर्णनवमंविशालम् ऐंह्रींक्लींचामुंडायैविच्चेइतिनवाक्षरोमं ५८
त्रः नाभिमात्रेजलेसहस्रजपात्प्रकाविताशक्तिः अयुतजपात्राजबंधनसंकटादिभ्योमोक्षः अस्मिन्नवाक्षरेमंत्रेमहालक्ष्मीर्व्यवस्थिता तस्मात्स्फासिद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषांसर्वदिक्षुप्रदीपकः अतोत्रसिद्धादिविचारोनास्तीतिज्ञापितम् नवाक्षरस्यऋषयोब्रह्मविष्णुमहेश्वराः छंदांस्युक्तानिमुनिभिर्गायत्र्युष्णिगनुष्टुभः देव्यः
प्रोक्तामहापूर्वाः कालीलक्ष्मीःसरस्वती नंदाशाकंभरीभीमाः शक्तयश्चमुनिस्मृताः स्याद्रक्तदंतिकादुर्गाभ्रामर्याबीजसंचयः अग्निर्वायुर्भगस्तत्वं फलंवेदत्रयो
द्भवम् भगःसूर्यःसर्वाभीष्टसिद्ध्यर्थंचविनियोगउदाहृतः ऋषिश्छंदोदेवतानिशिरोमुखहृदिन्यसेत् शक्तिबीजानिस्तनयोस्तत्वानिहृदयेपुनः मंत्राणांपल्लवोवासोमंत्रा-
णांप्रणवःशिरः शिरःपल्लवसंयुक्तोमंत्रःकामदुघोभवेत् नमोंतःशांतिकेपुष्टौप्रणिपातेचकीर्तितः वस्याकर्षणहोमेषुस्वाहांतःसिद्धिदायकः यंत्रभंजनकार्येषुस्फ घोरभयना
शने वषडंतःप्रकल्प्यस्तुग्रहबाधाविनाशकः उच्चाटनेतुसंप्रासेमंत्रोफट्पल्लवान्वितः एतेपल्लववासस्तत्तत्कर्मणिचंडीपाठेपिश्लोकांतादौयोज्याः तथान्यासहीनोभ
वेन्मूकोमृतः स्याच्छिरसाविना अपल्लवस्तुनग्नःस्यात्सुप्तःस्यादासनंविना गुरुंविनावृथामंत्रःश्वव्यजापस्तुशून्यकः निर्वश्योदुष्टदत्तःस्यादन्यबीजस्तुकीलितः दुष्टद
त्तःदुष्टापदत्तइत्यर्थः देवछंदर्षिहीनोयःसतुप्रोक्तोभुजंगमः मूकादयोमंत्रावर्ज्याः वैदिकेमंत्रेनफल्लवादिविचारः ह्रींचंडिकायेइत्यनेनास्यमंत्रस्यचषडंगन्यासोन
वबीजात्मकसमस्तमंत्रेणाचषडंगम् हृदयंनमः शिरसेस्वाहा शिखायैवषट् कवचायहुम् नेत्रत्रयायवौषट् अस्त्रायफडितिक्रमः अस्त्रंसर्वदिक्षुबोध्यम् न
वबीजमंत्रास्तेचंडिकातृप्यतामितिमंत्रेणतर्पणम् एवंहोमादिप्वप्यूह्यम् लिखेदष्टदलंपद्मंकुंकुमागरुचंदनैः पद्ममध्येलिखेच्चक्रंषट्कोणंचंडिकामयम् षट्को
णचक्रमध्यस्थमाद्यबीजंत्रयंन्यसेत् तत्रमध्यबीजेमहालक्ष्मीः तद्दक्षिणेमहाकाली वामेसरस्वती पूर्वादिषट्कोणेषुबीजान्यन्यानिविन्यसेत् इदंपूजायंत्रं पद्मा
सनाद्यन्यतमं आसनम् तथासप्तशतीश्लोकेन्यासः खड्गिनीशूलिनीत्यादिपठित्वाश्लोकपंचकं आद्यंकृष्णतरंबीजंध्यात्वासर्वांगकेन्यसेत् आद्यमैमितिस्मृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ळेनपाहिनोदेवीत्यादिश्लोकचतुष्टयम् पठित्वासूर्यसदृशांद्वितीयंसर्वतोन्यसेत् द्वितीयंन्हीमिति सर्वस्वरूपइत्यादिश्लोकानांपंचकंपुनः पठित्वास्फटिकाभासंतृ-
तीयंस्वतनौन्यसेत् तृतीयंक्लीमिति उक्तैरेवश्लोकैःशब्दवृत्तिद्वयेनषडंगन्यासोपिक्वचिदुक्तः ततःषडंगंकुर्वीतविभक्तैर्मूलवर्णकैः एकेनैकेनवर्णेनचतुर्भिर्युगुलेनच
समस्तेनचमंत्रेणकुर्यादंगानिषट्सुधीः ततःकर्विदेवंन्यासविधिंकृत्वासुरभिमुद्रांविलोकयेत् अर्घ्यपात्रंप्रतिष्ठाप्यपूरयेच्छुभवारिणा गंधपुष्पाक्षतांस्तत्रविन्य
स्यनृपनंदन ध्यात्वामनसिसर्वार्थान्हस्तोदत्वाभिमंत्रयेत् रक्षार्थंतस्यकर्त्तव्याचक्रमुद्रास्त्रसंयुता अर्घोदकेनसंस्कारंपूजाद्रव्यस्यपूर्ववत् अथमहाकाल्यादि
देवतात्रयध्यानम् खड्गंचक्रगदेषुचापपरिघान्शूलंभुशुंडींशिरः पाशान्संदधतींकरैस्त्रिनयनांसर्वांगभूषावृताम् नीलाश्मद्युतिमास्यपाददशकांसेवेमहाका-
लिकां यामस्तौच्छयितेहरौकमलजोहंतुंमधुंकैटभम् १ अक्षस्रक्परशूगदेषुकुलिशंपद्मंधनुःकुंडिकांदंडंशक्तिमसिंचचर्मजलजंघंटांसुराभाजनम् शूलंपा-
शसुदर्शनेचदधतींहस्तैःप्रवालप्रभांसेवेसैरिभमर्दिनीमिहमहालक्ष्मींसरोजस्थिताम् २ घंटाशूलहलानिशंखमुसलेचक्रंधनुःसायकंहस्ताब्जैर्दधतींघनांत
विलसच्छीतांशुतुल्यप्रभांगौरीदेहसमुद्भवांत्रिजगतामाधारभूतांमहापूर्वामत्रसरस्वतीमनुभजेच्छुभादिदैत्यार्दिनीम् ३ ततःउक्तयंत्रेपंचोपचारैःपूज्यातःएवंकु
लाजपेल्लक्षचतुष्कंतद्दशांशतःपायसान्नेनजुहुयात्पूजितेहेमरेतसि एतदेवास्यपुरश्चरणं मार्कंडेयपुराणोक्तनित्यंचंडीस्तवंपठेत् पुटितंमूलमंत्रस्यजपेदाप्नो
तिवांछितं शतमादौशतंचांतेजपेन्मंत्रंनवार्णकम् चंडीसप्तशतीमध्येसंपुटोयमुदाहृतः सकामैःसंपुटोजाप्योनिष्कामैःसंपुटंक्वचित् सप्तशत्याश्चरित्रेतु
प्रथमेपद्मभूर्मुनिः छंदोगायत्रमुदितंमहाकालीतुदेवता वाग्बीजंपावकस्तत्त्वंधर्मार्थेविनियोजनं मध्यमेतुचरित्रेत्रमुनिर्विष्णुरुदाहृतः उष्णिक्छंदोमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मीर्देवताबीजम् ह्रीं वायुस्तत्त्वंधनप्राप्त्यैविनियोगउदाहृतः उत्तरस्यचरित्रस्यऋषिःशंकरईरितः त्रिष्टुप्छंदोदेवतास्यमहापूर्वासरस्वती कामोबीजंरविस्त
त्त्वंकामाप्त्यैविनियोजनम् कृत्स्नस्यसंपूर्णस्तोत्रस्यमार्कंडेयऋषिः ब्रह्मविष्णुरुद्रावाऋषयः महाकाल्यादयस्तिस्रोदेवताः गायत्र्युष्णिगनुष्टुप्छंदांसि ऐंह्रींक्लींबी
जानि चामुंडाशक्तिःअग्निवायुसूर्यास्तत्त्वानि सर्वेष्टसिद्ध्यर्थंजपेविनियोग इत्युक्तम् एवंसंस्मृत्यऋष्यादीन्ध्यात्वाशर्वोक्तिमार्गतः सार्थंस्मृत्वापठेच्चंडीस्तवंस्पष्टपदा
क्षरम् समाप्तौतुमहालक्ष्मींदेवींध्यात्वाषडंगकम् जपेदष्टशतंमूलंदेवतायैनिवेदयेत् आदावंते अष्टशतंजपः आश्विनस्यासितेपक्षे आरभ्याग्नितिथिंसुधीः अष्ट-
म्यंतंजपेल्लक्षंदशांशंहोममाचरेदिति अथशतचंडीविधिः शंकरस्याभवान्यावाप्रासादनिकटेशुभम् मंडपंद्वारवेद्याढ्यंकुर्यात्सध्वजतोरणम् तत्रकुंडंप्रकुर्वीतप्रतीच्यां
मध्यतोपिवा स्नात्वानित्यक्रियांकृत्वावृणुयाद्दशवाडवान् जितेंद्रियान्सदाचारान्कुलीनान्सत्यवादिनः वाडवाःब्राह्मणाः पंचभिःसप्तभिर्वापिनवैकादशभिस्तथा
अदीर्घदिवसैःक्षिप्रंविदध्याच्चंडिकामखम् अयुग्मब्राह्मणैःकार्यंशतावृत्तंसुसिद्धये त्रिपंचसप्तनवभिर्दिनैःपक्षेणवापुनः देवीमाहात्म्यपाठंतुयुग्मैर्विप्रैःकृतंतु
यत् निष्फलंचभवेत्सर्वभूतिनाशमवाप्नुयात् इतिवचनत्रयंक्रोडतंत्रनाम्नापठ्यतेतत्तुनिर्मूलम् अष्टमीनवमीचतुर्दशीपूर्णिमासुयथाशतावृत्तिसमाप्ति
र्भवति तथा आरंभःकर्त्तव्यः इतिसांप्रदायिकाः ऋत्विजस्सन्मान्यचंडिकापाठरतान्लज्जादयावतः मधुपर्कविधानेनस्वर्णवस्त्रादिदानतः जपार्थमासनंमालां
दद्यात्तेभ्योपिभोजनम् तेहविष्यान्नमश्नंतोमंत्रार्थगतमानसाः भूमौशयानाःप्रत्येकंजपेयुश्चंडिकास्तवम् मार्कंडेयपुराणोक्तंदशकृत्वःसचेतसः नवार्णं
चंडिकामंत्रंजपेयुश्चायुतंपृथक् पृथक्संपुटीकरणजपाद्वितिशेषः प्रत्येकंब्राह्मणैः अयुतजपःकार्यः जपमानःपूजयेच्चकन्यानांदशकंशुभम् द्विवर्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्यादशाब्दांताःकुमारीः परिपूजयेत् एकाब्दायाःप्रीत्यभावोरुद्राब्दातुविवर्जिता तासांक्रमेणनामानि कुमारी १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ कालिका ५ चंडि
का ६ शांभवी ७ दुर्गा ८ सुभद्रा ९ एतैरेवनाममंत्रैस्तासां पूजा तत्रहीनाधिकांगीव्रणयुक्ता अंधकाकाणाकुरूपाकेकरारोमयुगुदेहादासिजारोगिण्यःइत्येवमाद्या
वर्ज्याः विप्रांसर्वेष्टसंसिद्ध्यैयशसेक्षत्रियोद्भवाम् वैश्यजांधनलाभायपुत्रास्यैशूद्रजांयजेदिति गंधपुष्पधूपदीपभक्ष्यभोज्यैर्यथाशक्तिवस्त्राभरणैश्चपूजिता
वेद्यांविरचितेरम्येसर्वतोभद्रमंडले घटंसंस्थाप्यविधिवत्तत्रावाह्यार्चयेच्छिवाम् तदग्रेकन्यकाश्चापिपूजयेद्ब्राह्मणानपि उपचारैस्तुविविधैर्नवार्णावरणै
रपि ततःॐकारःप्रथमंपीठंपूर्णपीठमतःपरम् तृतीयंकामपीठंचपूजयेत्संप्रदायतः आग्नेयादिचतुर्दिक्षुपूज्यंदेवीचतुष्टयम् जयाचविजयाचैवजयंतीत्वा
पराजिता पूर्वोक्तयंत्रेपूर्वकोणेसरस्वतीब्रह्मा श्रीसहितोविष्णुर्नैरृत्ये उमयाशिवोवायव्ये षट्कोणचक्रमध्यस्थमध्यबीजेमहालक्ष्मीःमहाकालीमहास
रस्वती तद्दक्षिणवामयोःउदक्सिंहोदक्षिणेमहिषःषट्कोणेषुनंदजारक्तदंतिका शाकंभरीदुर्गाभीमाभ्रामर्यः सबिंदुनामाद्यवर्णाद्यास्ताराद्याश्चासांनाम
मंत्राः पूजादौताराःप्रणवः अष्टपत्रेषुब्रह्माणीमाहेश्वरीवैष्णवीवाराहीनारसिंहीऐंद्रीचामुंडाउक्तरीत्यानाममंत्रैःपूज्याः ततोविष्णुमायादिचतुर्विंशतास्त्र
योविंशतिदेवताःप्रागादिक्रमेणकेसरेषुपूज्याः ततोविष्णुमायाद्याःकाश्चित्तुएवम् विष्णुमाया १ चेतना २ निद्रा ३ क्षुधा ४ छाया ५ शक्तिः ६ तृष्णा ७ क्षा
न्तिः ८ जातिः ९ लज्जा १० शांतिः ११ श्रद्धा १२ कांतिः १३ लक्ष्मीः १४ धृतिः १५ वृत्तिः १६ स्मृतिः १७ दया १८ तुष्टिः १९ पुष्टिः २० माता २१ भ्रांतिः २२ तद्रूपास्त्वयोर्वि
शोक्ताः तालमूलेचसंपूज्यमाधारादिचतुष्टयम् आधारःकूर्मशेषौचतुर्थीपृथिवीनृप गृहकोणेषुगणेशःक्षेत्रपालोबटुकोयोगिन्यःइंद्राद्याश्चेति एवंच ६०

CC-0. In Public Domain. Digitization by eGangotri

तुर्दिनं कृत्वा पंचमे होममाचरेत् तत्र प्रथमेह्नि एकावृत्तिः द्वितीयेह्नि तृतीयेतिस्रः चतुर्थे चतुरः प्रतिब्राह्मणहोम द्रव्याणि पायसान्नो त्रिमध्वक्तैर्द्राक्षारंभाफलादिभिः मातुलिं-
गैरिक्षुखंडैर्नारिकेलैः पुरःस्थितैः जातिफलैराम्रफलैरन्यैर्मधुरवस्तुभिरिति सप्तशत्या दशावृत्त्या प्रतिमंत्रं हुतं चरेत् अयुतं च नवार्णेन स्थापिते ग्नौ विधानतः कृत्वावरणं
देवानां होमं तन्नाममंत्रतः कृत्वा पूर्णाहुतिं सम्यक् देवताग्नौ विसृज्य च अभिषिंचेच्च यष्टारं विप्रो घः कलशोदकैः निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत् भोजयेच्च
शतं विप्रा भक्ष्यभोज्यैः पृथग्विधैः तेभ्योपि दक्षिणां दत्वा गृह्णीयादाशिषस्ततः एवं कृते जगद्वश्यं सर्वे नश्यंत्युपद्रवा इति कुर्याद्देवं विशुद्धात्मा चंडी साहस्रके विधिं
विद्यावतः सदाचारान् ब्राह्मणान्वृणुयात्स्वतम् प्रत्येकं चंडिका पाठान् विदध्युस्ते दिशामतात् अयुतं प्रजपेयुस्ते प्रत्येकं नववर्णकम् पूर्वोक्ताः कन्यकाः पूज्याः
पूर्वमंत्रैः शतं शुभाः वेदाहमेवं संपाद्य होमं कुर्युः प्रयत्नतः सप्तशत्या शतावृत्त्या प्रतिमंत्रं विधानतः लक्षसंख्यं नवार्णेन पूर्वोक्तैर्द्रव्यसंचयैः होतृभ्यो दक्षिणां दत्वा पूर्वो-
क्तान् भोजयेद्द्विजान् सहस्रसंमितान् साधून् देव्याराधनतत्परान् एवं सहस्रसंख्याके कृते चंडीविधौ नृणाम् सिद्ध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति मारीदु
र्भिक्षरोगाद्या नश्यंति व्यसनोच्चयाः एतद्दशगुणो विधिरयुतं प्रजपेयुस्ते इति यस्याः प्रभावमतुलं श्लोकं सुकृतांजलिः दद्याद्गोमिथुनान्यष्टावाचार्याय स भक्तिमा-
न् चतुर्विंशतिसंख्याकैर्हेमगद्याणकैः सह एकैकं दशविप्रेभ्यो दद्याद्गोमिथुनं समम् निष्कवयसमायुक्तं वस्त्रालंकारभूषितमिति यद्यत्कार्यं समुद्दिश्य क्रियते
शतचंडिका तत्तत्तस्य महालक्ष्मीः सत्यमाशु प्रयच्छति क्वचिद्रुद्रयामले इत्युक्ताद्द्रव्यांतराण्यपि होमे उक्तानि तत्र प्रधानहोमः स्यात्त्रिमधूद्धृत उत्तमः प्रधानद्र-
व्यमुद्दिष्टं पायसान्नं तिलास्तथा यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा किंशुकैः सर्षपैर्लाजैर्दर्भैर्दूर्वांकुरैस्तथा करवीरै रक्तपुष्पै रक्तोत्पलसितैरपि रक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनखंडैश्चगुग्गुलैश्चमनोहरैरिति अथब्रह्मांडपुराणनाम्नाग्रंथ्यध्यायंश्लोकसंख्याङ्कविदुक्ता तत्राद्यचरिताध्यायेश्लोकैकाशीतिरुत्तमा अथमध्यचरित्रे
तु अष्टस्वेकरूसंख्यकाः त्रयोमध्यमायाश्चतुःसप्तचतुर्वेदस्ववेदकाः अथोत्तमचरित्रेतु षट्षडग्निश्लोकभागितेति अग्नीषोमाध्यायवतीगीतासप्तशतीस्मृ-
ता तथाकवचार्गलाकीलकोनामापिश्लोकसंख्याउक्ताः श्रीवज्रकवचस्यापित्रिपंचाशच्छ्लोकशालिता अर्गलाकीलकेश्लोका द्व्यष्टाविंशतिसंख्यकाः अ-
थोरहस्यत्रयस्यत्रयोध्यायामसुधुवाइतिच तत्रकवचस्यचामुंडादेवताब्रह्माऋषिः अनुष्टुप्छंदः अंगन्यस्तादेव्यः सायुधामातरोबीजम् दिग्बंधदेवतास्त
त्वं अर्गलायाः विष्णुरनुष्टुप्छंदः नवार्णोमंत्रः शक्तिः मंत्रोदितादेव्योबीजम् सप्तशतीमंत्रस्तत्त्वंकवचस्यशिवऋषिः इतरदर्गलावत् तथाप्रथमचरित्रब्रह्मा
ऋषिः अनुष्टुप्छंदः महाकालीदेवतानंदजाशक्तिः रक्तदंतिकाबीजमग्निस्तत्त्वंपौष्टिकेविनियोगः मध्यमचरित्रस्यविष्णुऋषिःमहालक्ष्मीर्देवता शाकंभरीश
क्तिः दुर्गाबीजं उष्णिक्छंदः वायुस्तत्त्वं ईप्सितप्राप्त्यर्थेजपेविनियोगः उत्तरचरित्रस्याशिवऋषिः महासरस्वतीदेवता छंदोनुष्टुप्जगत्योभीमाशक्तिः भ्राम
रीबीजं सूर्यस्तत्त्वं उच्चाटनादौविशेषतोविनियोगइति तच्चकात्यायनीतंत्रोक्तमंत्रविभागेनविरोधात्निर्मूलइतिध्येयम् इतिश्रीमदुपाध्यायोपनामककाशि
वभट्टसूनुसतीगर्भजनागोजीभट्टकृतेमार्कंडेयपुराणांतर्गतसप्तशत्याख्यचंडीस्तोत्रस्यव्याख्यानेचंडीस्तोत्रप्रयोगविधिःसमाप्तः श्रीमहाकालीमहालक्ष्मी
महासरस्वत्यर्पणमस्तु शुभंभवतु श्रीर्जयतितराम् श्रीगणेशायनमः अथदेव्यपराधस्तोत्रप्रारंभः नमंत्रंनोयंत्रंतदपिचनजानेस्तुतिम
होनचाह्वानंध्यानंतदपिचनजानेस्तुतिकथाः नजानेमुद्रास्तेतदपिचनजानेविलपनंपरंजानेमातस्त्वदनुसरणंक्लेशहरणम् १ विधेरज्ञानेनद्रविणविरहेणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लसततयाविधेयाशक्यत्वात्तवचरणयोर्याच्युतिरभूत् तदेतत्क्षंतव्यंजननिसकलोद्धारिणिशिवेकुपुत्रोजायेतक्वचिदपिकुमातानभवति २ जगन्मातर्मातस्तवचरणसेवा
नरचितानवादत्तंदेविद्रविणमपिभूयस्तवमया तथापित्वंस्नेहंमयिनिरुपमंयत्प्रकुरुषेकुपुत्रोजा० ३ पृथिव्यांपुत्रास्तेजननिबहवःसंतिसरलाःपरंतेषांमध्येविरलतर
लोहंतवसुतः मदीयोयंत्यागःसमुचितमिदंनोतवशिवेकुपुत्रोजायेत० ४ परित्यक्तादेवान्विविधपरिसेवाकुलतयामयापंचाशीतेरधिकमपनीतेतुवयसि इदानीं
चेन्मातस्तवयदिकृपानापिभवितानिरालंबोलंबोदरजननिकंयामिशरणम् ५ श्वपाकोजल्पाकोभवतिमधुपाकोपमगिरानिरातंकोरंकोविहरतिचिरंकोटिकनकैः
तवापर्णेकर्णेविशतिमनुवर्णेफलमिदंजनःकोजानीतेजननिजपनीयंजपविधौ ६ चिताभस्मालेपोगरलमशनंदिक्पटधरोजटाधारीकंठेभुजगपतिहारीपशुप
तिः कपालीभूतेशोभजतिजगदीशैकपदवींभवानित्वत्पाणिग्रहणपरिपाटीफलमिदं ७ नमोक्षस्याकांक्षाभवविभववांछापिचनमेनविज्ञानापेक्षाशशिमुखि
सुखेच्छापिनपुनः अतस्त्वांसंयाचेजननिजननंयातुममवैमृडानीरुद्राणीशिवशिवभवानीतिजपतः ८ नाराधितासिविधिनाविविधोपचारैः किंरुक्षचिंतनपरै
र्नकृतंवचोभिः श्यामेत्वमेवयदिकिंचनमय्यनाथेधत्सेकृपामुचितमंबपरंतवैव ९ आपत्सुमग्नःस्मरणंत्वदीयंकरोमिदुर्गेकरुणार्णवेशिवे नैतच्छठत्वंम
मभावयेथाःक्षुधातृषार्ताजननींस्मरंति १० जगदंबविचित्रमत्रकिंपरिपूर्णाकरुणास्तिचेन्मयि अपराधपरंपरावृतंनहिमातासमुपेक्षतेसुतम् ११ इति
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितंदेव्यपराधस्तोत्रंसंपूर्णम् श्रीजगदंबार्पणमस्तु ॥ ॥ ॥ ॥
॥ हेंपुस्तक मुंबईंत बापुहरशेट देवळेकर याणीं आपले छापखान्यांत छापिलें. शके १७८३ दुर्मतिनामसंवत्सरे वैशाखकृष्ण पंचम्यां ५ भौमवासरे समाप्तिमगात् ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री॥

इतिसप्तशतीसटीकासमाप्ता॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu